

श्री लक्ष्मी काव्यम्

सवोधिन्या टीकया सहतम्

श्रीमत्पण्डित कुल दिवाकर श्री गोस्वामि वंश्या
वतंस महा कविवर वजीराबादपुर निवासी
श्री गोस्वामी

श्री लक्ष्मीनाथ विरचितम्

तत्सूनुना तदाज्ञा वश वर्तिना
श्रीमत्पण्डित अमरनाथ शर्म्मणा
मुफीद-आम नामके मुद्रा यन्त्रे विक्रमार्कतः
१९५४ संवत्सरे मुद्रापितम् ।

(THE LAKSHMI KAVYA)

(By) the famous Sanskrit Poet
(GOSWAMI LAKSHMI NATH)
OF WAZIRABAD.

THIS POEM

IS MOST RESPECTFULLY DEDICATED

TO

H. H. Sir Raja Amar Singh Bahadur, K.C.S.I.,

OF

JAMMOO AND KASHMIR,

BY

PANDIT AMAR NATH,

Officiating Tehsildar, Rawalpindi,

THE SON OF THE AUTHOR.

Rawalpindi:

27th September 1897.



अथ लक्ष्मी काव्यम्

ओं नमः श्रिये

ओं श्रीशारदा शारदपद्मचन्द्रावधीरिणीमास्य रुचिंदधाना
भावेषुकुर्वंगा द्विषणां निषण्णां पण्णां स्तुतानामपि
मेऽस्तुतानां ॥ १ ॥

ओं श्रीगणेशायनमः ॥ ओंनमः सरस्वत्यै ॥ ओं नत्वा गिरं गुरुं गौरीं गिरीशं गिरजात्मजं स्वयंकृतमदः काव्यं स्वयंव्याख्यायतेमया १ प्रत्ययादेरिह प्रायो यत्पदं विहृतंमया न भूयोविहृतिस्तस्यकृता विस्तरभीरुणा २ इहखलुनिखिल सज्जन समाज विभ्राजमानमैत्रीमर्यादादिसद्गुणपरस्फीत सदाचरणगाथ श्रीमत्प्रमथ नाथ पदपाथोज निरंतरध्यानगोष्पदीकृत दुस्तरसंसृतिपाथो नाथ गोस्वामी वंशावतंसस् श्रीमच्छम्भुनाथ चरणनीरजद्वयीद्विरेफायमान मानससुस्मितपदीपदिष्मानरविः श्रीलक्ष्मीनाथकविः काव्यं यशसेऽर्थं कृतेव्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कांता सम्मिततयो पदेशयुजे इत्याद्यालंकारिकवचनप्रामाण्यात् काव्यस्यानेकश्रेयो ऽ साधारण कारणत्वावच्छिन्नतामाकलय्य तत्रापि निजोत्पादित ब्रह्माद्यखिल सुर

मुकटकोटि निघृष्टपादारविंदायाः परायाः शक्त्याः श्री महालक्ष्म्याश्चरित्र वर्णन रूपस्य तस्य विशेषतः करामलवत्सायुज्यादिमुक्तिचतुष्टययोग क्षेम प्रतिपत्ति फलदातृतां च संभाव्य महिष निधनाख्य लक्ष्मीकाव्य निर्मिति जातसमुत्साहः तन्निर्माणेचप्रतिभाप्रभृति समुदित कारणकलापं स्वस्मिन्न संपन्नं परामृश्य तद्धेतुभूतायाः श्री वाग्देव्याः सकाशात्तन्निष्पत्तिं प्रार्थयन्नपि गीतशिष्टाचार विषयत्वात्प्रागावश्यकर्तव्यताकं, प्रारिप्सि तपरिसमाप्ति परि पंथि प्रत्यूह समूह विघ्नंसनमं श्री शब्दपूर्वक माशीर्वाद रूपं मंगल माचरति "श्री शारदेति" श्रिया शोभया युक्ता शारदासरस्वती मेममधिषणां बुद्धिं षण्णां श्रुतानां वेदांतादि षट्शास्त्राणां भावेषु अभिप्रायेषु निषण्णां कुर्यात् षट् शा· स्त्राभिप्रायावगाहिनीं कुर्यादित्यर्थः कीदृशानांश्रुतानां मेमम अश्रुतानामपि तद्विका विचारनादिकथा। अथमे दृतिपदस्यदेहलीदीपकन्यायेनोभाभ्यां संबंधः कीदृशी श्रीशारदा शरदि आश्विन कार्तिकाख्यऋतौ भवाः शारदाः तेचपद्म संख्यापरिछिन्नाश्चंद्रास्तानवधीरयितुं तिरस्कर्तुं शीलमस्याईदृशीं आस्यस्य मुखस्यरुचिंशोभांदधाना बिभ्रतीत्यन्वयः। ननुग्रन्थाधिष्टात्र्या महा· लक्ष्म्यामंगलं कस्मान्नाचरितमिति शंकामपहर्तुं द्वितीयोप्यर्थः कार्यः। तथा च- श्रियामहालक्ष्म्या सहिता शारदा श्रीशारदाकीदृशीश्री शारदाचशरदि भवौ- यौपद्मचन्द्रौकमलेंदू तयोस्तिरस्कारिणीं मुखशोभांदधाना श्रियोरक्ताध्यानो पहितत्वात्कमलाधिक्यं शारदायागौरध्यानोपहितत्वाच्चन्द्राधिक्यं प्रतिपादितं शेषंपूर्ववत्। यद्वासा मा महालक्ष्मीः मेंधिषणामित्यादिपूर्ववत् कीदृशी माश्रिय स्त्रिवर्गसंपत्यादेः ईशास्वामिनी प्रदात्रीतियावत् पुनः की॰ रदादंताविद्यंते येषां तेरदाद्न्तिनस्तानश्नातिभुनक्तीतिरदाशः सिंहः तदुपरि अरंशीघ्रं भक्तेभ्यो निजेष्ठं ददातीत्यरदौ तादृशौ यौ पदौ अंघ्रीतयोर्माशोभायस्याः सा रदाशारदप द्मसिंहारूढेत्यर्थः साचेऽचन्द्रन्यक्कारिणीशोभयेतिशेषः सातथाधर्मलुप्तोपमेयं पुनः की॰ आस्यरुचिंसुख शोभांदधानेति वदाअस्यमेममभक्तस्य स्वस्मिन् रुचिं अभिलाषाभक्तिं दधानापोषयन्ती धिषणांषण्णांश्रुतानां भावेषु निषण्णांकुर्यात्।

यद्वाय: विष्णुस्तस्यस्वस्मिन्नभिलाषां धारयन्ती विष्णुशक्तित्वात् यद्वा साम्श्री शारदा सकलवर्णात्मिका कुंडलिनी अनेक शारदचन्द्रतिरस्कारि मुखद्युति शालिनी यद्वा शारदमप्रतिमं नूतनंवायत्पद्मं ब्रह्मरंध्रीय सहस्रारकमलं तदवधितत्पर्यंतमोरियोगतुरा तथा मालक्ष्मीरास्ते ऽस्मिंस्तत् मासं कमलं तद्भवोमास्यो मृनालतंतुरित्यर्थ: तद्वद्रुचिंशोभांदधाना मूलादिब्रह्मरंध्रांत-स्फुरद्विद्युल्लताकृतिं ध्यायेत्कुन्डलिनीं देवीं विसतंतुतनीयसी मितिध्यानात् शारदो ऽव्देखियां तोयपिप्पलीसप्तपर्णयो: सस्ये क्लीवं शरज्जातनूतनाप्रति मेत्रिष्विति मेदिनी। मेधिषणां धर्णात्राधारा दिषट्चक्राणां विभावेषुधारणा रूपाभि प्रायेषुनिषण्णांनिश्चलां कुर्यात्क्री०षट्चक्राणां मयायोगशास्त्रेषु स्थिता-नामपि अच्युतानां नसम्यगवद्धतानां धारणाशैथिल्यादित्यर्थ: वस्तुतस्तु सर्वस्याद्यभूता श्री महालक्ष्मीरेवत्रिगुणोपहिता कालीसरस्वती लक्ष्मीरूपेणा-विर्भवते तदुक्तं प्राधानिकरहस्ये सर्वस्याद्यामहालक्ष्मी स्त्रिगुणासकलेश्वरी लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थितेति अनदेवरुद्रयामलादौ बहुधा प्र-पञ्चितं ग्रन्थ विस्तरभयान्नेह लिखितम् एवमुत्तरत्रापि पार्वत्यादि वाचकैर्गिरिजा-दिनामभिर्महालक्ष्मीरेवलक्ष्या। सकलमूलविष्णुपचेतु हेश्रियैालक्ष्म्या ईशस्वा-मिन् तथा हेवरद वरंयोग्यं स्मरणाव्यवहितोत्तरक्षणएवेतियावत्भक्तेभ्योवर्गच तुष्टयं ददातीतिताद्दश तथाहे नागांद्दणांविषयाभिलाषं रदतिनाशयतीति-ताद्दश तथाहेपद्मसंख्याक चन्द्रतिरस्कारयों मुखशोभांदधान तथा हे अ विष्णो भवान् ममधिषणांधर्णांस्थितानां भावेषु निषण्णांकुर्यादितियोजना शेषंपूर्ववत्। श्रीकृष्ण पचेतु हेश्रीशारदाशारद सारंजलंददतीतिसारदा: प्रलयकालीन मे-घा:श्रिया विद्युत्स्तनिताद्युपकरणेनसहिता: सारदा: श्रीसारदा: तेषामासारं मुशलतुल्यधारा संपातं रदति गोवर्धनधारणेनखन्डयतीति सतथा यद्वाशारंजलं मेव दाराद्ददातीतिशारद: इन्द्रस्तस्याशांव्रजंमेघैर्व्रीडया मीत्यभिलाषंरदतीति स तथाशेषं विष्णुपक्षवत्। श्रीरामपचेतु श्रियायुतंसारंजलंयस्यस श्रीशारस्स मुद्र: तत्तारणायदाशकेवर्तरूप यद्वा श्रीयतेइतिश्री: संसृति: यद्वाश्रयत्यध्यास्ते

युक्तिरजत यत्परमात्मानमितिश्रीः सततिः सेवसारंजवंतत्तारत्रायकैवर्तरूप कैवर्तदाशधीवरावित्यमरः तथा भारंभरिसमूहं रावणप्रभृतिकं दातिखण्डयतीतिसतथा शेषंपूर्ववत् यद्वा श्रियाशोभयायुक्तः भारीचरिवः सीता प्रलोभनार्थं धृतकांचन मृगस्वरूपोमरीचिरित्यर्थः तं द्यतिखण्डयतीतिसतथा तथा भाशां विषयाभिलाषं रदतीतिसः यद्वा भाशा अर्थात् दश रावणशिरांसिरदतीतिस तथा शेषंपूर्ववत् यद्वाश्रियायुक्तं भारंभरसमूहोधस्य यद्वा श्रियायुक्तंभारमिति सारंवलंयस्यसतथा। दशशिरांसि यस्यसदाशोरावणस्तमरमत्यर्थं द्यति खण्डयतीति दाशारदः शेषंपूर्ववत्। श्रीहनुमत्पक्षेतु श्रीः सीता तदीशोरामः तस्यभारं रावणाद्यरिसमूहंद्यतीति स तथा भाशासुदिक्षु रमग्निं ददातीति सतथालंकादाहसमयेइतिशेषः यद्वा भाशया रावणायकिंचिद्बलं प्रदर्शयामीति अभिलाषेण लंकायां रमग्निददातीति स तथा पद्मांशं दयतीति पद्मचन्द्रः सूर्यः तस्यतिरस्कारिवीं मुखशोभांभासमंतात् दधान यद्वापद्मचन्द्रः सूर्यः तदवधि तत्ययैतमोरिवोभास्वत्सुखसरूचिमभिलाषंदधान पूर्वं हिजातमात्र एव हनुमान्ससुदयंतं सूर्यं भक्षयतुं दूरतरंसमुत्पपातेतिप्रसिद्धं शेषं पूर्ववत्। निखिलविघ्नहरगणपपक्षेतु हेश्रियोविद्यायाबुद्धेर्वाईश तथा हे भरंशोघ्रंद्यतिखं डयति विघ्नानितिताडश तथा हे भाशारदपद्म रदाहंताविद्यंतेयेषांतेरदादंति नः भाशानांदिशांरदादिग्गजास्तद्वत्पद्मंशुंडापमतविंदुजालकंयस्य अनेनदिग्गजवत् सुखशोभापिसूचिताभवति यद्वादिग्गजास्तद्वत् पद्मलक्ष्मीः शोभेति यावत्यस्यसतथाहे चन्द्रस्यतिरस्कारिणोरुचिमभिलाषंदधान पुराहिपति स्थूलवपुषंविकृताननंचवोक्ष्य स्वसदयं द्रस्यकांतिराहित्यहेतुना शापेनतिरस्कारो गणपतिनाऽकारि भद्दतिसंबोधने हेगणपस्य भा पुरः स्थितस्यभक्तस्य ममधिषणामित्यादि पूर्ववत् ॥ २ ॥ स्वेष्टदेवश्रीसदाशिवपक्षेतु हेश्रियाशोभया युक्तईश तथा हे भरं शीघ्रं ददातीति तादृश आशुतोषत्वात् यद्वा हेश्रीशारदेत्येकंपदं तत्र भाराविद्यंते यस्मिं स्तदारं चक्रं श्रीशायविष्णवे भारंसुदर्शनाख्यं चक्रं ददातीति तादृश पुराहिविष्णुः सहस्रेणकमलैः प्रतिदिनंपरंभक्त्यापूजि-

स्मात् एकस्मिन्दिनेतद्भक्ति परीक्षार्थं एकंकमलमलक्ष्यं हरोऽहृतवान् ततएव-भूनंबोक्षनिजनेत्रमेवोत्पाव्य कमलतयाहरिरूपढौकितवान् तद्भक्तिसंतुष्टेन हरेणसुदर्शनाख्यं चक्रं हरयेदत्तमितिपुराण प्रसिद्धं यद्वा श्रीमत्सर्वविष्णोरारंका-लचक्रं द्यति नाशयति मृत्युंजयत्वात् तथा आशाकूपं तृष्णारूपं रमन्निं द्यति-खण्डयति ताहृश तथापद्मंकमलं तद्वन्मस्तकेचंद्रोऽस्यस्येतिताहृश तथा हे दधान सर्वधारक पोषकवा अद्दतिसंबोधने हे शिव अरिणीं जनिमृति बंधहेतुत्वादा-त्मनस्तिरस्कारिणीं मम रुचिं विषयाभिलाषं आ समंतात् स्य नाशय तथाभवा-न् ममधिषणामित्यादि पूर्ववत् ॥ १ ॥ प्रत्यक्ष देवसूर्यपक्षेतु हेश्रीमत्सर्वविष्णोरा रकाल चक्रकालपरिमापकत्वात् तथा हे दाशारद अत्र शसयोः सावर्ण्यं दासे भ्यो भक्तेभ्योऽरंशीघ्रं ददातीतिताहृश यद्वा शारमिति सारं बलं ददातीति शारदः श्रियायुक्तः शारदः श्रीशारदः तत्सबुद्धौ तथा हृष्टिहेतुत्वात् आदि-त्याज्जायतेहृष्टिरिति श्रुतेः तथा हे आशादिशोरदति किरणैर्विलेखयतीतिता-हृश यद्वा आशादिश एव रदादंतायस्येति दंतरहितत्वात् तथा हे पद्म पद्भिः पादैः किरणैर्मिनोतिविस्तं तैर्मा शोभायस्य तिवा पद्मोऽस्यऽस्ये तिवापद्मकरत्वात् तथा हे चन्द्रस्यतिरस्कारिणींरुचिंदीप्तिं दधान सूर्योदयेहिचं द्रस्यनिस्तेजस्क-ता भवति यद्वा चन्द्रावधिचन्द्र मण्डल पर्यंतमीरिणीं गत्वरां रुचिं दधान सूर्यप्रभयैव चन्द्रस्योपचयो भवतीति प्रसिद्धम् तथा हे आस्य आसयाम्नुखाद्भ व भासेशा वेदस्तत्रयत्रयी मूर्तित्वात् आसरं मुखेचसमभ्येतद्भवेचेति मेदिनी कोशात् अद्दति संबोधने हे सूर्यभवान्मेधिषणामित्यादि पूर्ववत् यद्वा हे पद्मचन्द्र पद्मांयं दयतयाह्लादयतीतिताहृश हे सूर्य अस्रतमसस्तिरस्कारिणी तव मा प्रभारूपाश्रीः रुचिशोभांदधानासतीमेधिषणांपक्षां श्रुतानांभावेषु निषक्तांकुर्यादिति अत्रादौप्रतिपाद्यदेवतायामंत्रोपिसूचितः तदुक्तं शारदा तिलके वांतं वन्हिसमारूढं वामनेत्रेंदुभूषितं मंत्रमेतच्छ्रियः प्रोक्तं चिंतारत्न-मिवापरमिति वांतंशकारःवन्हिः रकारः वामनेत्रमीकारः इन्दुरनुस्वारः तथा चश्रींमितिनिष्पन्नम् अत्रप्रसिद्धिदोषभयसाम्रित्यविंदोरभावः। अत्र सर्ग संख्या

श्लोक संख्या विसूचिता तथाहि भवश्रीकारोपलक्षिताः सर्गाः ईशाः एकादशसंति तथा रुद्रेत्यनेनद्वात्रिंशद्वर्णोपलक्षिताः श्लोकाश्चात्र ईशाएकादशतत्पश्चात् रुद्राश्चः रुद्रैर्द्वात्रिंशद्भिः सहिता आशादशद्विचत्वारिंशदित्यर्थः एवं चद्विचत्वारिंशदधिके कादशशत संख्याकाः संतितेचाष्टाक्षरपादसंख्ययागणनीयाः अत्ररुद्रपक्षचंद्रेति प्रारंभकालीनसंवत्सरमपिसूचयति तथाच रंधन्हिस्तदंकास्त्रयः तथा द्यतिखण्डयति अंकानितिद शून्येन गुणितं शून्यमित्युक्तेः तथा पद्मो निधिविशेषस्तदंकाश्च चंद्रेत्येकमेव कृत्वा अधिकोनविंशतिशतंजातं ताद्दशवत्सरेइति शारदःतिपदं प्रथम पक्षस्यशरद्दतौ चाश्विनदशमीतिथौ भौमवासरे च प्रारंभणमपि सूचयति अत्र च श्रीशेत्यनेनलक्ष्मीनाथेति ग्रंथकर्त्तानामाप्यभिहितम् शारदइत्यत्रतत्रभवइत्यण् अवधीरिणीति शीलार्थेइनिः टिड्ढाणित्यादिनाङीप् धिषणेतिञिधृषाप्रागल्भ्येधातुः धृषेर्धिषच् संज्ञायामितियुच लक्ष्मी सरस्वती धीत्रिवर्गसंपद्विभूतिशोभासु उपकरणवेषरचनाविदाासुचश्रीरिति प्रथितेतिवराडिः सारोवलेमज्जनिचस्थिरांशेन्याय्येचनीरेचघनेचसारंवलेऽन्यवल्लारमुदाहरंतीतिविश्वः रुचिःस्त्रीदीप्तौशोभायामभिषंगाभिलाषयोरितिमेदिनी। भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसिति च पद्मोस्त्रीपद्मे व्यूहनिधि संख्यांतरेवुलेइति च बुद्धिर्मनीषाधिषणेत्यमरः। स्मृतंशावावद्वतयोरिति च अत्रपक्षांशारदेतिच द्विरुच्चारणादामकालंकारः तथोक्तम् यमकंभिन्नवाच्यानामावृत्तिःसंयुतायुतेति। इन्द्रवज्रावृत्तेोपेंद्रवज्रावृत्तस्योश्चपजातिर्वृत्तरत्नाकरोक्तेयं यद्यप्यवांत्यलघुरूपस्य तगणस्य व्योमदेवतिकत्वाच्छून्यंफलमुक्तं तथापि तावच्छ्रीपदप्रयोगाच्छुभमेवफलं तथोक्तं आमहेनदेवतावाचकाः शब्दायेचभद्रादिवाचकाः तेसर्वेनैवनिन्द्याः स्युर्लिपितोवचरतोपिचेति प्रायशोऽस्मिन्सर्गेजनिरित्यादावप्युपजातयएव उपजाति लक्षणंयथा एकत्रपादेचरणद्वयेवापादत्रयेवाऽन्यतरःस्थितश्चे त्तयोरिहानयवतदो हनीयाश्चतुर्दशोक्ताउपजाति भेदातमोधिक इत्यादौचक्वचिदुपेंद्रवज्रापिउपेंद्रवज्राजतजास्ततोगौ। अत्रचश्रीमहालक्ष्मीरूपः प्रधानोवीररसः शृंगारादयस्तदंगभूताः देवानांब्रह्मलोक

दिगमनोपायसाध्यंमहिषमिधनं फलम् भत्र च सर्गबंधत्वान्महाकाव्यत्वम् तथाचदंडी सर्गबंधोमहाकाव्यमिति वाचग्राहंग्याधिक्येवोत्तमत्वं इदमुत्तमम तिशयिनिव्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितेतिलक्षणात् ॥ १ ॥

जनि र्न मेऽभूद्धरिनाभिपद्मा न्न चांऽगिरा मां जनयांबभूव।
देव्याश्चरित्रं परमं पवित्रं कथं ब्रुवे पीवरधीऽरधीरः ॥ २ ॥

संप्रतिकविःस्वाहंकारमपनयति जनिरिति अहंपीवरधीः स्थूलबुद्धिः अधीरोधैर्यरहितश्च देव्याः स्वयंप्रकाशात्मिकायाजगद्रचनाक्रीडाशीलायावा श्रीमहालक्ष्म्याश्चरित्रंमहिषवधरूपं कथंकेन प्रकारेण ब्रुवेवर्णयामि कीदृशंपर मंपवित्रं चकुतस्त्वंवर्णने नसक्तोसीत्याह मेमम जनिर्जन्म हरेर्विष्णोर्नाभिपद्मात् नाभूत् ब्रह्मापिनाभवमित्यर्थः तथा अंगिरानामर्षिरपिमांनजनयांबभूव नो-त्पादितवान् बृहस्पतिरपिनाभवमितिभावः यदिब्रह्माबृहस्पतिर्वाहंभूयां तथा पिकिंचिद्ब्रुवेइतिभावः अत्रजनिरित्यादिविशेषणद्वयस्यस्वस्मिन्ब्रह्मादसा धारण कारणकार्यतुप्रतिषेध मुखेननाहंब्रह्मेत्याद्यभिप्रायगर्भितत्वात्परिकरा-लंकारः जनिधातोर्बु्रादिगणे कासादित्वादाम् धीरोधैर्यान्विते स्वैरेबुधेक्लीवंतु-कुंकुमे इति विश्वः ॥ २ ॥

सुधा व्यतीया न्न दिवानिशं मे व्यर्थप्रलापैः शयने स्व कामैः।
इति व्यवस्य प्रकरोमि यत्नं स चाऽस्तु सार्थो
गिरिजाप्रसादः ॥ ३ ॥

अथकवे स्तर्हिकिमुप्रवृत्तोसीत्यत आह सुधेति अहमितिनिश्चित्य एतद् यत्नं काव्यनिर्माणरूपंप्रकरोमि इतिकिंमे मम दिवानिशमहोरात्र सुधा व्यर्थं नव्यतीयाद्यापयातु कैःव्यर्थप्रलापैः वृथैवलौकिकभाषणैर्दिनं

प्रयत्नैः स्वर्गैः कामैदारादिष्वभिलाषाभिरराशिरित्यर्थः मर्मैवयत्नौ गिरि
जायाः पार्वत्याः प्रसाद सार्थः सहायकोऽस्तु यद्यप्यत्रप्रलापोऽनर्थकवचस्त्वमरो
क्तेः प्रलापपदेनैवव्यर्थभावसिद्धेर्व्यर्थपदंव्यर्थं तथाप्यतिव्यर्थताद्योतनार्थत्वा
न्नदोषः यद्वाविशिष्टवा चकानां पदानां सतिप्रयत्विशेषने विशेष्यमात्रपरतायाः
सकोचकेमौक्तिकपूर्वरंध्रे रित्यादौदृष्टत्वात्प्रलापपदस्य भाषणमात्रएवार्थोवोद्ध-
व्यः ॥ १ ॥

सवासवा स्ते सवभोजिपुंज्ञा धराधराणां पिहिता दरीषु ।
पुनः पुन र्वाजिरिपो र्विभक्ता यमोवसावास्तर
विबेकः ॥ ४ ॥

इति गुरुत्वा स्वागमनमस्मिन् प्रयत्ने प्रवेशयोग्यं संभाव्य कथामवतारयति "सवा-
सवारति" वासवेनइंद्रेणसहवर्तमानाः सवं यज्ञं भोक्तुं शीलं येषां तेदेवाः तेषां
पुंजाः समूहाः अतिशयेनार्त्ताः दुःखिताः संतः वनस्य भवनो भूमौ विवेकः
यत्तदोर्नित्यसंबंधात्तेके येवाजिनः प्रसस्यरिपोर्महिषात्मनः पुनर्विभक्ताः पला
यिताः संताः धराधराणां पर्वतानां दरीषुगुहासुपिहितास्तिरोहिता आसन्नि-
त्यध्याहारः वष्टिभागुरिरल्लोपमित्यादिना अपीतुपसर्गाऽकारलोपः यज्ञः सवो-
ऽध्वरोयागास्त्वमरः ख्यावनिर्मेदिनीमहीतिच पादादियमकमिदं ॥ ॥

प्रपीडिता स्ते विजने भ्रमंतो मगा खगेंद्रस्य भवा दिवाऽस्य ।
गुरोः पुरस्ता च्च मिथो मिलित्वा संमंत्रयामासु
रमर्त्यसंघाः ॥ ५ ॥

"प्रपीडिताइति" ते अमर्त्यसंघाःदेवसमूहाः अस्य महिषस्य भयात् विजने जनसंचाररहिते वनेभ्रमंतः संतः प्रपीडिता अतिदुःखिता आसन् कस्यभया त्कइव मृगेंद्रस्य सिंहस्य भयात्मृगाइव अथचगुरोर्बृहस्पतेः पुरस्तात् अग्रेमिथः परस्परं मिलित्वा सम्यक् मंत्रयामासुः अत्रदेवानां मृगतुल्यत्वान्महिषस्य च सिंहतुल्यत्वात्तुल्योपमा ॥ ५ ॥

तमोधिके सर्वसमृद्धिजुष्टे स्वनिघ्नबंधावविचिंत्यवीर्य्ये ।
न सामदाने न च भेददण्डौ वयं समर्था महिषे प्रयोक्तुम् ॥ ६ ॥

किंमंत्रयामासुरित्यत आह "तमोधिकइति" वयंदेवाः तस्मिन्महिषे साम चदानंचसामदाने तथाभेदश्चदण्डश्चभेददण्डौ इतिनीतिविज्ञप्रतिपादितमुपाय चतुष्टयमपि प्रयोक्तुंनसमर्थाः उभयोर्नकारयोरुभाभ्यां पदाभ्यां संबंधः कुतोन समर्था इत्यतस्तस्मिन्हेतुगर्भितविशेषण चतुष्टयं योजयति कीदृशे महिषे तम इति तमोगुणोऽधिकः उत्कृष्टो यस्मिन् अतः साम न युज्यते यतो वयं सत्वगुण प्रधानाः तेजस्तिमिरयोरिव सत्वतमसोर्मिथो नैसर्गिकविरोधात् पुनः कीदृशे सर्वाभिः समृद्धिभिः राजविभूतिभिर्जुष्टे सेविते अतोदानं न युज्यते दानंहिनि-र्धनेदत्तंसफलंभवति पुनःकीदृशे स्वस्यात्मनो निघ्नाः अधीनाबंधवो भ्रात्रादयः अमात्यादयोवा यस्य तस्मिन् अतोभेदो नयुक्तःभेदोहिप्रतिकूलबंधुं प्रति युज्यते अविचिंत्यं तर्कागोचरंवीर्यं पराक्रमोयस्य तस्मिन् अतोदण्डो नयुक्तः दण्डोहि स्वस्माद्धीनवीर्ये कार्यक्षमो भवतीतिभावः सामनाम प्रियवचनादिना शत्रोः क्रोधोपशमनं तत्तुपंचधा तथोक्तम् परस्परोपकाराणां दर्शनं गुणकीर्तनम् संबंधस्यसमाख्यान मायत्याः संप्रकाशनम् वाचापेशलया साधुतवाहमितिचा-र्पणम् इतिसामविधानज्ञैः सामपंचविधंस्मृतमिति दानंनाम स्वरक्षार्थे शत्रो र्वशीकरणायवा परेभ्यः स्वधनस्यसमर्पणम् भेदोनाम शत्रोरमात्यादीनामुपाये न परतोविश्लिष्यात्मसात्करणं दण्डोनाम युद्धशस्त्रैः स्वप्रभावदर्शनं सामदानेभेद दण्डावित्युपायचतुष्टयमित्यमरः अधीनोनिघ्नआयत्तइतिच ॥ ६ ॥

धिक् पौरुषं येन पुरंदरोऽपि परैः पराजित्य परां विपत्तिम् ।
अनायि तन्निश्चिनुमो वयं ते विधे निंतांतं परवान् हि
लोकः ॥ ७ ॥

अथ पौरुषान्निर्विस्नादेवंप्रतिपादयंति "धिगिति" पौरुषं पुरुषार्थेधिक् धिक्कारोस्तु येनपुरंदरोपि परपुरदारकतयाप्रसद्धोपींद्रः परैः शत्रुभिः पराजित्य परामुत्कृष्टांविपत्तिं अनापि नीतः पुनरन्यस्य पौरुषे कोहंकारइति भावः मतस्माद् तोः तेवयंदेवाः इतिनिश्चिनुमः निश्चयंकुर्मः इतिकिं ययंलो कोजनः नितातं निरंतरं विधेर्दैवस्यपरवान् अधोनोस्ति पौरुषेकृते पिफलसिद्धेरभावादकृते च क्वचित्फलसिद्धिदर्शनादित्यन्वयव्यतिरेकाभावात् दैवस्यैवमुख्यतेतिभावः पौरुषमितिधिग्योगेद्वितीया पुरोरिपूणांदारयतीति पुरंदरः पूःसर्व योर्दारिसहोरितिखच् अनायीतिभावकर्मणिनमोरूपं नयतेर्द्वि कर्मकत्वात्कर्मद्वयं परतंत्रः पराधीनः परवान्नाथवानपीत्यमरः लोकस्तु भुवने जने इति च ॥ ७ ॥

अतो विधे नंः स्वयणां विधेयं स एव सर्वस्य हिभागधेयम् ।
रजःप्रधानः स जगन्निदानं तुष्टः स दास्यत्यऽभयप्रदानम् ८॥

इदानींब्रह्मैवविधिशब्द देववाचकं ब्रह्मण्यपिनिश्चितं मत्वातदाश्रयणमेव हितमितिप्रतिपादयंति "अतइति" अतोऽस्मात्कारणात् नोऽस्माकंविधेर्ब्रह्मणए वाश्रयणं विधेयं कार्यं हियतः स एव ब्रह्मा सर्वस्य जनस्यभागधेयं प्राक्तनकर्मा नुसारेणशुभाशुभफलदत्वाददृष्टरूप इत्यर्थः किंच स एव रजः प्रधानः रजोरू पयाविक्षेपशक्त्या पचितः सन् जगतो निदानं कारणं भवति स एव हितुष्टः सम्मान् अभयस्य प्रधानं दास्यति भाग्यैकदेशयोर्भाग इति रुद्रः भाग्य एव भागधेयं भागरूपनामभ्योधेयइति भागधेयस्याचाजहल्लिंगत्वात्पुंल्लिंग विशेष

पत्वेपिनपुंस्त्वं स्वं निदानस्यापि। विधिर्ब्रह्मविधानयोः विधिवाक्ये च दैवे च प्रकारे कालकल्पयोरितिहैमः विक्षेपशक्तेर्जगन्निदानत्वंचोक्तम् विक्षेपशक्तिर्लिंगादि ब्रह्मान्तं जगत्सृजेदिति। जायोपजातिः ॥ ८ ॥

ततोऽचलीकृत्य मतिं सुरौघा श्चिंतार्णवं चारुमिथो मथित्वा।
तदापुरेवाऽमृतमर्थ मेतं शोकापनोदाय विनिश्चयार्थं ९ ॥

"तत इति" ततोऽनंतरं सुरौघाः देवसमूहाः तदा पुरासिंधु मंथन कालेऽमृतमिव एतमर्थंविध्याम्ययणरूपं शोकस्यापनोदाय नाशार्थंविनिश्चयं उदधा किंकृत्वा मतिंबुद्धिमचलीकृत्यनिश्चलीकृत्य पर्वती कृत्य च तथा चिंतारूपमर्णवं समुद्रं मिथो मथित्वा विलोड्य अनचलामचलां कृत्वा इत्य चली कृतय अभूततद्भावेच्विः च्वौदीर्घः मथिधातोः पूर्वकालेक्त्वा आगमशास्त्र स्यानित्यत्वान्नुमभावः शोकापनोदायेतितादर्थ्ये चतुर्थी अत्रमतेरचलरूप स्वाच्चिंतायाश्चार्णवरूपत्वाच्चरूपकालंकारः इंसो उपजातिः ॥ ९ ॥

ततो मुहूर्ते जयदेवसंज्ञे जयाय देवानदिश त्प्रयातुम्।
प्रास्थानिकं स्वस्त्ययनं नियुज्य प्रस्थापयामास गुरुः
सुराणाम् ॥ १० ॥

अथ ब्रह्मलोकं प्रतस्थुरित्याह "तत इति" ततोनिश्चयानंतरं सुराणां गुरुर्बृहस्पतिः जयदेवसंज्ञे मुहूर्ते तान्देवान् जयार्थं प्रयातुमाज्ञप्तवान् जयोदेवानांयस्मिन्नितियथादिवमुहूर्तंस्यदेवजयसूचकतेति अथचप्रस्थानसमययोग्यं स्वस्त्ययनं नियुज्यतान् प्रस्थापयामास। मालोपजातिः ॥ १० ॥

ययायतां तत्र मरुद्गणानां ववौ मरुन्मंद मथाऽनुकूलः।

अवाकिरं स्ते सुमनःसमूहं शाखा विशाखा सुमनः शिरस्सु ॥ ११ ॥

अथशुभशकुनानिकार्यसिद्धिसूचकानयाह "यियासतामिति" तच तस्मिन्न मये यातुमिच्छतांदेवगणानां अनुकूलो वायुर्मंदंमंदं यथास्यात्तथा ववौ अथचतेन यतरा: विशालाश्चा: देवानांशिरस्सु पुष्पसमूहमवाकिरन् याधातोरितिकार्ये सः प्रतरय: ततोडितुं इस्से इतोकार: शोभनं मनोयेषामिति सुमनः पदेनापिशु भदत्वंद्योतितं तथा च श्रीपति: निमित्तराशिरेकतो नृणांमनस्तथैकतः यतो- यियासतां सदा मनोविशुद्धिरिष्यतइति अनुकूलवायोरपिशुभदत्वं चोक्तं अनुकू लोयदावायु: सर्वकार्याणि साधयेदिति तथापुष्पाणामपि मरुद्देवेसमीरिता इति मेदिनी सुमनाः पुष्पमालयो: स्त्रियांनाधीरदेवयोरितिच अनोकुहः कुटः शाल: पलाशी द्रु द्रुमागमा इत्यमर: ॥ ११ ॥

प्रदक्षिणीकृत्य मृगा विहंगा ययुः स्वनंति स्म च कीचकौघाः । दृशां सहस्त्रार्धमथो मघोन: पुस्फोर सव्येतर मेककालम् ॥ १२ ॥

अन्यान्यपिशुभनिमित्तान्याह "प्रदक्षिणीकृत्येति" मृगाः पक्षिणश्चताम् प्रदक्षिणीकृत्ययुः कीचकानां वेणूनामोघाः समूहाश्च स्वनंतिस्म शब्दंचक्रुः अथोमघोनः इंद्रस्यदृशां सहस्त्रार्धं पंचशतमितं सव्याद्वामादितरं दक्षिणमितर थं: एककालंयुगपत् पुस्फोरस्फुरितवान् पुंसांदक्षिणनेत्रस्फुरणं शुभफलदं इंद्रस्य सुसहस्त्रनेत्रत्वात्पंचशतनेत्रस्फुरणमुक्तं मृगपक्षिणोप्रदक्षिणीकृत्यगमनंशुभफल मुक्तं प्रदक्षिणगता: श्रेष्ठा यात्रायां मृगपक्षिणइति कीचकावेणवस्ते सुर्येस्वनंत्य निलोद्धतास्त्वमर: अत्रापि कीचकपदस्यवेणुमात्रवाचकतैव ॥ १२ ॥

इत्थं निमित्तान्यमितानि मत्वा फलस्य सिद्ध्यै सुमनीभवन्ति।
मुदाऽभि धातुः सदनं प्रयातुं मनो दधुर्दानववैरिवाराः॥१३॥

"इत्थमिति" इत्थममुनाप्रकारेण दानववैरिणां देवानांवाराः समूहाः अमितानिबहूनि निमित्तानिशकुनानि फलस्यसिद्ध्यै सुमनीभवंति पुष्पीभवन्ति मत्वाज्ञात्वा पुष्पानंतरंफलोद्गमोभवतीतिभावः मुदाप्रीतया धातुर्ब्रह्मणः सदनं लोकं अभि प्रति प्रयातुं मनोदधुः चोसलोपश्चेतिसुमनसः सकारस्यलोपः अभिरभागेइतिकर्मप्रवचनीयत्वेन तद्योगेसदनमितिद्वितीया वारसंघातसंचया इत्यमरः॥ १२ ॥

विहायसा तेऽथ पथा तदानीं समुत्पतंतिस्म मरुत्तौ विहाय।
सदभ्रचन्द्रैरिव संवृतं तैर्दूरंगतैः स्वच्छ्रियमापदभ्रम् १४॥

"विहायसेति" अथतेदेवाः तदानीं पृथ्वींतत्यक्त्वा आकाशेन मार्गेण समुत्पतंतिस्म तैश्च दूरंगतैः संवृतं व्याप्तं अभ्रंव्योम सदभ्रैर्वर्द्धभिश्चन्द्रैरिवव्याप्तंसच्छ्रियं परमशोभामापत् अभूतोपमेयं पुंस्याकाशविहायसी इत्यमरः अदभ्रं बहुलंबहुलमितिच॥ १४ ॥

तैर्द्रागऽतिक्रम्यबहूनि धिष्ण्यान्यऽधिष्टितानीन्दुविकर्त्तनाद्यैः
अकारि दृक्प्राघुणिकस्तृषार्तैर्ह्रदो हिदंते रिव
सत्यलोकः॥ १५॥

"तैरिति" तैर्देवैः द्राक्शीघ्रं चन्द्रसूर्यादिभिरधिष्टितानि बहूनिभुवनानि उल्लंघ्यसत्यलोकः ब्रह्मलोकः दृशोरतिथिरकारि दृग्गोचरीकृत इतियावत्

वो: कादवनृषार्तैर्गजैर्ह्रदस्य चनतृषारूपं दुःखं तदार्तगजरूपाटेवा ह्लच्छमन
कार हृदरूपो ब्रह्मलोक इतिज्ञात्वा पूर्वोपमेयं विवर्त्तं मार्कमार्ते ज्ञायतामरः
॥ १५ ॥

दूरान्महीमण्डल मीक्षमाणा विभक्तवर्णं च ततः कथंचित् ।
उच्चावचापस्तरचयैः पुनस्तं लोकं विधातु र्य
विलोकयंति ॥ १६ ॥

"दूरादिति" तेदेवातंलोकं दूरात् तेज पुञ्जमेव पश्यंतः ततश्चासन्नं कथं
चित् मण्डलायत्नेन विभिन्नरूपं पश्यंतः ततश्चात्यासन्नं पृथग्दृश्यमाने र्बहुविध
मंदिरसमूहैः ब्रह्मणो लोकंविलोकयंतिस्म अयमेवब्रह्मलोक इतिनिश्चयंप्रापु
रितर्थः विलोकयंतिस्मे तिप्रयोगेभूतार्थता उच्चातचंनेकभेद मितरमरः निशां
तापस्त्यतदनंभवनागारमन्दिरमितिच ॥ १६ ॥

निजप्रभामंडलमध्यगानि वेश्मानि यश्मिन्मणिनिर्मितानि ।
किर्मीरिताभिः परितो विभांति पताकाभिरलं
कृतानि ॥ १७ ॥

संप्रति ब्रह्मलोकं वर्णयति "निजेति" यस्मिन् लोके वेश्मानि मन्दिराणि विभां
ति कीदृशानि स्वस्वगृहस्यै वयत्प्रभामंडलं तन्मध्ये प्राप्तानि तथामणिभिः रचिता
नि तथाचित्रताभिः पताकाभिर्ध्वजैः परितोऽलं कृतानि किर्मीराचित्राणि घ्या
तानि यासुताभिः चित्र किर्मीरितामरः ॥ १७ ॥

मनोनुरूपं क्षणमात्रलभ्यं चिरानुबंधि प्रतिबंधहीनम्
दिवौकसामीश्वरतामुपेत्य पुरौकसो यत्रसुखं भजंते ॥ १८ ॥

"मनइति" यत्रयस्मिन् लोके दिवौकसांदेवानामीश्वरतामाधिपतंत्र प्राप्यपुरवासिनः सुखंसेवंते ननुसुखमपिवहुधेतिकीदृशं सुखं सेवंतइतत्रतआह मनोनुरूमिति यदात्मनसावांछितं तत्तदेवसुखं प्राप्नुवंतितिभावः ननुमनोनुरूप मपि किं कालांतरेण प्राप्नुवंति नेतआह क्षणमात्रलभ्यमिति यत्क्षणेवांछितं तत्क्षणएवप्राप्नुवंतोति किंतत्क्षणलब्धमपि सद्यो नश्यति नेतआह चिरानुबंधी ति चिरस्थायीतार्थः किंचिरस्थाय्यपि विघ्नैः परिभूयते नेतआह प्रतिबंधहीनमिति विघ्नरहितं दिवं स्वर्गंओकोगृहंयेषां ते दिवौकसः दिवशब्दोऽदंतोपि शक्रभवनं खंदिवं नभइतित्रिकांडशेषात् ॥ १८ ॥

सरोऽस्ति नो यत्र न यत्रकञ्जं कञ्जं न गुंजंत्यलयो न यत्र
न गुञ्जितं कर्षति यन्न चित्तं चित्तं न यद्ब्रह्मविचारशून्यम् १९

"सरइति" यत्रलोके तादृशं सरोनास्ति यस्मिन्कंजंकमलंन जातविकवच नंयद्यत् सरस्तत्सकमलमेवेतार्थः तथायत्रतादृशं कंजमपि न यस्मिन् अलयोभ्र मरा नगुंजंति सर्वमपि कमलजातं सभ्रमरगुंजितमिति तथातादृशंभ्रमरगुं जितमपिन यत्चित्तं नकर्षति सर्वमपिगुंजितं चित्तकर्षणशालीति तथातादृशं चित्तमपिन यद्ब्रह्मणः परमात्मनोविचारेण शून्यंस्यात् सर्वोपि चित्तो तत्रब्रह्मवि चारंकरोतीतिभावः एकावल्यलंकारोयम् ॥ १९ ॥

उरुद्युतेः पार्श्वमुपेत्य तस्य न शक्नुवंति स्म विलोकितुं ते।
मुहुः स्खलंतीभिरथ स्वदृग्भिस्तदा निनिंदुर्यदनिमेषभावम्
॥ २० ॥

"उरुद्युतेरिति" तेदेवाः तस्यमहाप्रभस्य ब्रह्मलोकस्यसमीपं प्राप्य तंद्रष्टुं नसमर्था बभूवन् यतश्चक्षुर्वारंवारं तस्यमहाप्रभत्वात् ततः सकाशात् स्खलं

तोभिः सख्तितां प्राप्नुवन्तीभिः स्वदृग्भिः करणैः स्वस्मिन् गुणरूपमपि अनिमे षभावं तदा निनिन्दुः अयंभावः यदाऽस्मास्वपिनिमेषोभवेत् तदावयमत्रनिमी लितैचणाः स्यामेति अत्रमहादाुतिमंतंलोकंद्रष्टुमशक्तानांदेवानांनिमीलन परिपंथित्वात्गुनस्याप्यनिमिषत्वस्यदोषरूपवर्णनादुल्लासालंकारोयम् ॥ २० ॥

गुरोर्गिरा ते तमसः परस्तात्तद्ब्रह्मधाम प्रतिपद्यसत्यम्
विहाय भीतिं महिषाधिपोत्थां सिषेविरे यं वचसाम
गम्यम् ॥ २१ ॥

अथैषांब्रह्मलोकप्राप्तिमाह "गुरोरिति" तेदेवाःगुरोर्बृहस्पतेर्गिरा वाण्या उपदेशेनेतियावत् तत् पूर्वोक्तं सत्यं सत्याभिधं तमसोंधकारात् परस्तात् तेजो रूपमितत्यर्थ:ब्रह्मणोधाम भवनं प्रतिपद्य प्राप्य वचसामगम्यं निरतिशयंयं सुखं सिषेविरेभेजिरे किं कृत्वा महिषोयोसावधिपः अधीशः महिषाणामधिपो वा महामहिषत्वात् तस्मादुत्थांजातां भीतिं विहायत्यक्त्वा अथाप्रस्तुतार्थः तेजिज्ञा सवः गुरोर्देशिकस्यगिराउपदेशेन तदिति तत्पदलक्ष्याखंडचैतन्यात्मकं ब्रह्म प्रतिपद्य वेदान्त युक्तिभिर्निश्चित्य महिषस्याधिपः स्वामीकालः तदुत्थांभीतिं विहाय कालभयंत्यक्त्वा वचसाकथितुमशक्यं निरतिशयं यं सिषेविरे कीदृशन्तद्ब्र ह्म तमसोऽज्ञानात्परस्तात् पुनःकीदृशंधामतेजोरूपं पुनश्च सत्यं त्रिकालाबाध्य यद्वावचसामगम्यमित्यपि ब्रह्मविशेषणं अत्रैवयथाक्रमंश्रुतयः प्रमाणं परीक्ष्यलो कान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थंसगुरुमेवा भिगच्छेत् समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमिति अकृतोमोक्षः कृतेनकर्मणा न भवतीत्यर्थः आदित्यवर्णं तमसः परस्तादितिच सत्यंज्ञानमनंतंब्रह्मेतिच यतो वाचोनिवर्त्तंते अप्राप्य मनसा सहेतिच गुरुर्मंहत्यांगिरसेपित्राद्यौधर्मदेशके इति हेमः तमांसिगुणतिमिरसैंहिकेया इतित्रिकांडशेषः ब्रह्मतत्वतपोवेदे नद्ययोः पुंसिवेधसीतिधरणिः धामरश्मौप्रभावेचतेजोमंदिरवारिष्विंतिविश्वः अथदेवा नां ब्रह्मलोकप्राप्तिवर्णने प्रकृते जिज्ञासोश्च परमपद प्राप्तिवर्णनस्याप्रकृतस्या

दुर्वादिपदानां नानार्थत्वाच्च प्रकृताऽप्रकृतश्लेषालंकारः तथोक्तं चन्द्रालोके नानार्थसंश्रयः श्लेषो वर्ण्याऽवर्ण्योभयाश्रित इति ॥ २१ ॥

पूर्द्वारि मुक्तामणिनिर्मितायां क्षणं चिचिंतुः प्रतिबिंबितांगाः
भीताद्द्ययारेः किमिहान्यतो न्यब्रह्मांडदेवाः शरणं प्रपन्नाः
॥ २२ ॥

अथैषांपुरद्वारप्राप्तिमाह "पूर्द्वारीति" तेदेवाः मुक्ताभिर्मणिभिश्च रचितायां तस्यापुरोद्वारि प्रतिबिंबितांगाः संतः प्रतिबिंबिरूपान् स्वसदृशाकृतीनऽपरांस्तत्र वीक्ष्य त्वं तत्रस्थिताः क्षणमात्रं तर्कयामासुः किमित्याह किमितितर्के इह ब्रह्मलोके अन्यस्मात्मद्विषासुरान् भीतः अन्यस्यब्रह्मांडस्यदेवाः वयमिवब्रह्माणं शरणं प्राप्ताः द्वयारेरितिभयहेतौपंचमी भ्रमसंशयालंकारः ॥ २२ ॥

तत स्ततायां शतभानुभायां विभ्राजमानं ससुखं सभायाम् ।
विचित्रचामीकरनिर्मितायां वैडूर्य्यगारुत्मतमण्डिता
याम् ॥ २३ ॥

अथ देवैर्दृष्टं ब्रह्माणंविशिनष्टि ततइत्यादिभिः षड्भिः ततइत्यस्यअग्रेप द्योत्तरार्धेनान्वयः ततो लोकदर्शनानंतरं देवानांवाराः समूहाः हिरण्यगर्भंब्रह्माणं पुरस्तादग्रतो ददृशुः कंकेइव हिरण्यं स्वर्णं गर्भंयस्यतं निधिंदरिद्रानिर्धना इवकीदृशंतं ससुखं यथास्यात्तथा सभायां प्रकाशमानं कीदृश्यां सभायां ततायां विस्तृतायां तथाशतसूर्यतुल्यप्रभायां तथाअनेकविधैः स्वर्णैरचितायां तथावैडूर्यगारुत्मते च मणिविशेषैर्भूषितायां चामीकरं जातरूपं महारजतकांचने इत्यमरः ॥ २३ ॥

विनिर्मिते स्वर्णमणिप्रवेकैः सिंहासने प्रोच्चतरे निषण्णम् ।
उदेत्य सानाविव रत्नसानो रुपस्थितं माणवकोष्णरश्मिम् २४

पुनः कीदृशमित्याह "विनिर्मितइति" स्वर्णमणिप्रवरैरचिते अतिशयेनोच्चे सिंहासनेस्थितं कस्मिन् कमिव रत्नानिसानौयस्य तस्यसुमेरोःसानौशिखरे उदयंप्राप्यउपस्थितं माणवकंबालं उष्णरश्मिं सूर्यमिव क्लीवेप्रधानंप्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्यवरेण्याश्चेत्यमरः बालस्तुस्यान्माणवकइतिच गभस्तिहृणिघृणयः भानुः करोमरीचिः स्त्रीतिच अत्रस्वर्णमणिरचितोच्चतरसिंहासनस्य मेरुणासाम्यं भगवतो रक्तत्वादुदितसूर्येणेतिकृत्वा पूर्णोपमेयम् ॥ २४ ॥

संस्तूयमानं स्तवकैः स्तवानां सुगुंफितै र्नारदपर्वताद्यैः ।
गीतेऽर्पितश्रोत्र मथ प्रणीते गंधर्ववारै-रितसामसारैः २५॥

पुनः कीदृशमित्याह "संस्तूयमानमिति" नारदपर्वतादिभिः सुरमुनिभिर्ग्रंथितैः स्तोत्राणांगुच्छैः संस्तूयमानं अथचगंधर्वसमूहैर्गीयमाने गीते दत्तकर्णं कीदृशैः प्राप्तसामवेदसारैः सामवेदोहिमंगीतप्रायः । स्याद्गुच्छकस्तुस्तबक इत्यमरः ॥ २५ ॥

आस्यै श्चतुर्दिक्षु चतुर्भि रस्माद्दर्यो नकोप्येत्विति वीक्षमाणम्
दोर्भि श्चतुर्वेदधरै श्चतुर्भिः सृजंत मुच्चै श्चतुरोपि वर्गान् २६॥

पुनः कीदृशमित्याह "आस्यैरिति" चतुर्भिर्मुखैश्चतसृषु दिशासु इतीव यथा तमित्युत्प्रेक्षाध्याहार्या इतिकिं अस्मात् लोकात् कोप्यागतोजनोनिरर्थकोनगच्छतु सर्वोपिसार्थएवयात्विभावः तथाचतुर्वेदधरैश्चतुर्भिर्भुजैः उच्चैर्यथा

स्वात्तया चतुरोपिधर्मार्थकाममोक्षाख्यान् वर्गान् स्ववन्तं ददतं । भुजबाहुप्रवेष्टोदो रित्यमरः ॥ २६ ॥

शोणांगशोभं शरदिन्दुकान्त्या गिरा परीरंभितवामभागम्
कान्तं स्वरं मंजुलयेव मण्या वल्लयेव शालं नलिनं नलिन्या २७

पुनः कीदृशमित्याह "शोणेति" रक्तांगप्रभं तथा शरचन्द्रशोभया सरस्वत्या आलिंगितवामपार्श्वं कयाकमिव सुन्दरयामण्या स्वर्णमिव तथावलतयावृक्षमिव तथाकुमुदिन्या कमलमिव उपमानसमुच्चयोपमेयम् ॥ २७ ॥

सदा शरण्यं शरणागतानां शोकद्रुमारण्यहिरण्यवीर्यम् ।
हिरण्यगर्भं ददृशुः पुरस्तान्निधिं दरिद्रा इव देववाराः २८
इतिषड्भिः कुलकम् ॥

पुनः कीदृशमित्याह "सदेत्यार्धर्धेन" शरणं प्राप्तानां जनानां सदाशरण्यं शरणेसाधुं तथाशोकाएवद्रुमास्तेषां यदरण्यंवनं तद्दग्धुं हिरण्यवीर्यंदहनमिव हिरण्यं सर्ववीर्यरेतोस्ये ति हिरण्यरेताहुतभुग्दहनो हव्यवाहन इत्यमरः ॥ २८ ॥

अथो विधातुर्युगयत् सुरौघा स्साष्टाङ्गपातं प्रणिपेतुरंघ्रौ ।
इयद्विधैवं वत पातिताः स्म इतीवविज्ञापयितुं विरंचिम्
॥ २९ ॥

"अथोइति" अथदर्शनानंतरं देवसंघाः ब्रह्मणः पादे साष्टांगपातंयथास्यात्तथा युगपदेकदेवप्रणिपेतुः अतोग्रे वतो किंकर्त्तुमिव ब्रह्माणमितिविज्ञापयितु

मिव इतिकिं वयंदेवाः वनखेदे भहिपेषक्रत्वा एवममुनाप्रकारेणयथा ऽ व पतितास्तथा पातिताः स्मः। अष्टांगप्रणामस्तु कः पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा मनसा वचसा चेवप्रणामोष्टांगईरित इति युगपदेकदेत्यव्यय वर्गे ऽमरः ॥ २८ ॥

स्पृहामहे स्वोपचितिं पुन स्ते चिप्रं समुत्तस्थु रितीव देवाः।
वद्ध्वांऽजली नर्थवतीं विधातुःस्तु तिं प्रसादाय समारभन्त ३० ॥

अथोत्तस्थुरित्यप्युत्प्रेचयाह "स्पृहेति" तेदेवाः पुनर्निपातानन्तरं इतीव शी घ्रं समुत्तस्थुः उत्थितवंतः इतिकिं हेधातः पुनरपिवयं स्वस्यात्मनउपचितिं वृद्धिं स्पृहामहेवांच्छामः यथाऽवपतितुा पुन रुत्थिता इतिभावः अवपतनो त्थानाभ्यामेवतैः स्वदुःखं प्रयोजनंच दर्शितमितिसूचितम् अथच अंजलीन् बद्ध्वा ब्रह्मणः प्रसादार्थं अर्थवतींस्तुतिं सम्यक् आरभंत तौयुतावंजलिः पुमा- नित्यमरः ॥ २० ॥

अयोनिज स्त्वं खलु विश्वयोनि र्योनित्य मानंदयुरेव स त्वम्।
सर्वेषु भूतेषु विभुः स्वयंभूः शंभुः स्वभू र्वा भवतो न चान्यो २१

स्तुतिमाह "अयोनिजइति" खल्वितिप्रसिद्धमेतत् हेधातः त्वमस्यविश्वस्य योनिः कारणमसि ननुमेपिकारणमस्तिनवेत्यतआह त्वं तुअयोनिजः कारणांत रविहीनः तत्रापिकारणांतरकल्पने अनवस्थादोष प्रसंगात् अथकुतइत्यतआह यः परमात्मानित्यमानन्दयुः आनन्दोह्ययंब्रह्मेति श्रुतिभिर्गीयते सत्वमेवासि तथा सर्वेषुपृथिव्यादिषु पंचमहाभूतेषु विभुर्व्यापकोऽसि तथास्वयमेवभवती तिस्वयंभूः त्वमसि नन्वीदृशोशंभुविष्णु किंनस्तइत्यतआह शंभुः शिवः स

भूर्विष्णुर्वाभवतस्त्वत्तः अन्योऽतिरिक्तोनस्तः तुद्रूपाविवेतार्थः योनिर्हृयोरा करेसा त्कारयेम मेन्दिर इतिविश्वः सदादानंदसुरानन्द इत्यमरः ॥ २१ ॥

उज्जृम्भते त्वत्त इदं हि सर्वं स्थेमानमासाद्य तत स्चकास्ति विलीयते त्व य्यथ विश्वनाथ स्फुलिंगसंघात इवाग्निमध्ये ३२

"उज्जृंभतइति" हे विश्वनाथ जगदीश इदं सर्वं नामरूपात्मकं जगत् त्वत्त एव उज्जृंभते उदयंप्राप्नोति जायतइतियावत् ततउत्पत्यनंतरंच त्वत्तएवस्थे मानंस्थितिमासाद्य प्राप्यचकास्ति शोभते स्वरूव्यवहारंकर्त्तुंक्षमत इत्यर्थः अथचमहाप्रलये सति त्वय्येवविलीयते लयंप्रयाति कस्मिन्कइव अग्निमध्ये स्फुलिंगानामग्निकणानांसंघातः समूहइव यथास्फुलिंगाअग्नित एव प्रादुर्भ वन्ति अग्नावेव तिष्टन्ति तस्मिन्नेव लीयंते तद्वदित्यर्थःयतोवाइमानिभूतानिजा यंते येन जातानिजीवंति यत्प्रयंत्यभिसंविशंतीतिश्रुतेः त्रिषुस्फुलिंगोग्निकण इत्यमरः ॥ ३२ ॥

अनुत्तम स्त्वं तमसः परस्तात् सदा सदभ्यासजुषां पुरस्तात् विराजसे त्वं सकलोपरिष्टा त्पाता सि निष्टा न्निखिला नधस्तात् ॥ ३३ ॥

तटस्थलक्षणमुक्त्वासंप्रतिस्वरूपलक्षणमाह "अनुत्तमइति" हेधातस्त्वं अनु त्तमोसि नास्ति उत्तमः उत्कृष्टः कोऽपियस्मात् तथा तमसोऽज्ञानात् परस्तात् परोऽसि नन्वेताहृश्यमे त्तर्हि कथंलभ्यइत्याह सदभ्यासं जुषंते सेवंते योगाभ्यासनि रताइत्यर्थः तेषांसदेवपुरस्तादग्रेऽसि तैर्हृदियाप्तोसीत्यर्थः तथात्वं सकलानां दे वादीनां लोकानां वा उपरिष्टात् उपरि विराजसे एवंभूतोपिजनान् नोपेक्षसइ

त्याहुः अधस्ताद्भुवनेषुनिष्टान् स्थितान् सकलानमरादीन् जनान् पातासि रक्षितासि परस्तादित्यादयो निपाताश्चाधवः ॥ ३३ ॥

सहस्रपत्त्राननमुज्ज्वलं त्वा मरालगं भोगिपतिं श्रुतिज्ञम्।
क्षमाधरं गूढपदं ह्यनंतं प्राहुर्मुनीन्द्रा जगतोऽस्य शेषम् ३४

"सहस्रेति" हेब्रह्मन् त्वात्वां मुनींद्राः अस्यजगतः शेषमाहुः रुपंति महाप्रलयेपिसत्वात् कीदृशंत्वां सहस्रपत्रंकमलं तद्वदाननंमुखंयस्य तथा उज्वलंप्रकाशमानं तथामरालेनहंसेनगच्छतिइति सतं हंसवाहनमिति तथाभोगःशरीरंविद्यतेयेषांतेषांशरीरिणांपतिंस्वामिनं प्रजापतित्वात् तथाश्रुतिज्ञं वेदतत्त्वार्थविदमित्यर्थः तथाक्षमांक्षांतिंपृथ्वींवा धरतीतितं तथागूढं पदंस्थानं यस्य तं तथा ह्रीतिनिश्चये अनंतं अंतस्त्रिविधपरिच्छेदस्तेनशून्यमित्यर्थः तथोक्तं नव्यापित्वा हेशतोऽतो नित्यत्वान्नापिकालतः नवस्तुतोपिसार्वात्म्यादानंत्यं ब्रह्मणित्रिधेति अथ द्वितीयोऽर्थः तत्रत्वामितिच्छेदः मुनींद्राः त्वांअस्यजगतः शेषनागंप्राहुः सर्वाधारभूतत्वात् कीदृशंशेषं सहस्रसंख्याकानि पत्रवदाननानि यस्य तं तथाउज्वलं विशदं तथामरालंकुटिलंगच्छतीति तं जिह्मगत्वात् तथाभोगः फणाविद्यते येषां तेषांसर्पाणांपतिं तथाश्रुतिज्ञमितितुल्यं यद्वाश्रुतिज्ञम् .रेकार्थकत्वात् श्राह क् श्रुतिरूपे कर्णरूपे च दृशौ यस्य चक्षुःश्रवस्त्वात् तथाक्षमापृथ्वीं धरतीति तं तथागूढानि अदृश्यानिपदानिचरणानि यस्य तं तथाअनंताख्यं महत्वान्नविद्यते अंतोयस्येत्यर्थः । उज्ज्वलंत्वविकासिनि शृंगारे विशदे दीप्ते पीति हैमः भोगः सुखे धने पुंसि शरीरफणयोर्मत इतिच क्षितिक्षांत्योः क्षमेत्यमरः पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वितिच अनंतः केशवे शेषे पुमान्निरवधौत्रिष्विति मेदनी अत्रप्रकृतश्लेषालंकारः ॥ ३४ ॥

कारुण्यसर्पिःसदृशांमनस्त्वं ना स्मासु कस्मात्प्रहिनोषि कामम्
संपालनीया अपि संतुमंतः पुत्राहि पित्रेति जनानुवादः ३५॥

इतिस्तुत्वातंप्रार्थयंति "कारुण्येति" हेब्रह्मन् कारुण्यं कृपैव सर्पिः घृतंतेन मसृणंस्निग्धं मनः अस्मासु दुःखितेषुदेवेषु कस्माद्धेतोःकामंस्वैरयथास्यात्तथा न प्रहिणोषि नप्रेरयसि अत्रलौकिकसंमतिमाहुःहियतःइतिजनानामनुवादःपरंपरागवादोस्ति इतिकिं मंतुमंतः मपराधिनोपिपुत्राः पित्रासंपालनीयाएवभवंतीतिघृतमाज्यंहविःसर्पिरित्यमरः चिक्कणं मसृणं स्निग्धइतिच आगोऽपराधोमंतुश्चेतिच ॥ ३५ ॥

आकर्ण्य ताः कर्णपथा यथावत् सरस्वतः सारवतीः सुराणाम्
निजाशये ऽसौ करुणासमुद्रे ऽतिथीचकारारमुदारचेताः ३६।

"आकर्णेति" असौउदारचेताःब्रह्मादेवानांताःसरस्वतीःगिरःनदीश्च कर्णयोःपथामार्गेण यथावत् आकर्ण्यश्रुत्वा करुणायाः दयाया समुद्ररूपेनिजाशये स्वहृदि अरमत्यर्थं अतिथीचकार विचारयामासेत्यर्थःकीदृशीःगिरःनदीश्च सारवतीःन्यायान्वितीःजलवतीश्च श्लेषमूलकरूपकालंकारोयं सरस्वतीसरिद्भिदि वाच्यापगायां चोरले गोवाग्देवतयो रपीतिहैमः सारो बले मज्जनिच स्थिरांशे न्याये च धनेचसारमितिविश्वः आशयः स्यादभिप्रायेमानसाधारयोरपीति मेदिनी ॥ ३६ ॥

बभाण भूयस्तिरयं स्तमिस्रं रदावलीनां घृणिभि र्घृणीताम्
व्युपत्ततिं चोपरतां विनद्य प्रोच्चैस्तडित्वानिव चातका-
लिम् ॥ ३७ ॥

"बभाणेति" सः घृणी दयालुर्ब्रह्मा भूयः पुनः विनद्यहत्युच्चा उपरतांमूकोभूतां तांसुमर्दादेवानां ततिंपक्तिं बभाणजगाद किंकुर्वन् दंतपंक्तीनां किरणैः तमिस्रंअंधकारं देवानां भयंवातिरस्कुर्वन्सन् कांकइव विनद्योपरतांचातकपंक्तिं प्रोच्चैर्मेघइव तडित्वान्वारिदोंबुभृदित्यमरः ॥ ३७ ॥

मूकत्वभाक्त्रिषु चापरेषु गुणश्रदाऽऽस्यं व्यलसत्तदैकम्
एकं चतुर्णां त्रिषु निद्रितेषु गुंजद्द्विरेफं विकचं यथाऽब्जम् ३८

"मूकत्वेति" तदा तस्मिन्काले अपरेषु त्रिषु मुखेषु मूकत्वं मौनं भजंतीति तथा तेषु सत्सु अथ च एकं तस्य ब्रह्मणः आस्यं मुखं व्यलसत् शुशुभे कथं यथा चतुर्णां कमलानां मध्ये त्रिषु निद्रितेषु सुप्तेषु सत्सु एकं चतुर्थं अब्जं कमलं विकचं विकसितं सत् गुंजद्द्विरेफं शब्दायमानभ्रमरं स्यात् तद्वदित्यर्थः अत्र निद्रितकमलत्रयेण मौनिभाक्वक्त्रत्रयसाम्यं शब्दायमानभ्रमरेण विकचकमलेनैकेन चतुष्टये एकवक्त्रसाम्यम् ॥ ३८ ॥

स्वर्गांसदाः स्वागतमस्तु यूयं निषीदताऽमीषु महासनेषु।
निदेशमादाय ततो निविष्टाः स्रष्ट्रा स्मितेनेति पुनश्च दृष्टाः
॥ ३९ ॥

किं बभाषेत्याह "स्वर्गांसदा इति" हे देवाः वः स्वागतमस्तु यूयमत्र अमीषु महासनेषु तिष्ठत तत इति धातुराज्ञां गृहीत्वा स्थितास्ते देवाः धात्रा ईषद्धासेन कृत्वा पुनः दृष्टाः समनाक्स्मितमित्यमरः तदुक्तं ईषद्विकसितैर्दंतैः कटाक्षैः सौष्टवांचितं अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेदिति ॥ ३९ ॥

कस्मादजस्रस्रवदस्रुजालं सहस्रमक्ष्णां द्युपते रभीक्ष्णम्।
प्रत्येकपत्रं हिमबिन्दुभाजः सहस्रपत्रस्य बिभां बिभर्त्ति ४० ॥

किं दृष्टा इत्याह "कस्मादिति" द्युपतेः इन्द्रस्य निरंतरं स्रवदंबुसमूहं नेत्राणां सहस्रं कस्मात् सहस्रपत्रस्य पद्मस्य शोभां दधाति कीदृशस्य पद्मस्य

भीक्ष्णंनिरन्तरं एकमेकंपत्रं प्रतितुषारविन्दुसेविनः कस्मादिन्द्रोरोदितीतिभाव: पत्र सहस्रपत्रेण सहस्राक्षिसाम्यं तन्नतहिमविन्दुभिसनेत्रांबुसाम्यं सहस्रपत्र कमलमित्यमरः ॥ ४० ॥

प्रियंकरा न्वः खलु यायजूका न्कञ्चिद्विनिघ्नं ति न दन्द शूकाः
कच्चित्कुतर्कैर्भुवि वावदूकाः कुर्वंति वेदान्तविदो न मूकान् ४१

"प्रियंकरानिति" कच्चिदितिप्रश्ने वोयुष्माकं प्रियंकरान् यज्ञकरणशीलान् दुष्टाः न विनिघ्नंतियज्ञविघ्नं न कुर्वंतीत्यर्थः कच्चिच भुविपृथिव्यां वादकरणशीला नास्तिकाः कुत्सितैस्तर्कैरनिष्टप्रसंगैः वेदांतशास्त्रज्ञान् मूकान् न कुर्वंति पुनः पुनर्भृशंवायजतेइतियायजूकः क्रियासमभिहारेइतियङ् यजजपदशांयङ इत्यूकप्रत्ययः दंदशूकइत्यत्र जपजभेत्यनुस्वारः कुर्वादिषुपाठाद्देरूकः इति वावदूकः दंदशूकस्तुपुल्लिंगो राक्षसे च सरीसृपे इति मेदिनी वावदूकोऽति वक्तरीत्यमरः ॥ ४१ ॥

कच्चि त्तपस्यत्यऽधिरुह्य सानु नै न्द्रं पदं धर्षितु मिन्द्रशत्रुः।
शतेष्टिभिः कश्चन यष्टु कामः करोति भूयः
शतमन्यु मन्यु म् ॥ ४२ ॥

"कच्चिदिति" कश्चदिंद्रस्यशत्रुर्दैत्यः इंद्रस्येदमैंद्रं पदंस्वर्गं धर्षितुं आक्रमितु गिरिशिखरमारुह्य तपो न करोति अथकश्चनभूयःशतसंख्याकाऽश्वमेधाख्ययज्ञैर्यष्टुमिच्छुः शतमन्योरिंद्रस्य मन्युं शोकंक्रोधंवा न करोति कच्चिदिनिघ्नंतिनेत्यादौ काक्वैवार्थप्रतिपत्तिः तपसःतीतिनामधातुःकरणेचेतियः प्रत्ययः ऐंद्रमिति तस्येदमित्यण् तुं काममनसोरपीतियनिपरतुमोमलोपः इष्टिर्मताऽभिलाषेपिसंपदृशोकयोः क्रतावितिहैमः मन्युर्दैन्येक्रतौक्रुधीति च ॥ ४२ ॥

इत्यादिवाग्भि र्विविधाऽनुयुक्तो विचिंतयामाससदेवसंघ: ।
शर्मैव वाच्यं परिपृच्छतो ऽग्रे ना ऽलीकवा क्वापि
रुदीरितव्या ॥ ४३ ॥

"इत्यादीति" इतिपूर्वोक्तादिभिः पृच्छावाग्भिः सदेवसंघः ब्रह्मणापृष्टः स्वचितेनेति विचिंतयामास इतिकिं परिपृच्छतः पुरुषस्याग्रेपृष्टैर्जनैः कल्याण मेववक्तव्यं अथ च सत्पुरुषैः असत्यवागपिनवक्तव्या अयंभावः यदिवयंस्वदुःखं ब्रूमः तर्हिपृष्टेनशर्मैववाच्यमितिशिष्टाचारविरोधः चेत्कल्याणंब्रूमः तर्हिमिथ्या वाणीवक्तृतादोषः अनुपूर्वकयुजिधातोः पृच्छार्थः प्रश्नोनुयोगः पृच्छापेत्यम रात् अलीकमप्रियेपिस्यादिव्येऽसत्ये नपुंसकमितिः मेदिनी ॥ ४३ ॥

इतिद्विधासंशयवृत्तिच्छित्त्यै सुखं च दुःखं क्रमतो निबद्ध: ।
शमैव धात र्भवदीक्षणे न: क्व तिग्मरश्मा वुदिते तमिस्र ४४

"इतीति" इतिद्विविधसंशयवृत्तेश्छेदनाय क्रमेणसुखंदुःखं च ऊचुः कथमूचु रित्याह हेधातःतवदर्शनेसतिनोऽस्माकंकल्याणमेव यतः सूर्ये उदिते सति तमः क्वभवति काक्वान कुत्रापीत्यर्थः अयंभावः त्वद्दर्शनेनैवास्माकंकल्याणंजातं परि शेषात्पूर्वंतु दुःखमेवासीदितिवुध्यते अतएवतुल्योयंदृष्टान्तः सूर्योदयात्प्राक् तमोभवति उदितेतु नष्टं भवति तद्वदित्यर्थः क्रमत इति सार्वविभक्तिकस्तसि रितितृतीयार्थे पंचम्यर्थेवातसि प्रत्ययः अर्थांतरन्यासालंकारः ॥ ४४ ॥

जानासि सर्वं जगतां हृदिस्थं तथापि यत्पृच्छसि तत्कृपैव
ब्रूमो वयं तन्महिषो दुरात्मा सर्वां स्तृणीकृत्य दधोढि
सोऽस्मान् ॥ ४५ ॥

पूर्वस्मिन्पद्येगूढं स्वदुःखंनिवेदितं संप्रतिस्पष्टमाहुः "जानासीति" हेधामः त्वंजगतांहृदिगतं सर्वमेवजानासि अतोनास्मत्कथनापेक्षेतिध्वनिः तथापिसत्य पिसर्वज्ञत्वे यद्यस्मान्नः अस्मान् पृच्छसि तत्तस्मात् त्वत्कृपैवेति विद्मः तत्तस्मा त्कारणाद्वयंब्रूमः स्वाभिप्रायंनिवेदयामः किं समहिषोनामदुष्टचित्तः दैत्यः अ स्मान्सर्वान् तृणीकृत्य तुच्छीकृत्य तृणेढिहिनस्ति यद्वा तृणीकृतत्र घासीकृतत्र महिषस्यघासाशित्वात् हृदिस्थमत्रसप्तम्याः क्वाचित्कत्वादलुक् हिंसार्थतृहिधा तोर्लटिरूपंतृणेढीति ॥ ४५ ॥

पक्षच्छिदा मिन्द्रकृता मित्रा सो संस्मृत्य सामर्षतयांऽजनाद्रिः रंभासुरात्प्राप्य जनिं स दंभीजंभद्विषे द्वेष्टि तुरंगवक्त्रः ४६ ॥

स्वयमेवतद्दुःखदानेहेतुं तर्कयन्ति "पक्षच्छिदामिति" असौमहिषः पूर्वजन्म न्यंऽजनाद्रिरभूदितिविद्मः तस्य स्ववर्षाकृतित्वात् स च इंद्रेणकृतां पक्षाणांच्छिदां छेदनं संस्मृतत्र अत्र च अमर्षेणक्रोधेनसहवर्त्तमानः सामर्षः तस्यभावस्तत्ता तया ततोजातक्रोधेनेत्यर्थः रंभनाम्नोऽसुरात् जन्मप्राप्य समहिषोभूत्वा जंभद्वि षेइंद्राय द्वेष्टि द्वेषंकरोति क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपस्तत्रचतुर्थीतिजंभ द्विषेइत्यत्रद्वितीयार्थेचतुर्थी ॥ ४६ ॥

कुप्यन्सदयाये व हयारि स्त्वै वंयापराद्ध्यं स हरिं दुनोति ।
नामा ऽपि जागर्त्ति हि यत्र शत्रो स्तेजस्विनस्तं कतमे सहन्ते ॥ ४७ ॥

अत्रैवान्यत्तर्कयंति कुप्यन्निति "सदयस्त्वमरि". महिषः हयायकुप्यन्नित्यद्य यापरयाध्यायंहरिमिंद्रंदुनोतिदुःखाकरोति हियतः यत्रयस्मिन्नर्ये शत्रोर्नामापि जागर्ति प्रकाशते तं कतमेके तेजस्विनः सहंते न केपीत्यर्थः यमानिलेंद्रचंद्रार्कवि ष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिर्नाकपिले त्रिष्विति विश्वः ॥ ४७ ॥

अहो महोभिः प्रकरोति हीनं स सप्तसप्तिं हृदि जातमन्युः।
अमित्रमाश्रित्य हि वर्तमानमपीह मित्रं कुरुता द्रियंते ४८।

"अहोइति" आश्चर्यं समहिषः सप्तसप्तयोहयाः यस्य तितं सूर्यमहोभिस्तेजोभि हीनं प्रकरोति अत्रहेतुः हृदिजातोमन्युः क्रोधोयस्य अच्छत्रुमाश्रितोयमिति क्रोधबीजं हियतः इहलोकेस्वशत्रुमाश्रित्य वर्तमानंमित्रं सुहृदमपिकेऽपाद्रियं ते नकेपोत्यर्थः तथामित्रं सूर्यमपीतिश्लेषेणप्रस्तुतेपियोज्यम् मित्रं सुहृदि नद्ध योः सूर्येपुंसीतिमेदिनी ॥ ४८ ॥

हानिं स्वकीयामिव मन्यमानो दुनोति कालं महिषाधिरूढम्
स केवलं पुण्यजनेश्वितारं घ्नात न दुःखाकुरुते ऽनुकूलम् ४९ ॥

"हानिमिति" समहिषः कालंयमं महिषाधिरूढं वीक्ष्य स्वकीयां हानिमिव मन्यमानः दुनोति मत्स्वदृशोयमारूढोयमितिहानिः हेधातः समहिषः केवलं पुण्यजनानां रक्षसांईश्वितारंनैर्ऋतं न दुःखाकुरुते अत्रहेतुः अनुकूलमितिस्व सदृशप्रकृतित्वात् अथ च पुण्यंपवित्रं जनंसर्वोपिकांक्षते किं पुनस्तदीश्वमिति ध्वनिः दुःखात्प्रतिलोम्येइतिडाच्प्रत्ययः यातुधानः पुण्यजनोनैर्ऋतेयातुरक्ष सी इत्यमरः अथपुण्यजनो यक्षे राक्षसे सज्जनेपिचेति मेदिनी ॥ ४९ ॥

चक्रं हरेः कुण्ठितमस्य कंठेऽकिंचित्करं शांकरशूलमासीत्
उर्ये द्रुवज्राहतविग्रहोऽसौ वेलाहतेभस्य बिभां बभार ॥ ५० ॥

ननुविष्णुादयस्तंकिं न जघ्नुरित्याहुः "चक्रमिति" अस्यमहिषस्यकंठेहरे विष्णोश्चक्रं सुदर्शनाख्यं कुंठितमासीत् प्रत्युत तदेवलग्नंसत्कुंठितमभूत्किंपुन र्निकृंतनवार्तेतिभावः तथाशंकरस्यशूलमपि अकिंचित्करमासीत् अस्यकंठेन

विं चिलूतवदितर्थः तथा असौ उग्रेयेंद्रवज्रेणआहतशरीरः वैरेणाहतसग्गज
सर शोभां दधार यथावेत्राइतोगजोनकिंचिदुनोति तथासोपीतर्थः शरीरंव
र्पविग्रहइतामरः अत्रेंद्रवज्राहत समासौ इंद्रवज्रेतिहत्तनामापि सूचितम्
उपजातीनामपितद्भेदत्वात्तत्वेव ॥ ५० ॥

स वरुणं करुणं कृतवा न्रणे सधनदं च जिगाय धनंजयम्।
वसुगणं तृणकल्प मजीगणा द्भय मथो मरुतो मरुतोयवत् ५१

"सइति" समहिषः युद्धे वरुणं करुणंदीनं कृतवान् कुवेरेण सहितंवन्हिंच
जिगाय अजयत् वसुगणंवस्वष्टकं तृणतुल्यं अजीगणत् गणयामास अथवा
युतोयत् भयंतत् मरुभूमौ यत्तोयं तद्वद्गणयामास यथा मरुभूमौ तोयं न भवति
तथा वायुतोपि भयंतस्यनाभूदितर्थःसलिटौर्जैरिति कुत्वेजिगायेति ईषत्परि
समाप्तौकल्पइतितृणकल्पः गणधातोरा्ररादौलुङि रूपंअजीगणदिति अत्रां
तयमकालंकारः द्रुतविलंवितंहत्तम् ॥ ५१ ॥

इतिनिखिलसुरान्विजित्य संख्ये त्रिदशपुरे पुरुहूततामितोसौ
अधिकृति मधितिष्ठति द्युराजो भ्यवहरति स्वय मेव यज्ञ
भागान् ॥ ५२ ॥

"इतीति" इत्यमुनाप्रकारेण असौमहिषः सर्वदेवान् युद्धे जित्वा स्वर्गेइन्द्रतां
प्राप्तोस्ति अथचद्दिविराजते इतिद्युराडिन्द्रःतस्याधिकारं अधितिष्ठति यस्मेव
हि यज्ञभागान् पुरोडाशादीन् अभ्यवहरति खादति अधिशीङ्स्थासांकर्मेतत्र
धिकृतीहितोया अभ्यवोपसर्गपूर्वकहृञोभक्षणार्थः पुष्पिताग्राहत्तम् ॥ ५२ ॥

भुवि विकीर्णसुतोरणभूषणा परजनैः कृतधर्षणदूषणा
पति मृते परवत्यमरावती मणिनिपातमिषा
त्परिरोदिति ॥ ५३ ॥

"भुवीति" अमरावती अमरपुरी पतिं इन्द्रं ऋते विना परवती पराधीनास ती मणीनां योनिपातः तस्य मिषात् व्याजात् परि रोदिती कीदृशी भुविविकी र्णानि सुतोरणरूपाणि भूषणानि यस्यास्सा तथा परजनैः कृतं धर्षणमेव दूष णं यस्यास्सा अत्र अत्रामरावत्याः स्त्रीरूपता वर्णिता यथापतिं विनास्त्री विकी र्णभूषणा सती परजनैर्धर्षिता सती रोदिति तद्वदित्यर्थः पतिमितिऋतेयोगे द्वितीया अत्र न स मणिनिपातः किं त्वश्रुपातः इतिमिषपदेन तद्धर्मापह्नवप्र तीतेः कैतवापह्नुतिरलंकारः ॥ ५३ ॥

अनुसव तरुणीभिः क्रीडतेऽसौ सुराणां
सुरतरुसुमनोभि र्मोदते नंदने च
दनुसुतनिकुरंबैःसेव्यते कोटिसंख्यै
स्त्रिभुवनजयलक्ष्म्या स्तद्विषाणद्वयी हाः ॥ ५४ ॥

"अनुसवमिति" असौ महिषः सवं सवं प्रतिदेवानां कामिनीभिः अप्सरोभिः सह क्रीडांकरोति अथचपरिजनादि सुरतरूणां पुष्पैः नन्दने देवारामे मोदते अथतत्रक्रीडमानोभवद्भिर्हन्तव्य इत्यतआहुः दनुसुतानां दानवानांनिकुरंबैः समूहैः कोटिसंख्यैः असंख्यातैरित्यर्थः सः सेव्यते अतोनाक्रमणावकाशः न केवलं तेषामेव बलं सोऽवलंबते किंतु स्वयमपि बलीत्याहुः त्रिभुवनस्य या जय लक्ष्मी साहाः हाररूपा तस्यविषाणयोः शृंगयोर्द्वयमस्तिशृंगद्वये नैव त्रि लोकीतेनजितेतिभावः स्यात्त्रिषुविषाणंस्यात्पशुशृंगेभदंतयोरित्यमरः मालि नीछन्दः ॥ ५४ ॥

अस्मिन्दुःखांबुधौ नो निपततइतिकर्त्तव्यतावीतबुद्धीन्
प्राणेभ्योधौतहस्ता न्हरहर करुणा वीक्ष्य न त्वांकयाद्वि
इंहो नाथ प्रकालो जलचरयमितानेकयोद्धारधीर
श्रीनाथस्फीतकीर्त्तिप्रतिभटउदितो न त्वयो
पेक्षणीयः ॥ ५५ ॥

:अस्मिन्निति हेनाथ अस्मिन्दुः खरूपेसमुद्रे नितपतः पतमानान् तथा इतिकर्तव्यतयावीतारहिता बुद्धिर्येषांतान् तथाप्राणेभ्योपिधौता हस्तायैस्तान् प्राथनाद्यारहिता नितरार्थः ईदृशान् नः अस्मान्वीक्ष्य हरहरेतिखेदे त्वांकरुणान करोषि नाहयोति इतिकाकुः अवश्योमवर्तव्यतांयोसयंति इंहोइतिआश्चर्ये हेनाथ एवकालस्त्वयानोपे क्षणी यः कालानरप्रतिकर्तव्यता ऽसहत्वात् यदएवकालः जलचरेणग्राहेण यमितो बद्धोयो ऽनेकयोगजलसरोद्धारेधीरः सावधानोयःश्रीनाथ विख्यातत्रयास्फीता हृद्धिंप्रामाकीर्तिस्तस्याः प्रतिभटः सदृशः उदितः ययायाइग्रस्तस्य गजसरोद्धारो झटतिहरिणाऽकारितथा ऽस्माकं त्वयापीतिभावः ॥ ५५ ॥

द्रुहिण हणू तदेनं केश्च दृश्चै रुपायै
करुणसुरगणो स्मिन्धे हि कारुणदृष्टिम्
इति करुणगिर स्ता स्तूर्णमाकर्ण्य वेधा
नियतपरिकरो भूदुत्तराया च्छमेधाः ॥ ५६ ॥

इतितंवर्णयितास्वप्रयोजनमाहः द्रुहिणेति हेद्रुहिणेतियुक्तं संबोधनं द्रुह्यतिदुष्टेभ्य इतिनिर्वचनात् हेदुष्टघातकधातः ततस्मात् एतेमहिषकेयित् उच्चैरुत्कृष्टैः उपायैः जणुजहि करुणैदीनैदेवगणेच अस्मिन् कृपादृष्टिं धेहि धारय सर्वधाः अतो इतितेषांदीनागिरः श्रुत्वातूर्णंशीघ्रं उत्तरायउत्तरदानार्थं

नियतः बद्धः परिकरोयेनताहृशोऽभूत् कीहृशोवेधाः स्वच्छानिर्मलामेधाबुद्धिर्यं स्येतिसः प्रजामेधयोरित्यसुगागमः छाहिंसायामित्यस्मादिगचेलोटिमध्य पुरुषैकवचनं धीर्धारणावतीमेधेत्यमरः ॥ ५६ ॥

श्रीमाञ्छंभोश्चरणसदनोभूतहृच्छंभुनाथोलक्ष्मीनाथंकविपरिवृढं देशकोऽसूतयंमाम् तेनोद्गीते महिपनिधनेगीतलक्ष्माचरित्रे लक्ष्मीकाव्ये विरतिमगमत्सर्गआद्यःशुभंयुः
इतिलक्ष्मीकाव्ये प्रथमः सर्गः

अथकविः स्वजनकनामवर्णनपूर्वकंसर्गमुपसंहरति श्रीमानिति यंमांलक्ष्मीनाथाभिधंश्रीमान् शंभुनाथः श्रीशंभुनाथस्तार्थः असूतजनयामास कीदृशंमांकवयः परिवृढानायकायस्यकवीनांशिषामितार्थः गौणोप्ययंसमासः नतुविवक्षितत्वात् मुख्यः कविपरिवृढामितितुमुख्योपिमविवक्षितत्वाद्गौणः अन्यथास्वाभिमतिद्योतयति कीदृशः श्रीशंभुनाथः शंभोः शिवस्यचरणयोः सदनीभूतं हृत्मनोयस्यसः तथादेशकः उपदेशकर्तागुरुरितियावत् तेनलक्ष्मीनाथेनउद्गीते लक्ष्मीकाव्येशुभंयुः शुभान्वितः प्रथमःसर्गः विरतिंसमाप्तिं अगमत्प्रापः कीदृशेलक्ष्मीकाव्ये गीतंलक्ष्म्या महालक्ष्म्याश्चरित्रंयस्मिन् तथामहिषनिधनेतत्परासाख्या अभिधानंयस्यतस्मिन् अहंशुभमितिमांतमव्ययं अहंशुभमोर्युसइतिशुभंयु अधिभूर्नायकोनेताप्रभुः परिवृढोधिपइत्यमरः शुभंयुः स्याच्छुभान्वितइतिच अस्तोपिश्रीशब्दपूर्वकं निजगुरुस्मरणं मंगलाचरणंद्योतयति यथाहभगवान्भाष्यकाराः मंगलादीनिमंगलमध्यानि मंगलान्तानिशास्त्राणि प्रथंतेवीरपुरुषाण्यायुष्मत्पुरुषाणिच भवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति मन्दाक्रांताछन्दः मन्दाक्रांताजलधिषडगैर्म्भौनतौताद्गुरूचेदितिलक्षणात् सर्गान्तत्वादवृत्तानांभेदः यथाहदंडीसर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः सर्वत्रभिन्नसर्गान्तैरुपेतंलोकरंजकमिति एवमुत्तरत्रापिबोध्यम् ॥ ५७ ॥

इतिश्रीमच्छंभुनाथात्मज लक्ष्मीनाथकृतायां लक्ष्मीकाव्यव्याख्यायां
** प्रथमः सर्गः **

ॐ नमः श्रियै

य इह देवा भणथ तथैव नाऽन्यथा तत्
जानामि स्वयमपि तं व्यथावदान्यम्।
पूर्वं हि स्मररिपुणा मया बलीयान्
विज्ञातो युधि हरिणा युयुत्सुना च ॥ १ ॥

ॐ नमो विघ्नहर्त्रे अथ किमुत रचितवानित्यपेक्षायां महिषोत्पत्तिरूपं द्वितीयसर्गं निर्मातुं बीजमाह "यद्देवा इति" हे देवाः यत् यूयं भणथ गदथ तत्तथैव सत्यमेव अन्यथा असत्यं नास्ति उभयथाप्यैकार्थ्यं प्रतिपादनं सत्यौत्कर्ष्यज्ञापनाय अत्र स्वदृष्टप्रमाणमाह स्वयमपि तं महिषं व्यथायाः पीडायाः वदान्यं बहुप्रदं जानामि हि यतः पूर्वं युधि युद्धे वर्तमाने तेन सह युयुत्सुना युद्धं कर्तुमिच्छता स्मररिपुणा शिवेन तथा मया ब्रह्मणा हरिणा विष्णुना च बलीयान् अतिशयबलयुक्तो विज्ञातः अत्र तत्करविकाभिधाने कर्मकारकेतृतीया बलशब्दादातिशयार्थे ईयसुः सु वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे इत्यमरः अस्मिन्सर्गे प्रहर्षिणीवृत्तं म्नौज्रौगस्त्रिदशयतिः प्रहर्षणीयमिति लक्षणात् ॥ १ ॥

अत्रेमं शृणुत पुरातनेतिहासं
सर्वान्वो व्यथयति येन हेतुनासौ।
नोवध्यो भवति यथा मृधे भवद्भिः
शक्राद्यैरपि हरिशूलभृत्समेतैः ॥ २ ॥

अथ पुरावृत्तमवतारयति "अत्रेति" अस्मिन्नेवार्थे इमं वर्ण्यमानं पुरातनं इतिहासं पुरावृत्तं शृणुत श्रावणे हेतुमाह येन हेतुना असौ महिषो वो युष्मान् व्यथयति यथा येन हेतुना च विष्णुशिवयुक्तैरपि इन्द्राद्यैः भवद्भिर्देवैः स मृधे युद्धे वध्यः हननीयो न भवति इतिहासः पुरावृत्त मित्यमरः ॥ २ ॥

द्वा वास्तां दनुतनयौ तयो स्तु रंभो
ज्येष्टोऽभू दथ च कनिष्टतः करंभः।
तौ द्वाव प्यथ चिरतो पि लेभतु र्नो
संतानं मरु रिव सल्लताविताणम् ॥ ३ ॥

"द्वाविति" पूर्वं द्वौ दानवौ सहजावभूतां तयोर्मध्ये रंभनामा ज्येष्टो ऽभूत् अथ च कनिष्टः करंभनामाऽभूत् तौ द्वावपि चिरकालेनापि सन्तानं पुत्रोत्पत्तिं नलेभतुः अत्रदृष्टान्तमाह मरुर्निर्जलभूमिः सल्लतायाः वितानं विस्तृतिमिव क निष्टत इति प्रथमायां तसिः ॥ ३ ॥

तस्यार्थे निरशनताऽस्थि शेषदेहौ
संयम्य प्रबलचलाचलेंद्रियाणि।
निर्दिष्टं निजगुरुणा मनुं जपंतौ
तेपाते तनुरुहहर्षणं तपस्तौ ॥ ४ ॥

"तस्येति" तस्य संतानस्यार्थं निर्गतं अशन माहारो ययो स्तौ तयो र्भावः निरशनता तया अस्थिशेषो निर्मांसो देहो ययो स्तौ रोमहर्षणं तपस्तेपाते रचतुः तपश्चणे आत् चक्राते इतिवा पाठः कीदृशौ स्वगुरुणोपदिष्टं मनुं मंत्रं जपंतौ किं कृत्वाप्रबलानि प्रमाथीनि चंचलानि चेंद्रियाणि चक्षुरादीनि विषयेभ्योनि रुध्येत्यर्थः चलं लोलं चलाचलमित्यमरः ॥ ४ ॥

रंभो मालवटवने वृते च यक्षैः
पंचाग्नेः परिचरणेन शुष्ककायः।
आकंठं पयसि निमज्ज्य पांचनादे
संतेपे गलिततनुः करंभक स्च ॥ ५ ॥

"रंभइति" रंभस्तु यच्चैवं ते मालवटनाम्नि वने पंचाग्नेः सेवनेन शुष्ककायः सन् संतेपे करंभश्च पंचनदस्येदं पांचनादं तस्मिन् पयसिजले आकंठं कंठपर्यंतं निमज्ज्य गलिततनुः क्लिन्नदेहः सन् संतेपे क्वचिद्द्वयोरिति पांचनदे द्वयोर्दीर्घः करंभकरतिस्वार्थे कन् ॥ ५ ॥

तौ दृष्ट्वा तपसि रतौ बहुक्कालं
शंका भून्निजपदधर्षणे मघोनः
तंदेशं सपदि जगाम तौ निघांसु
र्हंतुं ना शक दुरु तेजसं स रम्भम् ॥ ६ ॥

"ताविति" तौरंभकरंभौ इत्थं बहुकालं तपसिरतौ दृष्ट्वामघोन इंद्रस्य नि जपदस्य स्वर्गस्य धर्षणे शंका अभूत् स्वर्गंधर्षितुमिमौ तपत इतिशंकाजाते त्यर्थः इतिनिश्चित्य तौहंतुमिच्छुः तंदेशं तयोस्तपःस्थानं शीघ्रंजगाम आदौरंभं प्रतिहंतुं अगामेत्याह स इंद्रः तंरंभंहंतुं नसमर्थोऽभूत् यतहेतुः उरुतेजसमिति तेजस्विनं पदभूं बहुलंबह्वित्यमरः ॥ ६ ॥

अंभोंत स्सु रु रथ दंभिचक्रवर्त्ती
ग्राहत्वं निजवपुषो विधाय यत्नात्
पद्भ्याहं तमथ करम्भकं गृहीत्वा
हंतिस्म द्विप इव पादपं पयःस्थम् ॥ ७ ॥

"अंभोन्तरिति" सुरुः पुनः रंभं त्यक्त्वा करंभनाशाय अंभोंतर्जलमध्ये स इन्द्रः दांभिकेषु चक्रवर्त्ती महादांभिक इत्यर्थः स्वशरीरस्य ग्राहत्वंजलजीव विशेषत्वं विधायकृत्वा ग्राहोभूत्वेत्यर्थःतं पयःस्थं करंभं पद्भ्याहं यथातथागृहीत्वा हंतिस्म

जघान कं क इव पयस्यं पादपंहच्चं द्विप इव समूलाद्धत जीवेपुष्टम् अभ्यर्थ्या यामिति यम् पदोपिजीवत्वान्नदोषः ॥ ७ ॥

तं नीत्वा यमसदनं दनो स्तनूजं
शोकेन स्वय मपि सोदरस्य मर्त्ता ।
रम्भो सा विति हृदि निश्चिकाय मायी
भूयो गात्तडिदिव खं तरु प्रदश्य ॥ ८ ॥

"तमिति" समायी इन्द्रः तंकरंभं यमसदनं नीत्वा हत्वेत्यर्थः हृदीति निश्चि काय निश्चयंप्राप इति किं असौ रंभोपि सहजस्य करंभस्य शोकेन स्वय मेवमर्त्ता मरिष्यति किं मम मारणेनेत्यर्थः भूयस्तदनंतरं तरुंप्रदश्र्याविद्युदिव आकाशं प्रतिजग्मिवान् ॥ ८ ॥

श्रुत्वा थो निजसहजं म्रतं स रंभो
दुःखार्त्तो व्यलपति गद्गदस्वरे ण ।
चित्तं मे दहति हि शोककृष्णवर्त्मा
धक्ष्यामि स्वय मिद मंग मग्निमध्ये ॥ ९ ॥

"श्रुत्वेति" अथ स रंभः स्वभ्रातरंमृतंश्रुत्वा दुःखेन आर्त्तः सन् गद्गदस्वरेण् यथाभवति तथा विललाप किंविललापेत्याह मेममचित्तं अयंशोकाग्निर्दहति अत इदमंगं स्वयमेवाग्निमध्ये धक्ष्यामि दग्धंकरिष्यामि वर्त्तमानसामीप्ये लृट् वह्निः यथाकृष्णवर्त्मेत्यमरः ॥ ९ ॥

मत्वेति स्वकनिधनायदानवेंद्रः
सवरेन स्वकचचयं करेण धृत्वा ।

खड्गं चाप्यपरकरेण तिग्मधारं
मूर्द्धानं ज्वलनले स होतु मैच्छत्

"मत्वेति" सदानवेंद्रः राक्षसः इति मत्वा निश्चित्य स्वकस्य स्वस्य स्वशिर सोवा निधनाय हननार्थं सव्येनवामेन करेण स्वकेशसमूहं गृहीत्वा अपरेण दक्षिणेन करेण च तीक्ष्णधारं खड्गं धृत्वा मस्तकं पुरतः जाज्वल्यमाने अग्नौ होतुं ऐच्छत् सुखशीर्षं जलेषुकमितिहैमः यातुधानः पुण्यजनो नैऋतिया तुरक्षसी इत्यमरः कचः केशः शिरोरुह इति च ॥ १० ॥

ग्रीवाया अतिथि मसिं चकार यावत्
प्रत्यक्षो भवदनलः क्षणेन तावत्।
मा कार्षीर्दनुसुत साहसं स्वहत्या
नो सूतेविमलफलं जगाद चेदम्॥ ११ ॥

"ग्रीवायाइति" स रंभः यावत् ग्रीवाया अतिथिं ग्रीवोपरिस्थं असिं खड्गं चकार तावत्अनल अग्निः क्षणेण प्रत्यक्षोभवत् अथचेदंजगाद इतिकिं हे दनु सुत साहसं घोरतां माकार्षीः न कुर्वि त्यर्थः यतः स्वहत्या विमलं फलं स्वर्गादि रूपं नोसूते नजनयति किंतु नरकदात्रीति परिशेषसिद्धिः माङ्योगे लोडर्थेलुङ् लक्षि व्यतिचाऽटोलुक् ॥ ११ ॥

एकांतं भवति हि केन कस्रसंग:
पांथानामिव तरुमूलसंगतानाम्।
सर्वोऽपि स्वकृत मिहाश्नुते हि लोकः
शोकं तज्जहिहि हितं वरं वृणीष्व १२

ननु प्राणसम्मिते स्वभ्रातरि मृते किं जीवितेनेति तदाशयं बुध्वा लौकिक दृष्टांतेन भ्रात्रादीनां संगस्यास्थिरतां बोधयति "एकांतमिति" इरंभ एकांतं निरंतरं केनपुरुषेण कस्यपुरुषस्य संगो भवति नकेनापि कस्येत्यर्थः अत्रदृष्टांत माह वृक्षमूले संगतानां मिलितानां पांथानां पथिकानामिव यथाघर्मार्त्ताः पथिकाः वृक्षमूले तावत् सर्वंमिलित्वा पुनः स्व स्वदेशं प्रतिगच्छंति तद्भ्रात्रादयोपीति भावः अत्रहेतुमाह हि यतः सर्वोपिजनःस्वकृतं पूर्वजन्मकृतमेव अश्नुते भुनक्ति नकस्यचित्कर्म अन्यो भुनक्तीत्यर्थः तत्तस्मात्कारणात् शोकंजहि हित्यज हितं स्वाभीष्टं यदर्थं तपसि तं वरं वृणीष्व लोकस्तुभुवनेजने इत्यमरः ॥ १२ ॥

आश्वस्तः श्वसनसहायिनेति चक्रे
कोशस्थं त्सरुगतपाणिना कृपाणम् ।
निर्मोकं भुजग इवोत्कलं स शोकं
प्रोत्सृज्योत्कलितमना वरीतुमासीत् १३

"आश्वस्तइति" श्वसनो वायुः सहायोयस्येति तेनाग्निना इत्येवं सिद्धांतवाग्भिः आश्वस्तः सरंभः त्सरौ खड्गमुष्टौ गतोयः पाणिः हस्तः तेन कृपाणं खड्गं कोशस्थं चक्रे ततश्च उत्कलं महांतं शोकं प्रोत्सृज्य त्यक्त्वा वरीतुं वरमादातुं उत्कलितमनाः उत्कंठितचित्तश्चासीत् शोकत्यागमात्रे दृष्टांतमाह कंकइव निर्मोकं कंचुकं भुजगः सर्पइव त्सरुः खड्गादिमुष्टौस्यादित्यमरः समौकंचुकनिर्मोकाविति च उत्कंठोत्कलिके समे इति च ॥ १३ ॥

तुष्टस्त्वयि भगवन्भवानऽनाथे
पुत्रं मे वितरतु हन्तशत्रवम्

नो वध्यो भवतु स कसत्रचित्‌ त्रिलोक्यां
स्वाराज्यं स्वय मनुपप्लवं भुनक्तु ॥ १४ ॥

"किंवन्नेइत्याह" हेभगवन्‌ मयिमनाथे चेद्यदि भवान्‌ त्वं तुष्टः तर्हि मे मह्यं हस्तयचोरिंद्रस्य यत्रु' शातनशीलं पुत्रं वितरतु ददातु सच त्रिलोक्यां काश्चिदपिवध्यः हननीयो नभवतु स एव च सः स्वर्गस्यराज्यं मनुपप्लवं निरुपद्रवं स्वमेवभुनक्तु भवच्छब्दस्य नामत्वाद्दितरत्वितिप्रथमपुरुषः स्वाराज्यमित्य त्ररोरीतिर लोपेद्र लोपेइतिपूर्वस्यदीर्घः स्वरव्ययंस्वर्गनाकेत्याद्यमरः ॥ १४ ॥

इत्युक्तः प्रतिवचनं तदा ददे ग्नि
र्यांकाञ्चित्पुरि वनितां यदाऽकमिष्यः ।
त्रैलोक्येश्वरसुतवां स्तदा भविष्य:
स द्वाक्यं मम न मृषेति मर्षणीयम्‌ ॥ १५ ॥

"इत्युक्तइति" तेनरंभेन इत्युक्तः अग्निः तदा प्रतिवचनं उत्तरं ददे किमित्याह हे रंभ पुरिमग्रे यांकांचित्‌ वनितांस्त्रियं यदाऽकमिष्यः तदा त्रैलोक्यस्यअधिपोयः सुतः तवान्‌ अभविष्यः इदंममवाक्यं सदिति सत्यमेवमर्षणीयं विचारणीयं मृषामिथ्या न। अकमिष्यदितिक्रियातिक्रमेऌप्‌ ईश्वरः शंकरेऽधीशे इतिविश्वः । १५ ।

इत्युक्त्वा सपदि तिरोहिते हुताशे
व्याकाशे जलद इवाऽनिशं प्रहृष्य ।
दैत्येन्द्रः किमपि सुखं हृदा प्रपेदे
संप्राप्याऽमृत मिव पुरुषो मुमूर्षुः ॥ १६ ॥

"मृत्युरेति" इतिपुत्रोत्पत्तिप्रकारमुक्त्वा शीघ्रं वर्षां कृत्वा मेघइव आकाशे क्षणेनतिरोहिते सति स दैत्येंद्रः रंभः किमप्यनिर्वचनीयंसुखं हृदा कृत्वाप्राप दृष्टान्तमाह मुमूर्षुः मरणासन्नःपुरुषः अमृतमिव संप्राप्यसुखंप्राप्नोति तद्वदित्यर्थः १६

स्मारं स्मार मथ यवीयसः परासो
र्दृग्भ्रां सो विरलगलज्जलाप्लुतास्यः ।
लब्ध्वापि प्रवरवरं सुदुःखपूर्णः
तंदृष्ट्वा जिगमिषितो बभूव रम्भः ॥ १७ ।

"स्मारमिति" अथ स रंभः वन्हितः प्रवरंश्रेष्ठं वरंलब्ध्वापि पुनः यवीयसः कनिष्टस्य करंभस्य स्मारंस्मारं कनिष्टंस्मृत्वास्मृत्वेत्यर्थः दृग्भ्रांनेत्राभ्यां सकाशात् अविरलं सन्ततं गलत्स्रवत्यज्जलं तेन आप्लुतं आस्यंमुखं यस्यसः दुःखेनपूर्णः सन् तं मृतंकरंभं दृष्टं जिगमिषितोवभूव गंतुमिच्छाजिगमिषा साजाता अस्येतिसः जातार्थे इतप्रत्ययः पौनः पुन्येणमपदंद्विरिति पूर्वकालार्थे स्मृतेर्द्विर्णमुचतद्योगे च यवीयसइतिमर्मविपष्टी यवीवोऽवरजानुजा इत्यमरः । १७ ।

अथयुग्मम्

तं देशं प्रति चलतः स्वयं चरंती
सन्नीलोत्पलदलमेचकांगयष्टिः ।
पंचेषो रिव धनुषी मुहु र्विधाणो
धुन्वंती करिकलभीव चारुकर्णौ ॥ १८ ॥

अथयुग्मं तंदेशं प्रतिचलतइत्यस्यद्वितीयश्लोकोत्तरार्धेनान्वयः अथतं देशं धर्मवधस्थानंप्रतिचलितः तस्यरंभस्य पथिमार्गे एकांतेरहसि दृशोर्विषये काचिदेव चिहायणीत्रिवर्षामहिषी आसीत् |तेनदृष्टेत्यर्थः कोदृशीमहिषी स्वयंचरन्ती तथासत् शोभनं यत् नीलोत्पलस्य दलंपत्रं तद्वन्मेचका कृष्णाअंग यष्टिः यस्यासा तथापंचेषोः कामस्यधनुषो इवविषाणे श्रृंगे धुन्वन्ती कंपयंती श्रृङ्गयोर्वक्रत्वात् धनुषा साम्यं तथाकरिकलभीवराजमाना पीवरत्वात् यद्दा विषाणयोः करिदन्तवाचकत्वा द्विषाणे धुन्वंतीत्यनेनैवश्लेषेणोपमाणोपमेयभा वोस्तुवद्याचारुकर्णीत्यु त्तरविशेषणेनास्तु १८

इस्वांगी मसृणतनूरुहावलोका
कामार्त्ता खुरहननै रिवाह्वयंती ।
तस्याऽसीदथ पथि दृक्पथि त्रिहायण्ये
कांते खलु महिषी च काचिदेव ॥ १८ ॥

पुनः कोदृशीतत्राह "ह्रस्वांगीतरार्धेन" ह्रस्वानि अङ्गानि यस्याः सातथा मसृणा स्निग्धा तनूरुहाणां रोमाणां आवली पंक्ति र्यस्याः तथा खुराणां हननैः पृथिव्यांमारणैः कामार्त्तासती आह्वयन्ती पतिं कर्तुं रंभं आमंत्रयंतीवेतत्र्यो च वयोहायनाः यस्याःदामहायनेतिङीप् चिचतुर्भ्यो हायनस्ये तिणत्वं कलभीति प्रथमवयोवाचित्वात्ङीप् चारुकर्णी ह्रस्वांगीति स्वांगत्वात् कालश्यामलमेचका इत्यमरः कलभः करिशावकइतिच विषाणेधुन्वन्तीत्यादौ स्वभावोक्तिर लंकारः ॥ १८ ॥

तां दृष्ट्वा प्रशमपि भावितैर्यमाणो
वातूला वलरंहसे व तूलः ।

रंभोऽचीकमत च सापि तं सुपुच्छी
चित्ते न स्मरशरसंहतेः शरव्यम् ॥ २० ॥

"तामिति" तां महिषीं पशुमपि दृष्ट्वा स रंभः वातूलसत्र वात्यायाः मतु लवलेनरंहसावेगेन तूलइव भाविना भवितव्ये न ईर्यमाणः प्रेर्यमाणः अचीकम त ऐच्छत् सासुपुच्छीमहिष्यपि चित्ते न कामवाणसमूहस्य लक्ष्यीभूतन्तं रंभं च चीकमत कमिवु रादित्वात्लङाङ्चिव वातूलो वातुलेपिस्याद्वात्यायां मारुता सहे इतिहेमः लक्षं वेध्यं शरव्यं इत्यमरः ॥ २० ॥

तत्रासीत् खलु म दनानलो हि साक्षी
तद्धैर्यस्मरविबुधोजुहाव हव्यम् ।
आनंदो ह्यवसलिलै बभूव दाढ्य
स्वांतंतत्परिणयआत्मपारिवर्हं ॥ २१ ॥

"तत्रेति" तयोर्विवाहे कामाग्निरेव साक्षी बभूव नतुवाह्योग्निः तत्रका माग्नौच कामएव विबुधोविवाहकारयिता तयो र्धैर्यरूपं हव्यं जुहाव तत्र च आनन्दो ह्रदेव सलिलैःसात्विकभावोत्पन्नैः रश्रुजलैः स्वेदभरै र्वा तस्याः स्वांतं मन एवदाढ्यबभूवकी० विवाहे आत्मैव पारिवर्हं यत्र ॥ २१ ॥

इत्थं तौ विगलितकाम भिन्न भावौ
धावंता वभिमुख मे व बद्धदृष्टी ।
अन्योन्यं परि गतचारु चित्तवृत्ती
रेमाते रहसि सदा मिथोमिलित्वा ॥ २१ ॥

"इत्थमिति" यथान्योन्यमितरस्यप्रत्येक विशेषणसंबंधः तौ महिषीरंभौ इत्थमन्योन्यं नष्टःकामाद् भिन्नोभावश्चेष्टा ययोःतथा न्योन्यं सम्मुखत्वमेवधावंतौ तथान्योन्यं वद्धदृष्टीयाभ्यांतौ तथाऽन्योन्यं परिणता चारु मनोज्ञा चित्त हृत्ति र्ययोस्तौ तादृशौ रहस्ये कान्ते मियो मिलित्वा मुदा रेमाते ग्राम्यधर्मंचक्रतु रित्यर्थः ॥ २१ ॥

इत्थवंविषमशरक्षणो तयो र्वै
भूयांसो दिननिकरा इताः क्षणत्वम्।
तादृ प्यं भजति हि वस्तु नि प्रगल्भे
सर्वोपि प्रकट मयोऽग्नितामिवा ग्नौ ॥ २२ ॥

"इत्येवमिति" इत्येवममुनाप्रकारेण विषमशरस्य कामस्य क्षणे उत्सवे तयोर्वैद्वयोपि दिनसमूहाः क्षणत्वं क्षणकालमात्रतांइताःप्राप्ताः उत्सववाचकक्षण शब्दस्य श्लेषेणकालविशेषवाचकत्वेपि क्षणत्वमापेसुदिनेषु तत्तुल्याप्रस्तुत प्रमाणं स दृष्टांतमाह हियतः प्रगल्भे उद्रिक्ते वस्तुनि पदार्थे सर्वमपीतरं वस्तु ता द्रूप्यं प्रगल्भवस्तुरूपतां प्रकटं भजति प्राप्नोति कस्मिन् कामिव अयो लोहः अ ग्नौ तप्यमानं सत् अग्नितामिव अत्रक्रमाद्विशेषसामान्यविशेषाणां न्यसनाद्वि क स्वरालंकारः यथःपर्वोत्सवेपिस्यात्तथामानेप्य ऽनेह स इतिविम्बः ॥ २२ ॥

सा काले त्वथ गमिते दधार गर्भं
सर्वेषा मिव विपदंकुरं सुराणाम्।
ना मोदो वपुषि ममौ च पश्यतस्तं
तस्याव्धेः सलिल मिवो दिते हिमांशौ ॥ २३ ॥

"सेति" अथानन्तरं सा महिषी कतिपयेकाले गमितेसति गर्भं दधार यत्रोत्प्रेक्षते सर्वेषां सुराणां विपदः अंकुरं बीजमिव अथच तं गर्भंपश्यतः तस्य

रंभस्य शरीरे यामोदः प्रीतिः नममौ अतिवृद्धत्वात् वहि निर्यक्कामेत्यर्थः कस्य किमिव हिमांशौ चन्द्रे उदितेसति समुद्रस्य जलमिव यथांतर्नमातितद्दित्यर्थः ॥ २३ ॥

मा धार्षी र्मदनशरार्दितो ह्यारिः
कोप्येतामिह पतिदेवतां सगर्भाम् ।
इत्यस्थे: करधृतचारुचन्द्रहासः
कांतारे पशुप इवाऽऽव तां स कान्ताम् २४ ॥

"मेति" इहवने एतां महिषीं पतिदेवतां पतिव्रतां तथा सगर्भां कोप्यन्यो महिषः कामबाणभिन्नः सन् माधार्षीत् न धर्षतु इत्याशयेन उच्चै र्यथास्या त्तथा करेधृतश्चारुः चन्द्रहासः खड्गोयेन सः रंभः कांतारे दुर्गवर्त्मनि तां कांतां पशुपालइव श्राव ररक्ष चन्द्रहासासि रूष्टयः इत्यमरः कांतारं वर्त्मदुर्गम मितिच ॥ २४ ॥

दृष्ट्वा तां वनमहिषोऽभ्यगाच्च कश्चित्
कामार्त्तो विपिनभुवं लिखन्खुराग्रैः ।
आयांतं पुरत उदीक्ष्य तं च रंभः
खड्गेन प्रतिहतवान्विषाणमध्ये ॥ २५ ॥

"दृष्ट्वेति" अथ च कश्चित् वनमहिषः तांमहिषींदृष्ट्वा कामेनार्त्तः सन् वन पृथ्वीं खुराग्रभागेः लिखन् विकर्षन् सन् अभ्यगात् अभिमुखमाययौ तं च स रंभः अग्रेआयांतंदृष्ट्वा शृंगयोर्मध्ये खड्गेनजघान ॥ २५ ॥

स क्रुद्धः पदनिहतः फणीव शृंगे
तस्योरस्यति विपुले जघानधुत्वा ।
तेनैवं वत निहतः पपात रंभो
भूभागे मरुदुरुरंहसेव रंभा ॥ २६ ॥

"स इति" सः महिषः पदानिहतः सर्पइव तेन खड्गेन हतः सन् क्रुद्धी भूत् अथ च शृंगे धुत्वा कंपयित्वा तस्यरंभस्य अतिविशाले वक्षसि जघान स रंभः एवं तेन महिषेण निहतः वतखेदे भूभागे पपात केनके ववायोः बहुवेगेन रंभाकदलीव इत्वं त्वगन्तर्भाविण्यर्थः ॥ २६ ॥

भर्त्तारं पतित मुदीक्ष्य गुर्विणी
सा पश्चात्तं मदनजवेन धावमानम् ।
संयुक्ता युगपदनल्पशोकभीभ्यां
यक्षाणां शरण मथो जगामतूर्णम् ॥ २७ ॥

"भर्तारमिति" सा गर्भवती महिषीपतिं रंभं पतितंदृष्टा पश्चाच्च काम वेगेन कर्त्ता धाव्यमानं तं महिषं दृष्ट्वा युगपत् एकदैव अनल्पः भूयान् यः शोकः भीः भयं च ताभ्यांयुक्ता अथ शीघ्रं यक्षाणां मालवटवासिनां शरणं जगाम गर्भिणी गुर्विणीसमे इत्यमरः ॥ २७ ॥

ते मत्वा दनुजविलासनी मनाथां
तत्पश्चा दय महिषं च दुर्विषह्यम् ।

तं सर्वे निशितशरैः शिरो विदार
मासारैर्दव मिव वारिदा निजघ्नुः ॥ २८ ॥

"तेइति" ते यक्षाः तां रंभस्यस्त्रियं अनाथां ज्ञात्वा अथ तस्याः पश्चाच्च महिषं दुःखेन सोढुं अशक्यं ज्ञात्वा तद्रचायै ते सर्वेऽपि यक्षाः तं महिषं तीक्ष्णबाणैः शिरोविदार्यहतवंतः कैःकंकैरिव धारासंपाते दावाग्निं मेघाइव विदारमितिल्युर्थेणम् प्रत्ययः धारासंपातआसार इत्यमरः ॥ २८ ॥

निर्दिष्टा अथ च तया पतिं विचेतुं
गत्वा ते ददृशु रदूरतो हतं तम् ।
नीत्वा तं सपदि निजाश्रमं चितायां
तच्छयरां विदधु रथेंधनै श्चितायाम् ॥ २९ ॥

"निर्दिष्टाइति" अथ तं हत्वा तया महिष्या भर्तारं अन्वेषितुं आज्ञप्ता ते यक्षाः तस्मात् स्थाना द्गत्वासमीपएव तं रंभंहतं ददृशुः अथ तं स्वाश्रमंशीघ्रं प्रापयित्वा काष्टैः निचितायां चितायां तस्यशय्यांचक्रुः विपूर्वकदधातेः करणार्थः ॥ २९ ॥

वीक्ष्याथो निजपति माश्रितं चिताया
मारोढुं स्वय मपि तेन साक मैच्छत् ।
सा नूनं दहन मनूनदुःखदूना
शोकाग्नेः पुरत इमं हिमं हि मेने ॥ ३० ॥

"वीक्ष्येति" अथ सा महिषी स्वभर्त्तारं चितायां आश्रितं वीक्ष्य स्वयमपितेन सहचितामारोढुं ऐच्छत् ननुवह्निदाहपीडां सोढुंप्राणत्यागदुखंच साकथमैच्छ

दित्याह सेति नूनं यतः सा महिषी अनूनेन महता दुःखेन दुःखितासती शोकरूपाग्नेः अग्रेदमंप्रत्यचाग्निं हिमं हि हिम मेव मेने शोकाग्न्यपेक्षया तमग्निं शीतलं जानातिस्मेतिभावः अन्योप्यग्निदग्धः शीतलं वस्तु कांक्षते तथा सापि शोकाग्नि दग्धा तमग्निं तापनाशकं मत्वाऐच्छदितिभावः साकमित्यस्यसहार्थत्वात्तद्योगे तृतीया ॥ ३० ॥

माधाची महिषि वपु र्निजं सगर्भं
ते यच्चाः प्रतिषिषिधु र्हि यावदेनाम् ।
ताव त्सा द्रु त मनले समद्धिरिद्धे
पुप्लोष स्ववपु रहो चितां प्रविश्य ॥ ३१ ॥

"सेति" हे महिषी सगर्भं निजं शरीरं माधाचीः नदहइति ते यच्चाः यावदेनां प्रतिषेधितवंतः तावदेव सा शीघ्रं काष्टैः सम्यक्ज्वलितवह्नौ चितां प्रविश्य अहोआश्चर्यंस्वशरीरं ददाह दाहार्थप्लुषधातोर्लिटिरूपंपुप्लोषेति ३१ ॥

तस्या द्वा वथ जनितौ ज्वलच्चितायां
चिंताया इव सहसैव दुःखशोकौ ।
कुर्वंतौ निजमहसा महोविहीनं
तं वन्हिं खलु प्रतिबंधकौ मणीव ॥ ३२ ॥

"तस्याइति" ज्वलच्चितायां सत्यां तस्याः महिष्याः द्वौ पुत्रौ इतिशेषः स हसैव जातौ कस्याः काविव चिंतायाः दुःखशोकाविव ननु तत्र किं न दग्धा वित्याह स्वतेजसा तं वन्हिं खलु महसा दाहकशक्त्याविहीनं कुर्वंतौ काविवप्रति बंधकौ अग्निशक्तिप्रतिबंधकर्त्तारौ मणीइव अत्रद्विवचनेर्इत्वाभावश्छान्दसत्वात्पिमणी

यादिवर्ज मित्युक्तेः संधिः यद्वाचशब्दस्यैवइवार्थः अत्र प्रकारस्य संयुक्तता सका रस्यादीर्घत्वं प्राप्तेपि लघुनापि क्वचिद्दोरित्युक्ते नं दोषः सरस्वतीकंठाभरणेप्युक्तं यदा तीव्रप्रयत्नेन संयोगादेरगौरवं न छंदोभंगमप्याहुस्तदादोषाय सूरय इति ३२

दृष्ट्वाऽथोक्षत बहुविस्मया हि यक्षा
निन्युस्तौ सपदि निजांऽकमाप्तमोदाः ।
संतुष्टा वथ शुशुचुर्न दंपती तौ
कः शुक्तिं स्मरति हृतां हि जातमुक्ताम् ॥ ३३ ॥

"दृष्ट्वेति" अथ तौ दृष्ट्वा कृतौ बहुर्विस्मयो यै स्ते यक्षाः जातहर्षाः संतः निजो त्संगे तौ निन्युः अथच दग्धौ तौ भार्यापती न शुशुचुः तयोः शोकं न चक्रुः दृष्टांतमाह हियतः जातमुक्ताफलां शुक्तिं हृतां विनष्टां कः स्मरति नकोपीत्यर्थः प्रतिवस्तूपमेयं उत्संगचिन्हयोरंक इत्यमरः ॥ ३३ ॥

कृत्वाथो सह विधिना तयोर्गतास्त्रोः
सौहार्दादवरत मौर्ध्वदेहिकादि ।
नाम्नातावथमहिपं च रक्तवीजम्
आजुहुवुर्विदित परावरार्थभावः ॥ ३४ ॥

"कृत्वेति" अथ यक्षाः सौहार्दात्स्नेहात् तयो र्महिषी रंभयो र्मृतयोः विधिना शास्त्रोक्तमार्गेण सह निरंतरं औौर्ध्वदेहिकादिकर्म कृत्वा तौ जातौ नाम्नामहिषंरक्तवीजं चेति आजुहुः आमंत्रयामासुः प्रथमजातस्य महिषेति नामचक्रुः पश्चाज्जातस्य रक्तवीजेति च कौ॰ यक्षाः विदिताः ज्ञाताः पराव रार्थस्वभावास्त्रेष्टाये स्ते अयमेतद्गुणविशिष्टो भविष्यतो तिवेत्तारः ॥ ३४ ॥

रिङ्गन्तौविपन-सुचिक्कणस्थलीषु
कूर्द्दन्तावतिचपलौ मुहुर्भ्रमन्तौ ।
तैर्यच्चैर्मधुरफलैः सुपालितौ तौ
वर्धाते इव विषयैर्हिमोहकामौ ॥ ३५ ॥

अथतयोर्बालक्रीड़ामाह "रिंगंताविति" तौमहिषरक्तबीजौ वनस्य चिक्कण स्थलीषु स्खलंतौ तथाकूर्दंतौ अतिचपलौ पुनः पुनर्भ्रमंतौ च तैर्यच्चैर्मधुर फलैश्च सुपालितौ विषयैः पालितौमोहकामाविव वर्धाते रिंगंतावित्यादौबाल स्वभाववर्णनात्स्वभावोक्तिः ॥ ३५ ॥

आसीनो निविडतरुस्थले कदाचित्
मीमांसा-मितिमहिषश्चकार चित्ते ।
पैतृव्यात्कथ मनृणो भवामि वैरात्
कैनेन्द्रं बलिनमहं लघुर्जयामि ॥ ३६ ॥

अथ बालत्वं विहाययूनोमहिषस्यवृत्तमाह "आसीन इति" समहिषः कदाचित् निविडच्छायवृक्षमूलेस्थितः सन् चित्ते इतिमीमांसांचकार विचारयामास इति किं पितृव्यस्यकरंभस्य हननोत्थात् वैरात् कथमहमनृणऋणरहितो भवामि अथ च अहंलघुः अल्पः बलिनमिंद्रं कथं जयामि मीमांसांचकारेत्यत्र व्यवधानेप्याम् प्रत्ययसंभवस्यतंपातयां प्रथममासेत्यादौदृष्टत्वादेकंपदमपि ३६

शक्रोपि स्वभुजबलेन नैवशक्तो
यागानां खलुशतकं हि तस्य शक्तिः ।

तस्मात्तन्मखशतकाधिकं तपोहं
कस्मिंश्चिच्छिखरिणि कर्तुमाशु यामि ॥ ३७ ॥

ननु शक्रस्य किं बलमस्तीति विचार्य निश्चिनोति "शक्रोपीति" इंद्रोपि निज भुजबलेनैव न शक्तः किंतु खलु निश्चये अश्वमेधाख्ययज्ञानां शतकमेव तस्य शक्ति रस्ति शतयज्ञान्कृत्वैव सइंद्रतां प्राप्त इति भावः तत्तस्मात् अहमपि तद्यज्ञशत कादप्यधिकं तपः कर्तुं कस्मिंश्चित्पर्वतेयामि ॥ ३७ ॥

इत्येवं प्रचुरचिरं विचार्य चित्ते
विन्यस्य स्वकमनुजं च यक्षमध्ये ।
हेमाद्रिं जिगमिषितो बभूव सिद्ध्यै
द्रोणाद्रिं प्लवग इवौषधीविचित्यै ॥ ३८ ॥

"इत्येवमिति" समहिपः इत्येवं बहुचिरं चित्ते विचार्य इदमेव हितमिति निश्चित्य निजमनुजं रत्नबीजं च यक्षाणांमध्येस्थापयित्वा सुमेरुपर्वतं स्वाभीष्ट सिद्धये गंतुमिच्छुर्बभूव कस्मै कं क इव पुरा औषध्याः अन्वेषणाय द्रोणंनाम पर्वतं प्रति प्लवगः हनुमान्‌ इव पूर्वंहि लक्ष्मणे युधि मूर्च्छिते रामेणाज्ञप्तो हनुमान् जीवनौषध्यर्थं द्रोणाद्रिंगतवान् इत्यादिरामायणादवगंतव्यम् ॥ ३८ ॥

लांगूलं सपदि विधृत्यजातवेगः
संस्फाल्याऽवनिमचलोपलान्विकीर्य ।
उन्मूल्य श्वसन जवेनपादपौघान्
संपूर्याप्रतिमरवै र्दिशो दशापि ॥ ३९ ॥

अथ द्वाभ्यां तद्गमनप्रकारमाह "लांगूलमिति" तावद्दितीयपद्योत्तरार्धं व्याख्या समहिष: शीघ्रं सुमेरो: समीपमगात् कं कइव कल्हारं कमलं अतिसौरभार्थीभ्रमर इव महिषपक्षेतु सुराणां सूरसग्वा भा सौरभा तामतिक्रांता भाऽतिसौरभा तदर्थीतग्रर्थ: समयानिकषाहाप्रतियोगेष्वितिद्वितीया किं कृत्वा पुच्छंशीघ्रं वेष्टयित्वा तथाजातवेग: सन् भूमिंताडयित्वा वेष्टितपुच्छेनेतग्रर्थ: तथा पर्वतानांपाषाणान् विकीर्य संघात्पृथक् कृत्वा तथाश्वासवेगेन वृक्षसमूहान् उन्मूल्य मूलादुत्पाट्य तथा अनुपमशब्दै: द्यावाभूमिसहिता: प्राच्याद्यष्ट दिश: संपूर्य पूरयित्वा ॥ ३९ ॥

उत्क्रम्याचल विपिन हृदस्रवंती:
तत्स्थानथ च निपीड्यजंतून् ।
हेमाद्रिं लघु निकषा ससैरिभोऽगात्
कल्हारं भ्रमर इवातिसौरभार्थी ॥ ४० ॥

पुन: किं कृत्वेतग्रपेक्षायामाह "उत्क्रम्येति" पर्वतवनसरोजनदीरुल्लंघ्य तथा तेषुपर्वतादिपुस्थितान् सर्वान् जीवान् व्यथयित्वायुग्ममिदं ॥ ४० ॥

तत्रा सौ मरकतवत्युपत्यकाया मेकांते
विमलतरा सुदीर्घ्य भूमिम् ।
तं शासन्नचल मिवाऽचलत्व मुच्चै:
निस्त्रेष्ट: परमतप स्वकार रांभि: ॥ ४१ ॥

"तत्रेति" असौरांभि: रंभसुत: महिष: तत्रसुमेरौ मरकतोनीलमणि: उपलक्षणमेतत् मणिमतीत्यर्थ: तत्रापि उपत्यकायां आसन्नभूम्यां एकांतेअमि

अथेत्तनिर्मलांभूमिंदृष्ट्वा निश्चेष्टः सुस्थिरः सन् परमंतपः चकार अत्रासुस्थिरता मुत्प्रेक्षते किं कुर्वन्निव तं अचलं सुमेरुं अचलत्वं निश्चलत्वमिव उच्चैःश्वासन् शिक्षयन् अत्राचलस्यापाचलत्वश्वासनादतिशयोक्तिः उपतस्काद्रे रासन्नाभूमि रित्यर्थः ॥ ४१ ॥

मत्तोऽमी अधिकतरा धराहुहाः किं
येभ्योऽहं सतत मिहार्थये फलानि ।
भोक्ष्येऽहं फल मथवेति मन्यमानः
संपूर्णे तपसि च नो फला न्यभुंक्त ॥ ४२ ॥

अथतपसि फलान्यपिसनाभुंक्तेत्याह "मत्तइति" समस्तिषः इतिमन्यमा न इव तपसि फलान्यपिनाभक्षयत् इति किं अमीहृचाः मत्तः मत्सकाशात् किं अतिशयेन अधिकाः येभ्योहृचेभ्यः अहंदीनवत् इहसंततं फलानियाचे या च्ञा हि अधिके शोभते नहोने अमीतुजडत्वात्मदपेक्षयाचलत्वा च्चहीनाइतिभावः अथवा इतिमन्यमानोनाभुंक्त इति किं अहंतपसि संपूर्णेसति एकमेवफलं स्वाभीष्टरूपं भोक्ष्ये किमेभिर्भुक्तैरित्यर्थः अमीअधिकेत्यत्र अदसोमादिति प्रगृह्यत्वात्संध्यभावः ॥ ४२ ॥

सो ऽहित्वे प्रभवति हेतु रेष वायुः
व्यालानां तपसि न सिद्धिदा हि तस्मात् ।
आहाराय न चक्लृपे स चेति वायुं
प्राणादी नपि मरुतो निरुद्ध्य तस्थौ ॥ ४३ ॥

अथवायुमपिनाभुंक्तेत्याह "सोऽहित्वइति" समस्तिषः इतिहेतुना वायु मपि आहारार्थं न कल्पयामास इतिकिम् एषवायुः व्यालानां सर्पाणांसो

हित्ये त्वमेवहेतुः कारणंप्रभवति साव्यालानां श्लेषेण दुष्टानां भावस्तत्ता दुष्टते त्यर्थः तपसि सिद्धिदानभवति किंतु सिद्धिनिरोधकर्त्रीति परिशेषः इति हेतुनैव सः प्राणादीनभ्यांतरीय पंचवायून् निरुध्यनंयम्यतस्थौ योगाधिरूढो ऽभवदित्यर्थः व्यालोदुष्टेगजेसर्पे इतिविश्वः सौहित्यं तर्पणं तृप्तिरित्यमरः प्राणापानसमानोदानव्यानाः पंचवायवः शरीरस्था इत्यमरेणादिपद सा फल्यम् ॥ ४३ ॥

वल्मीकं वपुषि पिपीलिका वितेनु
स्तस्या ऽथो वनहरिणा स्समेत्य कंडुम्।
चंडांशुः करनिकरै स्ससर्ज तापं
कांकृत्य ज्वलनसखा पपौ रसं च ॥ ४४ ॥

"वल्मीकमिति" तस्यमहिपस्यशरीरे पिपीलिकाः कीटिकाः वल्मीकंवि स्तारितवंतः अथ च वनहरिणाः समेत्यमिलित्वा कंडुं तस्य शरीरे वितेनुः अथ सूर्यः किरणसमूहैः तस्यशरीरे तापन्ददौ तथाज्वलनस्याग्नेः सखावायुः का मितिशब्दंकृत्वा तच्छरीरे योरसस्तंपपौ तच्छरीरंशुष्कं चकार अग्नि मिवत्वा दितिभावः ॥ ४४ ॥

क्षुत्क्षाम स्सततसिरालकाययष्टिः
योगाग्रं प्रति नितरां निबद्धदृष्टिः।
शारीरं न च वुबुधे स किंचि देव
आभीलं गजितदयो यथा ऽन्यदीयम् ॥ ४५ ॥

"क्षुत्क्षामइति" समहिषः एवं वल्मीकवितानादौसत्यपि शारीरंचाभीलं दुःखं किंचिदपिन वुबुधे कथं यथानिर्दयः पुमान् इतरशरीरजन्दुःखं न जा

माति सदयस्तुपरदुःखमपि किंचिज्जानातीत्यतो गलितदयइत्युक्तं कीदृशः महिषः क्षुधयाक्रान्तः तथानिरन्तरंनाडीप्रायकाययष्टिः तथा नासाग्रंप्रति निरन्तरंनिबद्धदृष्टिः ॥ ४५ ॥

तस्यै वं प्रबलतपोऽनलेन शैलो
जज्वाला ऽधिकतर मग्निनेव शुद्धः ।
त्वा ऽथो कलकल माकुलं कुलायाद्
उड्डिड्ये शकुनिकुलं दवं विदित्वा ॥ ४६ ॥

"तस्ये ति" एवं सति तस्यमहिषस्य उत्कृष्टतपोग्निना सशैलः सुमेरुः अग्निनाशुद्धइव अधिकतरंयथास्यात्तथा जज्वाल कांचनस्यहि अग्निनाशुद्धिः अथपक्षिवृन्दं तत्तपोनलं दवानलंज्ञात्वा आकुलंसत् कोलाहलंकृत्वा कुलायात् स्वस्वनीडं त्यक्त्वा उड्डिड्ये उड्डयतेस्म अत्र ल्यब्लोपे पंचमी कोलाहलं कलकलं तिस्त्रांपुंनपुंसकमित्यमरः कुलायोनीड़मस्त्रियामिति च ॥ ४६ ॥

इत्येवं व्रत तपतो ऽयुतं समानां
संपूर्णं सुरमुनिविस्मयप्रदातुः ।
भूयो ऽहं त मभि जगामभक्तितुष्टः
संशुष्कं हृद मिव नीरदो निदाघे ॥ ४७ ॥

अथ ब्रह्मातस्यतपोवृत्तमुपसंहरति "इत्येवमिति" व्रतेतिखेदे इत्येवं तपतस्तस्यमहिषस्य समानांवर्षाणां अयुतंदशसहस्रंसंपूर्णं कीदृशस्य देवानां ऋषीणामप्याश्चर्यप्रदस्य भूयः दशसहस्रवर्षातेऽहंब्रह्मा तस्यभक्त्यातुष्टः सन्

त्वं प्रतिजगाम कंकइव चर्मकालेसंगृह्यकंइदं मेघइव जगामेतिलिप्सुत्तमपुरुषे कवचनं संवत्सरोवत्सरोऽब्दोहायनोऽस्त्रीशरत्समा इत्यमरः ॥ ४७ ॥

तस्याग्रे मुदिरगभीरया गिराहं
वेणूना मथ तिरय न्नवाऽनवोचम् ।
उत्तिष्ठ प्रहिणु दृशौ मयि प्रसन्ने
ह्यायासा-द्विरम वरं वृणीष्वसौम्य ॥ ४८ ॥

"तस्ये ति" हेदेवाः अथानंतरं अहंब्रह्मा तस्यमहिषस्याग्रे मेघवद्गंभीरयागिरा वंशानांशब्दान् तिरस्कुर्वन् अवोचंकथितवान् किमितयाह हेसौम्य महिष त्वं उत्तिष्ठस्थिरोभव तथा मयि आसन्ने दृशौ प्रहिणु प्रेषय मांप्रसन्नं पश्ये तयर्थः तथा आयासात् तपोरूपश्रमात् विरम अलंकुरु तथा वरंस्वाभीष्टं वृणीष्व वरय घनजीमूतमुदिरेतयाद्यमरः ॥ ४८ ॥

स्तुत्वे दं कथ मपिमां पुरः प्रपश्यन्
आनन्दाप्लुत हृदयो मुहु र्ववन्दे ।
तुष्टाव स्तु तिभि रनाविलाभि राराद्
उत्साहं व्यधित स सद्वरं वरीतुम् ॥ ४९ ॥

"स्तुत्वे ति" समहिषःकथमपिइंद्रियाणांशैथिल्यात् महतायत्नेनेतयर्थः इदं मद्वचः स्तुत्वा अग्रतस्मांप्रपश्यन् सन् आनंदेन आप्लुतहृदयोभूत्वा मुहुर्नैकधा ववंदे नमश्चकार अनाविलाभिः निर्मलाभिः स्तुतिभिः मांआरात् समीपे तुष्टाव अथ च संतंशोभनंवरंवरीतुं उत्साहं व्यधित अकृत वरोन्मुखोभूदि त्यर्थः आराद्दूरसमीपयोरित्यमरः ॥ ४९ ॥

हे नाथ प्रथितदयोदयोऽस्यऽनाथे
नाथेऽहं वर मत एव मन्मतो यः।
नो मृत्यो र्भवति जनस्य भी र्यं दन्या
माभून्मे त दिह मृते र्भयं कदाचित्॥ ५० ॥

किंवन्नेइत्याह "हे नाथेति" हे ब्रह्मन् त्वंअनाथेदीनजने प्रथितः प्रसिद्धः दयायाः उदयोऽयस्यहृश्शोसि अतएव मयामतोनिश्चितोयोवरत्स्त्वां नाथियाचे यद्वामननंमत्चित्तं तस्मिन्मतः किंयाचसेइत्याह यत् यस्मात् इहलोके जनस्य मृत्योःअन्या परा भीःभयं नास्तितत्तस्मान्मे मम मृत्योः सकाशात् कदाचिदपि भयंमाभूत् नभवतु सदैवामरः स्यामितिभावः नाथ्याच्ञोपतापयोर्धातु स्तस्ययाच्ञार्थंएवात्मनेपदं मदिति गमादित्वात्क्विपिनलोपः ह्रस्वस्येतितुक् ॥ ५० ॥

प्रत्युक्तिं त मभि ददा वितीरितो हं
नो लंघ्या नियति रियं सुरै र्वा।
किं चाऽहं निजसमये प्रयामि शांतिं
तन्मत्तो वर मपरं वृणीष्व युक्त्या॥ ५१ ॥

"प्रत्युक्तिमिति" तेनमहिषेण इत्यमुनाप्रकारेण ईरितःकथितोहं तंप्रति प्रत्युक्तिं उत्तरंददौ किमित्याह हेमहिष इयंनियतिः जातस्य हिध्रुवंमृत्यु रितिनियमः सुरैर्नरैर्वा न उल्लंघयितुंशक्या अतस्त्वमेवप्रमाणंदर्शयति किं च अहंब्रह्मापि निजसमये द्विपरार्धसंमितेकाले शांतिंलयंप्रयामि वरदातुरेवा स्थिरत्वेवरादातुः स्थिरताकथंस्यादितिभावः तत्तस्मात् मत्तः मत्सकाशात् युक्त्याएवंमेमृत्युःस्यादितिदायेनअपरंकदापिमेमृत्युर्नस्यादित्यतोऽन्यंवरं वृणी ष्व ॥ ५१ ॥

इत्युक्तो मनसि विचार्य्य चारुमेधा
दौर्घट्यं निजनिधनस्य मामवादीत्।
पुंजातिः सुरनररक्षसां तिरश्चां
नो हन्या दल मबला तु का मदग्रे ॥ ५२ ॥

"इत्युक्त इति" सः वरबुद्धिर्महिषः इतिमयोक्तः चित्ते निजमरणस्य दुर्घटतां विचार्य मामुक्तवान् किमित्याह हे ब्रह्मन् सुरनररक्षस्तिर्यग्योनीनामध्ये यः पुंजातिः पुंस्त्वेनोद्देश्यः पुरुषइति यावत् समां न हन्यात् अथच नामत एव अबला वलरहिता स्त्री सा ममाग्रे कामलं समर्थास्तिनकापीत्यर्थः स्त्रीमांहन्या अपुमानितिवरंवन्ने इतिनिष्कर्षः ॥ ५२ ॥

उक्त्वाऽहं भवतु तथा पुमांस्तु कश्चि
न्नो हेतु स्तव निधिने विना वरोरुम्
अंतर्धिं नभसि जगाम तत्समक्षं
ज्ञात्वेव ध्वनि मतुलं महोर्मि रब्धौ ॥ ५३ ॥

"उक्तेति" हे महिष यत्त्वयोक्तं तत्तथैवभवतु इदमेवोद्घाटयति वरोरुं स्त्रियंविना कश्चिदपिपुमान् तवमरणे हेतुर्नभविष्यति इति तंप्रति अहमुक्त्वा तस्य समक्षं सम्मुखमेव आकाशेऽन्तर्धानंजगाम किं ज्ञात्वाकस्मिन् क इव महांतंध्वनिंज्ञात्वा अब्धौसमुद्रे महोर्मिर्महावीचिरिव संहतादित्याहवराड् त्तरोरोरुड् ॥ ५३ ॥

लब्ध्वा यो वर मपरै रलभ्य मित्थं
तं क्लेशं निजवपुषो जहौ क्षणेन।

प्राप्यो च्चै र्विजय मनुत्तमं रिपूणां
संग्रामे भट इव देहक्लं तनाद्यं ॥ ५४ ॥

“लब्ध्वेति” अथमहिष: अपरै: अलभ्यंवरंतस्य मत्त: लब्ध्वा तं तपोजनितं निजशरीरक्लेशं क्षणेनैव तत्याज अग्र नांयुद्धे अनुत्तमंविजयं उच्चै: प्राप्य देहक्ले तना दिक्लेशं शूरइव ।५४।

बलोन्मत्त: सिंहा ञ् शरभइव सिंहश्च करिण:
करीवोच्चैर्व्याघ्रान् शु नकनिवहान्व्याघ्र इव स: ।
बिडालांश्च श्वेव द्रु तमिव बिडालश्च चटकां
स्तथा जातस्सम्राड् विखलु विजित्याऽखिलनृपान् ॥५५॥

अथास्य सकलभूपालविजयमाह “बलोन्मत्तइति” समहिष:तथातेनप्रकारेण पृथिव्यां निखिलभूपान् जित्वा सम्राट्खलुजात: चक्रवर्त्तीअभूदित्यर्थ: यान् जित्वा कइव बलेनोन्मत्त: शरभ: सिंहघातुकतयाप्रसिद्ध: पशुविशेष: सिंहानिव तथासिंह: करिण: गजानिव तथाकरी व्याघ्रान् द्वीपिन इव तथा व्याघ्र शुनक निवहान् कुक्कुर समूहानिव तथा शुनक: बिडालान्मार्जारानिव तथा बिडाल: चटकान् कलविंकानिव अभरलयो: सावर्ण्याद्बिरोन्मत्त इतिमहिषेपि विशेषणोयं अत्रोपमामूलैकावलीनामालंकार: शिखरिणीवृत्तम् रसैरुद्रैश्छिन्ना यमनसलभाग: शिखरिणीतिलक्षणात् ॥ ५५ ॥

भूयो यद्यन्निजपुरुबलं दर्शितं तेन नाके
तत्तत्सर्वं त्रिदिवपतयो वेत्य तस्माद्गिरोत्तम् ।

नायंवध्यो मम वरबला त्पु भिर प्यु च्यतेश
प्रख्यैरेणैर्हरिरिव पुनः का समर्थेह भीरुः ॥ ५६ ॥

"भूयइति" हे देवाः तेनमहिषेण भूयः भूमिजयाऽनंतरं स्वर्गेयत् यत् स्वकीयं महद्बलं दर्शितं प्रदर्शि तत्तत्सर्वमपि यूयंवेत्थ जानीथैव तत्तस्मात् महाख्याप्रलं मम कथनेन किमित्यर्थः एतत्सर्वमुपसंहरति किमन्यत्भणामि श्रयंमहिषः मम वरबलात् विष्णुशिव तुल्यैरपि पुरुषैः हननीयः नास्ति कैः कइव एणैः हरिणैः हरिः सिंहइव पुनः भीरुः स्वभावत एव भयशीला स्त्री सा का समर्थाऽस्ति नकापीत्यर्थः एणर्ष्य हरिणाजिनयोनय इत्यमरः ॥ ५६ ॥

तदपि कुरुत यत्नं मन्निदेशेन देवा
नहि हरि रपि शक्तो हन्त्तु मेणांस्त्रशयालुः।
इय मपि वरगाथा लौकिकी भातश्लंमा
मपि शतशरदन्ते शर्म जीवंत मेति ॥ ५७ ॥

नन्वेवं सतिकिमस्माभि रेवमेवस्थे य मितिदेवाशयंज्ञात्वाह "तदपीति" हे देवाः एवंसत्यपि मन्निदेशेन ममाज्ञया यत्नं कुरुत हियतः हरिः सिंहोपि शयालुः शयनशील: समीपस्थान ऽ पिमृगान् हंतुं नशक्तः उत्थायैव हंतीत्यर्थः तद्वद्यूयमपि यत्नंकृत्वैवतं हनिष्यथेति भावः ननुकिंजानीमो यत्नेकृतेपिसुखं भवष्यति नवेत्याशयं ज्ञात्वाचेतिस्म प्रमाणं दर्शयति हे देवाः इयमपिलौकिकी अनिर्दिष्ट प्रवक्तृक प्रवाद पारंपर्य प्राप्तागाथा सांप्रति अलंमनोज्ञा भाति इयंका जीवंतं पुरुषं शतवर्षांतेपि शर्मसुखं एति प्राप्नोत्येव एति जीवित मानं देनरं वर्षशतादपीत्युक्तेः अतो दुःखिता अपियूयं कदाचित्सुखिनोपि भविष्य थेतिभावः शीलार्थेशीङ्‌ धेत्यालुच्शयालुः ॥ ५७ ॥

तस्मा त्कामं धाम तत्कामशत्रोः
सर्वे नूनं याम कैलासनाम।
वामावध्यं सूचयित्वा तमादौ
पश्चात् कृत्यं मंत्रयामोऽथ तेन ॥ ५८॥

किं यत्नं कुर्मइत्याह "तस्मादिति" तस्माद्धेतोः कामशत्रोः शिवस्य तत् कैलासनाम धाम भवनं प्रति कामंस्वैरं सर्वेपि वयंयाम तत्रकिंकर्त्तव्यमित्याह आदौप्रथमं तस्मै शिवाय तं महिषं वामया वनितया वध्यं सूचयित्वा अथ पश्चाच्च तेनशिवेन सह कृत्यं किं करणीयमितिमंत्रयामः कामः स्वरेच्छयोः का मं वीर्ये काम्यनि कामयोरितिहैमः प्रतीपदर्शिनीवामावनितामहिला तथेत्य मरः "शालिनीवृत्तं" शालिन्युक्ताम्तौतगौगोब्धि लोकैरितिलक्षणात् ॥ ५८ ॥

श्रीमा ज्ञ्रघ्नो श्ररणासदनीभूत हृच्छ्रंभुनाथो
लक्ष्मीनाथं कविपरिवृढं देशिकोऽसूत यं माम्।
तेनोद्गीते महिषनिधने गीतलक्ष्मीचरित्रे
लक्ष्मीकाव्ये विरतिमगमत्सर्ग एष द्वितीयः ॥ ५९ ॥

श्री मानित्यादिपूर्ववत्स्पष्टम् ॥ ५९

इति श्री मङ्गोस्वामिवंशावतंस–श्रीमच्छ्रंभुनाथात्मजकवि लक्ष्मी नाथ विरचिते लक्ष्मी काव्ये द्वितीयः सर्गः समाप्तः"

इति श्रीलक्ष्मीनाथ कृतायां लक्ष्मीकाव्यव्याख्यायां

द्वितीयः सर्गः समाप्तः

ओं नमः श्रिये"

अथ शक्रपुरस्सरा सुरा

उररीकृत्य गिरं गिरःपतेः

सह तेन ययुः कृतस्वरा

गुरुणेवांतसदः शिवास्पदम् ॥ १ ॥

ओंनमोविघ्नहर्त्रे अथ तृतीयसर्गे शिवेन सह मंत्रयितुं जिगमिषूणां ब्रह्मादीनां प्रसंगेन कैलासं वर्णयितुं बीजमवतारयति "अथेति" ब्रह्मणः कथनानंतरं शक्रपुरस्सराः इंद्रादयः सुराः गिरः सरस्वत्याः पतेर्ब्रह्मणः गिरंवाचं उररीकृत्य अंगीकृत्य तेनब्रह्मणासह शिवस्य आस्पदं स्थानंकैलासं प्रति ययुः कीदृशाः सुराः कृतः त्वरावेगो यैस्ते केनकेइव गुरुणासह अन्तेसमीपेसीदंतीत्यंतसदः शिष्या इव अत्रकचिदलुकात् गिरःपतेरित्येवंपदं अन्यथागिरः पत्युरित्येवंस्यात् असमासे पतिशब्दस्यसखिशब्दवत्त्वात् गिरापतेरितिपाठोवा तेनेतिसहार्थे तृतीया उररीउरीचारीचविस्तारेंगीकृतेत्रयमित्यमरः रंहस्तरसीतुरयस्यद इतिच अस्मिन्सर्गेसुंदरीवृत्तम् विषमेयदिसौततोजगौ युजिसान्नौलगुरूचसुंदरीति लक्षणात् ॥ १ ॥

दहृशू रजताचलं ततः

शिवपादाङ्कितमंजुलस्थलम् ।

सितयेव हसंत सुत्त्वकै

र्निकषा स्वर्णगिरिं निजत्विषा ॥ २ ॥

"ददृशुरिति" ततस्तदनंतरं तेदेवाः रजताचलंकैलासंददृशुः कीदृशं शिवस्यपादैः अंकितं चिन्हितं मंजुलंसुंदरंस्थलं यस्य पुनः कीदृशं निकषा

समीपे सितया उज्वलया निजत्विषा स्वशोभया स्वर्णगिरिं सुमेरुं उत्सके यथा स्थितया हसंतमिवेत्युत्प्रेक्षा कविसंप्रदायेहासस्यश्वेत्यात् अत्रनिकषायोगे द्वि तीया समयानिकषाशब्दो सामीप्येत्वव्ययेमताविति हलायुधः ॥ २ ॥

प्रविशंति न यं रवेः करा
निबडछायतरुव्रजाहतम् ।
परिचुंवति यः खमराडलं
शिखरै स्तुङ्गतरै स्वभासुरैः ॥ ३ ॥

"प्रविशंती" इति यंकैलासं रवेः कराः किरणाः न प्रविशंति अत्रहेतुमाह कीदृशं यं निविडाघनाच्छाया येषां तेषां तरूणां वृक्षाणां व्रजे समूहे आहतं अथ च यः भासनशीलैः उच्चतरैश्वशिखरैः आकाशमंडलं परिचुंवतिइवेत्युत्प्रेक्षा संबंधेपिसंबंधकल्पनालंबंधातिशयोक्तिरलंकारः ॥ ३ ॥

शिवधाम वदंतश्रकोविदा
वसतित्वेन शिवस्य यं जनाः ।
वयमुज्वलताशयात्तु नः
सितशंभो र्मह एव मन्महे ॥ ४ ॥

"शिवधामेति" यंकैलासं अकोविदाः अपंडिता जनाः शिवस्यवसतित्वेन शिवस्यायंवासस्थानमित्यभिप्रायेण शिवधामेतिवदंति शिवस्यधाममंदिरं शिव धामेत्यर्थंजानंतीतिभावः तद्दिकोऽन्योऽर्थोस्तीत्यतः स्वमतमाह वयंतु उज्वल तायाः आशयादभिप्रायात् सितस्य उज्वलस्यशंभोः महः तेज एव मन्महे जानीमहे शिवस्यधामतेजइत्यर्थंजानीमहइतिभावः उज्वलस्यहिउज्वलंतेजो

भवति घनकैलासे स्वमतिविकासोत्प्रेक्षितशिवतेजस्त्वारोपार्थं पराभिमतशिववसतित्व धर्मस्यापह्नवाच्छुद्धापह्नुतिरियं तदपह्नवस्तु अकोविदवचनोपन्यासेनाविष्कृतः शुद्धापह्नुतिरलंकारोयं तदुक्तं शुद्धापह्नुतिरन्यस्यारोपार्थोधर्मनिन्हव इति धामशक्तौप्रभावेचतेजोमंदिरशक्तिष्वितिविश्वः ॥ ४ ॥

क्वचि दन्यभृतैः कुहू कुहू
रितिवाच स्समदैरु दीरिताः ।
उदिते ऽपि विधावऽमाभिधाः
खलु कुर्वं त्यदृशः स्मरातुरान् ॥ ५ ॥

"क्वचिदिति" यत्र यस्मिन्शैलेक्वचित् समदैः कोकिलैरुदीरिता कुहुकुहु रिति अमावस्याख्याः वाचः चंद्रेउदितेपि स्मरातुरान् जनान् अदृशः अंधान् कुर्वंति कुहुः स्त्रीकोकिलालापेनष्टेंदुकलदर्शयोरिति विश्वः ॥ ५ ॥

पुरुषा इह के स्त्रियश्च का
न च पंचेषुशरव्यतामिताः ।
इति मानभरा इव श्रुताः
शिखिकेका अपि यत्र दैवतैः ॥ ६ ॥

"पुरुषा इति" यत्रमयूराणांकेकावाण्यः अपि देवैः इति मानभरा इव श्रुताः इति किं इहशैले पुरुषाः के तथा स्त्रियः काः येयाश्च अस्मान् श्रुत्वा पंचेषोः कामस्य शरव्यतां लक्ष्यतां न इताः न प्राप्ताः अत्र केका इति स्वनाम्नैव तासांमानभरत्वंसूचितं केकाइतिपदस्य पृथक्पदेकृते केइतत्रस्य पुल्लिंगे प्रथमा बहुवचनत्वात् काइतत्रस्यस्त्रीलिंगे च केकावाणीमयूरस्येतत्रमरः ॥ ६ ॥

प्रतिकंजसुगंधगृध्नवो
बहु भूभूरितिमंजुगुञ्जितैः
वसुधामिवगंधशालिनी-
मलयो यत्र मुदाह्वयंतिहि ॥ ७ ॥

"प्रोतिइति" यत्र भ्रमराः कंजंकंजं प्रति सुगंध्यभिलाषुकाः बहुभिः भूभू इति मंजुभिः गुंजितैः गंधवतीं वसुधां भूमिमिव मुदा आह्वयंति आमंत्रयंति भूपदस्य संबोधनेपि भूरितरेवरूपसत्त्वात् उत्प्रेक्षेयं स्वधुअभिकांक्षायां वसिगृधीतिक्नुः ॥ ७ ॥

अपि यत्र शिलासुदूरतो
बहुवेगेन पतन्झरो रणन् ।
विशदैः कणजातबुद्बुदै
र्हसतीवांशुहतेंदुमण्डलम् ॥ ८ ॥

"अपीति" यत्रकैलासे झरः जलप्रवाहः बहुवेगेनअधः स्थितशिलासु पतन् सन् ततश्च रणन् शब्दंकुर्वन् पतनात्समुत्थितेभ्यः कणेभ्यः जातैर्बुद्बुदैः कृत्वा अंशुभिः किरणैर्हतं चंद्रमंडलंहसतीवेत्युत्प्रेक्षा कीदृशैर्बुद्बुदैः विशदैः श्वेतैः हासोहिश्वेतोभवति यत्रकैलास शिलानांरजतमयत्वात् चंद्रसाम्यं तदुत्थितझर कणानांचांशुभिः साम्यं प्रवाहेनिर्झरोझरइत्यमरः ॥ ८ ॥

अविशंकितदूरनिष्पतञ्
झर-कां-कृतरतिरावशंकिताः ।

न रवा न्वहु यत्र कुर्वते
स्वकुलायेषु निलीय पक्षिणः ॥ ९ ॥

"अविशंकितेति" यत्र च पक्षिणः स्वनीडेषुतिरोभूय शब्दान् बहून्कुर्वते भवहेतुः कीदृशाः पक्षिणः अविशंकितंनिश्शंकं दूरान्निप्पतंतः येभराः प्रवाहाः तेषां याः कांक्षतयः तदुत्थितोयोऽतिरावः तेन शंकिताः बह्वितिक्रियाविशेषणम् बहुधात्रेतिवापाठः ॥ ९ ॥

मुहु रुड्डुयनैकवृत्तिभि
र्लहरीप्रांत-कण-बिंदुशुभ्रु भिः।
बहुभि र्विहगै र्विभाति य-
श्चिचिकूचीतिवचोभि रुच्चकैः ॥ १० ॥

"मुहुरिति" यः कैलासः बहुभिः पक्षिभिः विभाति कीदृशैः मुहुः पुनः पुनः उड्डयनंविहासोर्ध्वगमनमेवैकावृत्तिर्येषांतैः तथालहरीणां प्रांतिसमीपे यत्कं जलं तद्बिंदुशुभ्रुभिः अभिलाषुकैः तथाचिचिकूचीतिवचांसियेषांतैः कंशिरः सुख वारिष्वितिहेमः ॥ १० ॥

स्वनितंबविलंबिनाऽवभृत्
पटलेनाऽधिकसांद्ररोचिषा।
शशिभाल इव प्रभाति यो
मदमत्तेभनिकृत्तचर्मणा ॥ ११ ॥

"स्वनितंबेति" यः कैलासःस्वनितंबे मध्य भागे विलंबिना मेघपटलेन प्रभाति कीदृशेन अधिकं सांद्रा निविडा रोचिर्दीप्तिर्यस्यतेन केनकइव मदेनमत्तः य

इभः गजः ततो निकृत्तं सद्यश्छिन्नं यत् चर्मतेन स्वनितंवे कटिपाश्चात्य भागे विलंविना शशि-भालः शिवइव शैलस्य श्वेत्यात् शिवेनसाम्यं मेघस्य श्याम लत्वात् गजकृत्तयाच सद्यःकृत्ता गजकृत्तिर्हि सांद्रश्यामदीप्तिर्भवति मद मत्तेति गजविशेषणं श्यामलताधिक्य प्रतिपादनाय ॥ ११ ॥

यदऽमन्दमरुद्धुतद्रुम
प्रपतत् सूनचयाप्सुरांगनाः ।
पदपंकजलास्यलाघवा
दपि भुग्नच्छदनान् न कुर्वते ॥ १२ ॥

"यदिति" यस्यकैलासस्य अमंदेन अनल्पेन मरुतावायुना धुताः कंपिताः येद्रुमाः तेभ्यः प्रपततः सूनचयान् पुष्पसमूहान् सुरांगनाः अप्सरसः चरण कमलनृत्यलाघवेन भुग्नच्छदनान् कुटिलीभूतपत्रानपि न कुर्वते अयंभावः अप्सरसस्तत्रे दृशं नृत्यलाघवं कुर्वन्ति ये नाधःपतित पुष्पसमूहा अपिकुटिल पत्रा न भवन्ति यदिति शब्दनिष्पन्नस्य यस्येति पदस्य सूनचयैः संबंधः कार्यः लास्यं नृत्यं चनर्त्तने इत्यमरः आविद्धं कुटिलं भुग्नमितिच ॥ १२ ॥

यदशोकजनूललोहित
प्रसवौघच्छुरित स्व यः क्वचित् ।
जतुनेव विभाति रंजितो
विशदे भांति गुणा हि संगताः ॥ १३ ॥

"सदिति" यः शैलः क्वचित् संतः साधवः ये अशोकवृक्षाः तेभ्योजाताये नूत्नाः नवीनाः लोहिताः रक्ताश्च प्रसवानां पुष्पाणांओघः समूहाः तैः कुरितः विद्धः सन् जतुना लाक्षयेव रंजतो विभाति ह्यितः विशदे वस्तुनि जने वा गुणाः लोहितादयः मैत्रीमर्यादादयोवा संगताः मिलिताः संतः भांति ॥ १३ ॥

क्रतमालतमालमालया
श्रितहिंतालरसालसालया ।
कदलीलवलीनलावली
वलितो यो विलस त्यनाविलम् ॥ १४ ॥

"क्रतमालेति" यः शैलः क्रतमालानांवृक्षविशेषाणां तथातमालानांच मालयापंक्त्या अनाविलंस्वच्छं यथास्यात्तथा विलसति प्रकाशते कीदृश्या तया लया श्रिताः सार्थीकृताः हिंतालाः रसालाः सालाश्च वृक्षविशेषाः यया कीदृशः शैलः कदलीरंभा लवलीति दाक्षिणात्येषु रायआवलीतिभाषया प्रसिद्धा हरफारेवतीत्यन्यदेशभाषया तथा नलानामितिडलयोः सावर्ण्यात् नडानां आवलीभिः पंक्तिभिः वलितः आवृतः एतेवृक्षविशेषाः निघंट्वादौ स मीचीनतया बोद्धव्याः अत्रानुप्रासत्वात् डलयोरभेदः तदुक्तं यमकश्लेषचित्रेषु रलयोर्डलयोर्नभिदिति अनुप्रासोऽपियमकप्राय एव ॥ १४ ॥

क्वचि दैत्त्विषतौषधीगणैः
स्फुरदच्छच्छविभिः प्रदीपवत् ।
पुरतो निशि पार्वतीपतेः
कृतनीराजन सूचके रिव ॥ १५ ॥

"क्वचिदिति" कुत्रचिच्च देवाः तं शैलं निशिरात्रौ प्रदीपवत्स्फुरंतीप्रकाशमाना स्वच्छानिर्मला च्छविर्दीप्तिर्येषां तैः औषधीगणैः पार्वतीपतेः शिवस्य पुरतः अग्रे उच्चैः कृता नीराजना आरार्तिका येनेति तादृशं इव ऐक्षिषत दृष्टवंतः रात्रौहि शैलेषु जाज्वल्यमाना औषध्योदृश्यंते उत्प्रेक्षेयम् ॥ १५ ॥

अपि चारणकिन्नराप्सरो
मुनिगंधर्वकदंबकैः स्वयः ।
स्तुतिवादनवृत्यसंयम
स्वरभेदप्रसितैर्निषेव्यते ॥ १६ ।

"अपीति" यश्शैलः चारणादीनांकदंबकैः समूहैः निषेव्यते कीदृशैः यथाक्रमं स्तुत्यादिषु प्रसितैः तत्परैः संयमः इंद्रियनिरोधः स्त्रियांतुसंहतिर्वृदंनिकुरंबंकदंबकमित्यमरः तत्परेप्रसितासक्ताविति च ॥ १६ ॥

विविधैणपतल्लतागृहा
निति कैलास मुदीक्ष्यते सुदा ।
ददृशुस्तपनीयवेदिकां
चतुरस्त्रां सरसी मिव द्विपाः ॥ १७ ॥

कैलासशोभामुपसंहरन्नाह "विविधेति" विविधानां एणानां हरिणानां पततां पक्षिणां च लतायापंक्तेर्लतानांवल्लीनां वा गृहान् गृहमितयर्थः तं कैलासं ते देवाः इति पूर्वोक्त प्रकारेण मुदाप्रीत्यावीक्ष्य अग्रतः चतुरस्राचतुष्कोणां तपनीयस्यस्वर्णस्यवेदिकां ददृशुः कांकेव चतुरस्रां सरसींद्विपा इव

अत्रगृहशब्दस्यसदाबहुलात् कैलासमितएकवचनविशेषणत्वेपिनदोषः तथा च अमरसिंहः गृहाः पुंसि च भूम्नेवेति ॥ १७ ॥

बहुरूपमणिप्रसूतया
परितो विस्फुरणैकभावया ।
भजते हि यदाभया भयात्
तिमिरं कांचनकांदिशीकताम् ॥ १८ ॥

वेदींवर्णयति "बहुरूपेति" द्वाभ्यां यस्याः वेदिकायाः आभयाशोभयातिमिरं भयात् कांचनकामपि कांदिशीकतां पलायनं भजतेकीदृश्या आभया बहुरूपाः येमणयः तेभ्यः प्रसूतया जातया तथापरितः विस्फुरणमिव एकः भावः स्वभावोयस्याः तया भावः सत्तास्वभावाभिप्रायचेष्टात्मस्वितिविश्वः ॥ १८ ॥

ऋजुवेत्रलसत्कराम्बुजै
रभितो नंदिपुरस्सरैर्गणैः ।
अविशन्सहसा न यां सुरा
भुजगैर्भोगवतीमिवावृताम् ॥ १९ ॥

"ऋजुवेत्रेति" यांवेदीं सुरा अपि सहसा तरसा न अविशन् कुत इत्याह कीदृशीं ऋजुभिः वेत्रैः शोभमानकरकमलैः नंदिप्रभृतिभिर्गणैः आवृतां कैःकामिव भुजगैः भोगवतींपातालपुरीमिव पुरस्सरपदेन भृंगिचंडादिग्रहः॥ १९॥

तत ईषदवाङ्मुखाम्बुजया
सह रुद्रोचितभर्तृवक्त्रया ।

गिरिराजतनूजया शिवं
ददृशुश्चन्द्रमिवाऽनुराधया ॥ २० ॥

"तत इति" तदनंतरंगिरिराजस्य हिमालयस्य तनूजया पुत्र्या पार्वत्या सहितंशिवंतेदेवाः ददृशुः कयाकमिव अनुराधया तारया चंद्रमिव कीदृश्यापार्वत्या ईषत् किंचित् अवाक् लज्जया अधोभूतंमुखाब्जंयस्याः तथा मुहुः उद्वीक्षितंभर्तुः शिवस्य वक्त्रंमुखं यया स्त्रीस्वभाववर्णनात्स्वभावोक्तिः ॥ २० ॥

अघसंहृतिकुट्टने पटु
जंटि जूटावटपेटिकोत्थिता।
दिविषत्तटिनी विभातियत्
सुललाटे विशदेव वेष्टिनी ॥ २१ ॥

कीदृशं शिवमित्यपेक्षायां शिवंवर्णयति "अघेति" यस्यशिवस्यशोभने ललाटे दिविषदां देवानां तटिनीनदीगंगा विशदा श्वेता वेष्टिनी उष्णीषेव विभाति कीदृशी पाप समूहक्षोदीकरणे चतुरा तथा जटाजूटैः अवटः गर्त्तः स एवपेटी ततउत्थिता उष्णीषापि पेट्याएवनिष्कास्यशिरसिवेष्ट्यते जटिर्जटेतिद्विरूपकोशाज्जटिशब्दोपि जटापर्यायः ॥ २१ ॥

कमनीयविशालभालगां
कुटिलां चारुकलां कलानिधेः।
दहनस्य तृतीयदृग्जुषः
प्रशमायेव बिभर्त्ति योऽनिशम् ॥ २२ ॥

"कमनीयेति" यः शिवः कमनीयः अतिसुन्दरो योविशालः भालः तस्मिन् गतां कलानिधेश्चन्द्रस्यचारुकलां अनिशं निरन्तरं विभर्त्ति अलोग्रे चति कस्मै इव तृतीयनेत्रस्यस्याग्नेः लक्षणयातदुत्यतापस्य प्रशमायैव चन्द्रकलायाः शैत्यात् कीदृशींकलां कुटिलाम् ॥ २२ ॥

अपि सत्त्वरजस्तमोमयं
जननस्थेमविरामकारणम् ।
विधुतिग्मकरा ऽनलात्मकं
त्रितयं यस्य चकास्ति चक्षुषाम् २३

"अपीति" यस्यनेत्राणां त्रितयं प्रकाशते की० सत्त्वरस्तम इति गुणत्रया त्मकं तथा जन्मस्थितिलयानांहेतु तथा चन्द्रसूर्याग्निरूपं एतदेवमपि वपुराणा दिभ्योनिर्धेतव्यम् ॥ २३ ॥

किमहिः किं स्रुता ऽक्षमालिका
मृगनाभिः किमु किं स्थिति र्हरेः ।
इति यस्य गले वितर्क्यते
खलु हालाहलकालिमा बुधैः ॥ २४ ॥

"किमिति" यस्यशिवस्य गलेहालाहलस्य विषस्यकालिमा कृष्णता बुधैः इति एवं वितर्क्यते इतिकिं अयंकालिमा किंअहिः सर्पः सर्पभूषणत्वात् कश्चित्कण्ठे कृष्णसर्पोस्तीतिभावः उतवितर्केकिं अक्षाणांरुद्राक्षाणां मालिकास्ति तस्या अपिशिवभूषणत्वात् कृष्णत्वाच्चयुक्तएवसंशयः अथकिमु मृगनाभिः कस्तूरीअस्ति तस्याअपिकृष्णत्वात् किंवाहरेः कृष्णस्य स्थितिरत्रास्तीतिशेषः

किंकृष्णनागस्मरणात्कंठेकृष्णताजातेतिभाव: कालिमेति लोहितादित्वादिमन् संशयालंकार: ॥ २४ ॥

भुजगावलयो ऽवलंबिता:
कुटिलीभूय शिरोमणिप्रभा: ।
भुजगा वलया अनाविले
विलसंतीव च यत्कलेवरे ॥ २५ ॥

"भुजगेति" यस्य अनाविलेनिर्मले कलेवरेशरीरे भुजगानां सर्पाणां आवलय: पंक्तय: भुजयोर्गता: सत्य: वलया इवकटकाइव विलसंति कीदृश्य: कुटिलीभूय अवलंबिता: तथाशिर:स्थमणिभि: प्रकृष्टाप्रभा शोभायासांता: कटकाअपिकुटिला: शिरसि मणिमंतश्चभवंति ॥ २५ ॥

भसितेन च यत्तनू स्तनू
भवताभातिनितांतभास्वता ।
रजिताद्रिमही वपांडुरै
रणुभि स्चारुसरोजरेणुभि: ॥ २६ ॥

"भसितेनेति" यस्यशिवस्य तनू: शरीरं भसितेनभस्मनाभाति कीदृशेन तनू भवता अणूभूतेन तथानितांतभास्वता प्रकाशमानेन दृष्टांतमाह पांडुरै: श्वेतै: अणुभिश्च चारुसरोजस्यरेणुभि: परागै: कैलासभूमिरिव ॥ २६ ॥

करिकृत्तिकृतोत्तरीयत:
प्रसरमाण: किरणोत्करो बहि ।

विलसत्यऽति यस्य सर्वतो
जलदप्रांतत उष्णगो रिव ॥ २७ ॥

"करीति" यस्यशिवस्य गजचर्मणा क्षतात् उत्तरीयतः उपरिवाससःवहिः क्षरमाणोनिस्सरन्मन् किरणोत्करश्रंशुराशिः सर्वतः श्रति विलसति कस्मा त्कस्येव जलदप्रांततः उष्णगोः सूर्यस्येव यथा मेघाच्छादितसूर्यस्य किरणाः मेघप्रांततः सर्वतो वहिर्निस्सरंतः प्रकाशंते तद्वदित्यर्थः ॥ २७ ॥

इति पूर्वसुरप्रतीपदृक्
पुरभेत्तु र्निखिलप्रतीकगा ।
अयणं क्वचिदऽप्रतीतव-
त्यथ तैः पादयुगं प्रतीरिता ॥ २८ ॥

"इतीति" इत्यमुनाप्रकारेण पूर्वसुराणां दैत्यानां प्रतीपाः शत्रवः देवा तेषां दृक्दृष्टिः पुरभेत्तुः शिवस्य निखिलेषु प्रतीकेषु अङ्गेषुगतासती अयणं क्वचिदपि कस्मिंश्चिदंगेपि न प्रतीतवती क्वचिदपि न सम्यक्स्थितावित्यर्थः अथ तैर्देवैः साद्दृष्टिः शिवस्य पादयुगं प्रतिईरिताप्रेरिता पादावेवाश्रितवतीति भावः अंगंप्रतीकोवयवइत्यमरः ॥ २८ ॥

अथ वीक्ष्य शिवोऽपि वेधसं
परितो देवगणैः परीष्टतम् ।
उदतिष्ट दऽतीवसंभ्रमा-
दभिगंतुं हिमगुं यथाऽम्बुधिः ॥ २९ ॥

"अथेति" अथानन्तरं शिवोपि परितो देवगणैः परीवृतं ब्रह्माणं वीक्ष्य अभि संमुखं गन्तुं अतीवसंभ्रमात् उदतिष्ठत् कंकइव हिमगुं चन्द्रं अभिगन्तुं समुद्र इव ॥ २९ ॥

अभितान् क्रममाण ईश्वरो
ऽतिशयस्नेहवशा त्स्खलन्न ऽपि ।
मिथ ईक्षणरश्मिसंतति
दृढिमाकृष्टतनु र्न चाऽस्खलत् ॥ ३० ॥

"अभीति" तान् ब्रह्मादीन् प्रतिक्रममाणः पादविक्षेपं कुर्वाणः स ईश्वरः अतिशयस्नेहस्य प्रेम्णः वशात् स्खलन्नपि न अस्खलत् न स्खलितवान् कुतो नास्खलत् इत्याह कीदृशः ईश्वरः मिथः परस्परं शार्ईक्षणानां दृष्टीनां रश्मि संततिः किरणपरंपरा रज्जुपरंपरा वा तस्याः योदृढिमादृढत्वं तेन आकृष्टः संयमितः तनुरात्मा यस्य सः अन्योपि स्नेह इत्यत्र तैलादेर्वशात् स्खलन्नपि रश्मि भिः रज्जुभिः आकृष्टशरीरः सन् न स्खलति स्नेहःप्रेम्णिघृतादिके इति हेमः रश्मिः पुमान्दीधितौसप्तान्यमयपक्ष्मयोरपीति च ॥ ३० ॥

सकलं जग देकदेशितां
भजतीदं प्रलये यदात्मनि ।
न च तत्र ममौ पितामहा-
गमजो नून मऽहो महामहः ॥ ३१ ॥

"सकलमिति" यस्य शिवस्य आत्मनि शरीरे प्रलयकाले इदं सकलमपि जगत् एकदेशितां भजति नतु सर्वशरीरव्यापीत्यर्थः तस्मिन् आत्मनि पितामहस्य ब्रह्म णः आगमनजन्यः महामहः महोत्सवः महोआश्चर्यं नममौ चतुर्दशभुवनपर्या प्ते वपुषि उत्सवोतनं ममावित्यतिशयोक्तिः मह उद्धवउत्सव इत्यमरः ॥ ३१ ॥

अथ संवयते करौ विधिः
पतितुं याव दुमेशपादयोः ।
परिपीड्य हरेण तत्करौ
सुचिरं ताव दरं स सस्वजे ॥ ३२ ॥

"अथेति" अथ यावत् विधिर्ब्रह्मा शिवपादयोः पतितुं करौ संवयते एव तावत् शिवेन तस्य ब्रह्मणः करौ परिपीड्य अरं शत्वरं सुचिरं सस्वजे आलिं गितः ॥ ३२ ॥

स्फुरिताच्छनिजच्छवी मिथः
सुतरां प्रेमनिबद्धचेतसौ
परिरब्धकलेवरौ मिथो
ददृशाते स्फुटमेकतां गतौ ॥ ३३ ॥

"स्फुरितेति" तदा तस्मिन्काले तौ शिवब्रह्माणौ एकतां एकरूपत्वं प्राप्तौ दृष्टौ देवैरिति शेषः ऐक्ये हेतुमाह कीदृशौ मिथः स्फुरिते अच्छे निर्मले निजे छवी दीप्ती ययोस्तौ शिवस्य गौरवर्णत्वात् ब्रह्मणोरक्तवर्णत्वात्परस्परं स्फुरित दीप्तित्वादेकरूपता जातेति भावः तथा सुतरां निरंतरं मिथः प्रेम्णा निबद्धं चेतो य योस्तौ तथा मिथः आलिंगितशरीरौ ॥ ३३ ॥

प्रणतानऽथ देवतागणान्
सुदृशैवा ऽति तरां प्रसादयन्
अभि धाम हरो निनाय तान्
हरिमुख्यानऽतिथीन् गृही यथा ॥ ३४ ॥

"प्रणतानिति" अथहरः प्रणतान् इंद्रमुख्यान् देवगणान् सुदृष्ट्यैव नितरां प्रसादयन् धामनिजमंदिरं प्रतिनिनाय कथं यथा अतिथीन् गृहीगृहस्थः ३४

यदऽधिष्ठितवान् स्वयंभुवा
सह सिंहासनमुच्चकै हरः
कनकाऽचलमस्तकस्य भा-
मजयद्भानुविधुश्रितस्य तत् ॥ ३५ ॥

"यदिति" यत्सिंहासनं स्वयंभुवाब्रह्मणा सह हरः उच्चैः अधिष्ठितवान् तत् सिंहासनं भानुविधुभ्यांश्रितस्य सुमेरुशृंगस्यभांदीप्तिं अजयत् अभि भावितवा नित्यर्थः हिरण्मयत्वात्सुमेरुशृंगेन सिंहासनसाम्यं भानुनाच ब्रह्मणः चंद्रेणच शिवस्य ॥ ३५ ॥

परिपृछ्य शिवं शिवो विधिं
सकलामर्त्त्यविसारि चारुदृक् ।
तत आगमनप्रयोजने
कृतवान् प्रश्नमुदंचदाननः ॥ ३६ ॥

"परिपृच्छ्येति" शिवः विधिं शिवंकल्याणं परिपृच्छ्य ततः सकलेषुश्रमर्त्येषु देवेषु विसारिणो प्रसरणशीलादृक् यस्य सः सर्वान्देवान्पश्यन्नित्यर्थः आगमन प्रयोजनप्रश्नंकृतवान् किमर्थंयूयमागताइतिपृष्टवान् कोदृशः शिवः उदंचत् प्रकाशमानं आननंमुखंयस्यवृच्छतेर्द्विकर्मकत्त्वात्कर्मद्वयं शिवो मोक्षे महादेवे कोलकग्रहयोगयोः सुखे क्षेमे जले क्लीवमितिविश्वः ॥ ३६ ॥

इति तैर्नतकंधरैः सुरैः
परिपृष्टे मदनारिणा स्वयम् ।
वदनं परमेष्ठिनोऽथ तन्
महसा मुद्रितवाग्भिरीक्षितम् ॥ ३७ ॥

"इतीति" तैर्नम्रग्रीवैः सुरैः इति मदनारिणाशिवेन स्वयंयदापरिपृष्टैः तदा तस्यशिवस्य महसातेजसा मुद्रिताः मूकीभूताः वाचोयेषांतैः परमेष्ठिनः ब्रह्मणः वदनंमुखं ईक्षितंदृष्टं त्वमेवोत्तरंदेहि नवयंशक्ताइतिदर्शनाभि प्रायः ॥ ३७ ॥

द्रुहिणोऽप्यनुभूय नाकिनां
अकिनां भावमथो पिनाकिनम्
प्रतिवक्तुमना मनाक्पदां
बहुलार्थां समुपाददे गिरम् ॥ ३८ ॥

"द्रुहिणोपीति" ब्रह्मापितेषां अकिनां दुःखिनां देवानां भावं दर्शनाभि प्रायं अनुभूय पिनाकिनंशिवंप्रति वक्तुमनाः सन् गिरंवाचं समुपाददे कीदृशीं मनाक् ईषत्पदानि यस्या तथा बहुलोऽर्थोयस्यांतां ॥ ३८ ॥

भजते मनसा सहैत्य नो
त्वयि गुंफोऽपि गिरां सकुण्ठताम्।
श्रुतयोऽपि भयेव नेतिने-
त्यनुलापान्बहुधा प्रकुर्वते ॥ ३९ ॥

संप्रति स्वाश्रयंविज्ञापयितुं तावत्स्वरूपतटस्थलक्षणाभ्यां प्रतिपाद्यं स्तोति "भजतेइति" हे शिव गिरांवाचां गुंफोरचनाविशेषोपि त्वयिविषये मनसा सहनैत्य न प्राप्य कुंठतां निष्फलितांभजते यतोवाचोनिवर्त्तंतेअप्राप्यमनसा सहेतिश्रुतेः ननुसत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुतिभिः कथंविषयीक्रियते इत्याह श्रुतयोपि भियाभयेनेव नेतिनेति अथातआदेशोनेतिनेति नेह्नानाऽस्ति किंचनेति अनुलापान् मुहुर्भाषाः बहुधाबहुविधान् प्रकुर्वते तदुक्तं महिम्नस्तवे अतीतःपंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्यायं चकितमभिधत्ते श्रुतिरपीति अन्योविभयवक्तः नेतिनेतिवदति अतएव भयेपुनरुक्तिः अनुलापोमुहुर्भाषेत्यमरः ॥ ३९ ॥

न च यत्र विभातिभानुमान्
न तडिन्नो डुपतिः कुतोऽनलः।
स्वय मेव विभासि भासय-
स्यखिलां भासुरसंहतिं पुनः ॥ ४० ॥

स्वयं प्रकाशतांप्रकाशयति "नचेति" यत्रत्वयि भानुमान् सूर्यो न विभाति तथा तडित् विद्युदपि न विभाति तथाउडूनां नक्षत्राणां पति चंद्रोपि न विभाति तर्हिंअनलःअग्नि कुतःप्रकाशयेत् अयच हेशिव त्वं स्वयमेव विभासि प्रकाशसे पुनश्च अखिलानामपि भासनशीलानां सूर्यादीनां संहतिं समुदायं भासयसि

प्रकाशयसि अयमर्थः तव महाप्रकाशात्मकत्वात्त्वमेव विश्वंभासयसि नत्वांकोपि भासयितुमलमिति उडुपतीत्यनेन उडूनामपिग्रहणं तथा च श्रुतिः नतत्रसूर्यो भातिनचंद्रतारकं नेमाविद्युतोभांति कुतोयमग्निः तमेव भांतमनुभातिसर्वं तस्य भासा सर्वमिदं विभातीति ॥ ४० ॥

त्वमऽसि प्रकृतेः परः पुमान्
परिपूर्णप्रथितप्रथामयः ।
महिमा तव कालदिक्प्रभृ-
त्यपरिच्छिन्नतनु विराजते ॥ ४१ ॥

"त्वमसीति" हे शिव त्वंप्रकृतेः त्रिगुणमयात्मूलकारणात् परः पुमान् सांख्यप्रतिपाद्यपुरुषोसि तदुक्तंविज्ञानचंद्रिकायां विश्वसृष्टिनिशिवात्मनीश्वरे पूरणात्पुरुषतामुपेयुषि येमनः प्राणिदधुर्महर्षयस्तान् पतंजलिमुखानुपास्महे इति पुरुषएवेदंसर्वमितिश्रुतिः कीदृशस्त्वं परिपूर्णाविश्वविषयिणीप्रथिता विश्वविषयितयाप्रसिद्धेत्यर्थः याप्रथा प्रमितिर्ज्ञानमितियावत् तन्मयःतद्रूपः सर्वज्ञ इत्यर्थःतवसर्वज्ञत्वात्त्वमेव सर्वान्बोधयितुमर्हसि नत्वांकोपि बोधयितुमलमित्यर्थः अथ च तवमहिमामहत्वं कालदिक् प्रभृतिभ्यः कालदेशवस्तुभ्यइत्यर्थः अपरिच्छिन्नापरिच्छेदरहिता तनुरात्मायस्यताहृशः सन् विराजते सर्वोपरिवरीवर्त्तते नित्यत्वात्कालपरिच्छेदशून्यत्वं विभुत्वाद्देशपरिच्छेदशून्यत्वं सर्वात्मकत्वाद्वस्तु परिच्छेदशून्यत्वं वेदाहमजरंपुराणं सर्वात्मानंसर्वगतंविभुत्वादिति श्रुतिः ४१॥

तव देव सिसृक्षतः पुनः
स्वमनस्कारसवोद्गमो हि यः ।

परिणाम मितस्तरङ्गवत्
प्रकृतित्वेन पयोनिधे विभो ॥ ४२ ॥

एवंस्वरूपलक्षणमुक्त्वा संप्रति तटस्थलक्षणमाह "तवेति" हे देव विश्वरच नाक्रीडाव्यवहारपर पुनस्तदनंतरंसिसृक्षतः स्रष्टुमिच्छतस्तव स एव एकोऽहं बहुस्यामितिसिसृक्षारूपः स्वमनस्कारस्य चित्ताभोगस्य लवः लेशः तस्यउद्गमः उत्थानं प्रकृतित्वेन प्रकृत्यात्मकतया परिणामं इतः प्राप्तः परिणामोनाम उपा दानसमसत्ताकोऽन्यथाभावः अत एव तुल्यंदृष्टांतमाह पयोनिधेः समुद्रस्यतरंग वत् यथासमुद्रोत्थितस्तरंगः समुद्रसत्तामपि नत्यजति अन्यथा च भवति मनसः कारः व्यापारविशेषः मनस्कारः चित्ताभोगोमनस्कार इत्यमरः ॥ ४२ ॥

तव सन्निधिमात्रतः पुनः
सृजतीदं त्रिगुणं जडाऽपि सा
खलु चुंबकसन्निधानतः
चलनं-तत्क्षणतोऽयसो भवेत् ॥ ४३ ॥

तस्याः कार्यमाह "तवेति" साप्रकृतिर्जडापि तवचैतन्यात्मनः सन्निधिमा त्रतः नतुसंगतइतिमात्रपदेनबुध्यते असंगोह्ययं पुरुषइतिश्रुतेः पुनः आदौत्रिगु णं सत्वरजस्तमइतिगुणत्रयात्मकं इदंजगत्सृजति अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां नमाम इतिश्रुतेः ननुजडायाः सृष्टिव्यापारः कथंसंजा घटीति न च तवचैतन्यात्मनः सन्निधिमात्रतइतिपूर्वमुक्तमेवेतिवाच्यं चैतन्यसं निधेर्जडसव्यापारदर्शनात् अन्यथाजीवतः संनिधेः शवस्यापि गतिवचनादि कंस्यादित्यःशंकानिराकरणायदृष्टांतमाह खल्विति लोकप्रसिद्धमेवेतत् चुंबकम णिसन्निधानतः संनिधिमात्रतएव जडस्यापि अयसः लोहस्य तत्क्षणतएवचल नंभवेत् अतोनिश्चितंचैतन्यसंनिधेर्जडव्यापारइति ॥ ४३ ॥

अथ सन्निहितस्य ते तया
त्रिगुणस्याऽपि गुणित्व मिष्यते
सुरपादपपुष्पसंनिधेः
स्फटिकस्य स्फुटशोणिमा यथा ॥ ४४ ॥

नकेवलं तत्संनिधेः तस्यामेव तत्स्वरूपचैतन्यापत्तिः किंतुसंनिधेरुभयाश्रितत्वात्तत्संनिधेस्तत्स्वरूपस्यत्रिगुणस्यतुव्यप्यभिनिवेश इत्याह "अथेति" अथानतरं तया त्रिगुणमय्याप्रकृत्या सन्निहितस्यसन्निधिंभजतः तेतव त्रिगुणस्यत्रिगुणविरहितस्यापि गुणित्वंसगुणत्वं इष्यते अध्यास्यते नतुवस्तुतइत्यर्थः अत एवदृष्टांतमाह यथासुरपादपस्यअशोकस्य पुष्पसंनिधेः विशदस्यापि स्फटिकस्य स्फुटं प्रकटएव शोणिमारक्तत्वं भाति वस्तुतस्तु न कालत्रयेपि तत्र रक्तत्वसंभवः किंतूपाधिकृतएवेतिभावः तथोक्तंप्रबोधचंद्रोदये स्फटिकमणिवच्छस्वान्देवः प्रगाढमनार्यया विकृतिमनया नीतः कामप्यसंगतविक्रियः नखलुतदुपश्लेषादस्यव्यपैतिरुचिर्मनाक् प्रभवतितथाप्येषा गाढंविधातुमधीरतामिति ॥ ४४ ॥

तव दक्षभुजादहं पुरा
जनितः सव्यभुजा च्चतुर्मुखः
मम मस्तकतस्त्वदंशजो
हर आविर्भवनं चकार सः ॥ ४५ ॥

एवं सगुणत्वे प्रतिपादिते तस्माद्वा एतस्मादात्मन आकाशः संभूत आकाशाद्वायुरित्यादिश्रुतिभिःसाधारणेनाकाशाद्यंतर्वर्त्ति ब्रह्माद्यऽखिलजगदुदानत्त्वे च स्वयमेव ज्ञाते तत्र विशेषतोपि संप्रतिविष्णुं प्रतिचोपादानतां स्मारयति "तवेति" हे शिव पुराद्यादौतवदक्षभुजात् अहं ब्रह्मा जनित

सव्याद्वामाङ्गाच्च चतुर्भुजःविष्णुर्जनितः तथाचलिंगपुराणे ब्रह्मविष्णुप्रतिशिव वाक्यं अयंमेदक्षिणे पार्श्वंब्रह्मालोकपितामहः वामपार्श्वे च मेविष्णुर्विश्वात्मा हृदयोद्भव इति ननु पुराणेभ्यः श्रूयते ब्रह्मणोमस्तकाच्छिवोजात इति किं वैपरीत्यमुच्यते अतआह सत्यमेतत् सहरः मम मस्तकतएव आविर्भवनं प्रादुर्भावं चकार नतुजातइत्यर्थः प्रादुर्भावोहि सत एव जायते यथादोहनेन गोषु पयसः कीदृशोहरः त्वदंशाज्जातः नतुसोपिसाक्षात्त्वमित्यर्थः मदनुग्रहाय मम मस्तकतोंशेनावतीर्णोसीतिभावः इदमपि यथेतिहासं शिवपुराणादवगंतव्यम् ॥ ४५ ॥

त इमे परवंत एव ते
जननादीनि विधेम सर्वदा ।
न वयं स्वय मीश्महे कदा
रहिताः सूत्रभृते व पुत्रिकाः ॥ ४६ ॥

ननु मयेवरचिताः संतुयूयंस्थ्याद्यर्थं ततःकुरुतसृष्ट्यादिकं स्वस्वव्यापारं किंमयेति शंकानिरासायाह "तइति" ते इमे वयं ब्रह्मविष्णुहराः तेतव परवंतः पराधीनाएव जननस्थितिनिधनानिक्रमेण सर्वदाविधेमकुर्मः विपचेवाधकाम ! ह स्वयं त्वामनाश्रित्यतु ओष्टपुटविभागमपि कर्त्तुं, न कदापि ईश्महे न समर्थाः दृष्टांतमाह सूत्रभृता लोहसूत्रधारेण शैलूषेण रहिताः पुत्रिकाः सालभंजिका इव यथा जडाअपि सालभंजिकाःसूत्रभृताप्रेरिताःसचेतन्याइव स्वस्वव्यापारंकुर्वंति तेनरहितास्तुजडाएव स्यात्पुत्रिकापुत्तलिका दुहितो रिति मेदिनी ॥ ४६ ॥

भगव ञ्जगतां मनोगतं
निखिलं वेद यतोऽसि सर्ववित् ।
परिपृच्छसि नो मुहु र्यत
स्तदिदं भाति विभो विडंबनम् ॥ ४७ ॥

संप्रति प्रस्तुतमाह "भगवन्निति" हेभगवन् त्वं जगतां मनोगतं निखिल मपि वेत्सि यतस्त्वं सर्ववित् सर्वज्ञोसि यःसर्वज्ञःससर्वविदितिश्रुतेः हेविभो व्यापक एवं भूतोपि यतः मुहुर्मुहुः नः अस्मान् अल्पज्ञवत्कुशलादिकं परि पृच्छसि तदिदंतव विडंवनमेव भाति अत्र भगवच्छब्देनापि सर्वज्ञत्वंसूचितं तदुक्तं उत्पत्तिं च विनाशं च भूतानामागतिं गतिं वेत्तिविद्यामविद्यां च स वाच्यो भगवानिति जगतामिति बहुवचनं भूतभविष्यद्वर्त्तमानभेदे नोक्तम् ॥ ४७ ॥

अथवा भगवन् भवा न् चे
त्परिपृच्छेत्कुशलादिकं तु नः ।
अपरो ननु को गृहागतान्
बहुमंतुं महतः समर्चयेत् ॥ ४८ ॥

तर्हि ममायोग्यतापत्ति रितिशंकामऽपहर्तुमाह "अथवेति" हे भगवन् अथवापक्षांतरेचेद्यदि भवान् नः अस्मदादीन् गृहागतान् सर्वज्ञोपिसन् शिष्टाचारतया कुशलादिकं न परिपृच्छेत् तर्हि अपरः इतरोजनः गृहा गतान् महतः सत्पुरुषान् बहुमन्तुम् बहुमानंकर्तुं कः समर्चयेत् न कोपी त्यर्थः मत्सदाचारंदृष्ट्वा लोकोप्येवं कुर्यादित्याशयात्ते सदाचरणम् नत्वस्मत्प्र वदितिभावः तदुक्तं श्रीभगवद्गीतासु यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणं कुरुतेलोकस्तदनुवर्तते इति ॥ ४८ ॥

स्वय मेव मया कृतं तु य
त्तदिदं श्रावयितुं समुत्सहे ।
सुखरीकुरुते प्रविश्यमे
हृदयं य न्मुहु देववेदना ॥ ४९ ॥

पूर्वमनुपपद्यमान मुत्तरदानं संप्रति युक्त्योपपाद्य किमर्थमागता इत्य स्योत्तरमाह "स्वयमिति" हे शिव स्वयमेव मया पूर्वं यदपकृत्यं कृतं तदिदं वक्ष्यमाणं त्वां श्रावयितुं समुत्सहे ननुअर्थनाशं मनस्तापं गृहे दुश्चरितानिच वंचनंचापकृत्यं च मतिमान्न प्रकाशयेदिति शिष्टैर्निषिद्धत्वात्कथं स्वापकृत्यं प्रकाश्यते इत्याह हे मृड यद्यस्माद्धेतोः देवानां वेदनापीडा ममहृदयं प्रविश्य मां मुखरीकुरुते वाचालंकरोति देवपीडामसहमानएव प्रकटीकरोमि नत्वन्यथेतिभावः मृडयति सुखयतिमृडः इतिनिर्वचनात्त्वमेव देवपीडां निराकर्त्तुमलं नान्यइत्यन्यं प्रति प्रार्थनानिषेध सूचकं विशेषणम् ॥ ४८ ॥

महिषोऽस्ति महापराक्रमो
गणनीयो धुरि यो दुरात्मनाम्।
तपसा परितोष्य तेन मां
प्रमदातो वृतिरोंकृता पुरा ॥ ५० ॥

किंत्वयापकृतमित्यतआह "महिषइति" हे शिव महिषोनाम दैत्योस्ति कीदृशः महापराक्रमः यः महिषः दुरात्मनां धुरिगणनीयः यदायदादुरात्मनां गणनाक्रियते तदातदा समहिषोऽति दुरात्मत्वादग्रेगण्यते इत्यर्थः ननीदृक्प्रभावः कथंजातइत्यत आह पुरापूर्वंतेन महिषेण मां ब्रह्माणं तपसा परितोष्य प्रमदातः स्त्रीसकाशात्स्वमृतिः ओंकृता अंगीकृता प्रमदैवमांहन्यान्न पुमानिति तेन वृत्तमित्यर्थः इयमेवस्वापकृतिरितिभावः ओं प्रश्नोंगी कृतौ रोषे इति विश्वः ॥ ५० ॥

स विजित्य जगत्रयीश्वरान्
पुन रिंद्रं चिदिवाधिपत्यभाक्:

कृतकृत्य इवेश नित्यशो
ऽप्यपि मृत्यो र्गतभीः शमश्नुते ॥ ५१ ॥

"सद्गति" हे ईश समहिषः जगत्याः पृथिव्याः ईश्वरान् भूपान् विजित्य पुनस्तदनंतरं इन्द्रं च विजित्य नित्यशः नित्यमेव कृतकृतइव शंसुखं अश्नुते भुनक्ति कीदृशः त्रिदिवस्यस्वर्गस्य आधिपत्यं जुषतीतिसः तथामृत्योरपि गतादूरी भूता भीर्भयं यस्यसः ॥ ५१ ॥

सुख मिंद्रमुखा मखाऽशिनो
न जुषंते समरा त्पराङ्मुखाः
महिषप्रहृता मुहु र्मुहु
र्मुमुहु र्यत् स्वमहोभि रुज्झिताः ॥ ५२ ॥

"सुखमिति" इंद्रमुखाः मखाशिनः देवाः तस्यसमरात् युद्धात् पराङ्मुखाः पलायिताः सुखं नजुषंते नसेवंते नन्विंद्रादयोमहाबलाः कथंपलायिताइत्याह यत्यस्मात् रणे महिषेणप्रहृताः संतः मुहुर्मुहुः स्वतेजोभिस्त्यक्ताः सुमुहुर्मूर्छांप्रापुः ॥ ५२ ॥

करुणावरुणालयं वयं
तदमी त्वां शरणं समागताः
हरिणा इव वारणार्दिता
हरिणेंद्रं पुरतः सटा जुषम् ॥ ५३ ॥

"करुणेति" तत्तस्मात् अमीवयंदेवाः करुणावरुणालयं दयासमुद्रं त्वां शरणं

समागता: कांक्ष्य इव वारणेनगजेन मर्दिता: पीडिता: हरिणा: हरिर्येंद्र सिंह पुरत: अग्रे इव की० सिंहं सटाजुषं केसरवंतं त्वांचजटावंतं इत्यर्थ: व्रतिनस्तु जटासटेत्यमर: ॥ ५३ ॥

निखिलं खलु वेद यद्भवा
नल मुक्त्वा तदत: समाप्यते
परिपाहि यथाकथं श्रितान्
जनक: स्वांस्तनयानिवौरसान् ॥ ५४ ॥

"निखिलमिति" हेशिव यत्यस्मात् भवान् निखिलंवेत्ति तत् अलमुक्त्वा अन्यत्ववक्तव्यमित्यर्थ: अतोस्मात् समाप्यतेऽउपरम्यते किंवहुना यथाकथं येनकेनाऽपिप्रकारेण श्रितान् परिपाहि रक्षकान् कइव स्वान् औरसान् तनयान् जनकइव पितेव अलंखल्वो: प्रतिषेधे क्त्वा अलमुक्तेति ॥ ५४ ॥

इति वाच मुदीर्य धैर्यवा
नमराम्रेडितसाधुसाधुवाक्
स्फुरदोष्टपुटेऽथ वाङ्मुखे
सति शंभो विरराम विश्वसृक् ॥ ५५ ॥

"इतीति" सविश्वसृक् ब्रह्मा धैर्यवान् इतिवाचमुक्त्वा विरराम कीदृश: अमरै: आम्रेडिता द्विविरुक्ता साधुसाध्वितिवाक् यस्यस: साधूक्तमिति देवैरुक्तइत्यर्थ:क्वसति शंभोवाङ्मुखे वाचंगदितुमुन्मुखेसति अतएवस्फुरत् ओष्टपुटोयस्मिन्,मुन्मुखस्य ओष्ट: स्फुरति आम्रेडितंद्विस्त्रिरुक्तमित्यमर: ॥ ५५ ॥

अथ देवगणा महेशितुः
प्रतिवक्तु र्वदनेक्षणोत्सुकाः
अपतन्निव दातु रर्थिनः
सहसाऽग्रस्समुपर्युपर्यरम् ॥ ५६ ॥

"अथेति" अथानंतरंप्रतिवक्तुः उत्तरंदातुःशिवस्य सुखदर्शनोत्सुकाः कथंगदिष्यतीत्युत्सुकाः देवगणाः सहसाशीघ्रं स्वस्वादग्रेस्थितंदेवं उपरि उपरि अपतन् कस्यकइव दातुः अर्थिनइव यथादानकर्त्तुर्मु खदर्शनोत्सुकाः याचकाः अग्रस्थं याचकमुपर्यु परि पतंति तद्वदित्यर्थः अत्रोपर्यु परियोगेद्विती या तदुक्तं अभिसर्वतसोःकार्याधिगुपर्यादिपुत्रिषु द्वितीयाम्रेडितांतेषु ततो नत्रापिदृश्यतेइति ॥ ५६ ॥

अथ वाचमुवाच शङ्करः
शृणु धात र्वरमेत मन्यथा
अपिकर्तु मह न शक्नु या
मलिकस्या मिव ते परांलिपिम् ॥ ५७ ॥

"अथेति" अथशिवः वाचमुवाच हेधातः मद्वचः शृणु किमित्याह एतंत्वया दत्तंवरं अन्यथाकर्तुमहमपि नशक्नुयां पुरुषादपितसास्मत्युः सत्रादितिकर्तुं नसमर्थोस्मीतिभावः कामिव अलिकस्यां सर्वजनललाटलिखितां तवपरांलिपि मिव यथाललाटस्थाविधातुर्लिपिर्नशक्यतेऽन्यथाकर्तुं तथावरोपीत्यर्थः ललाट मलिकंगोधिरित्यमरः ॥ ५७ ॥

अवला वद का वलीयसी
मम वा ते प्ययवा रमापतेः

सह तेन रणे भवेद्ऽलं
रणनाम्नोऽपि भयंविभर्त्तिया ॥ ५८ ॥

स्यादेतत् पुमान् हन्यात् तर्हि काचिद्दलवतीप्रमदैव विचिंत्यतामित्याह "अवलेति" हेब्रह्मन् वदकथय इहलोके साका अवला नामतएववलहीना स्त्रीवलीयसी वलिष्ठास्ति या तेनमहिषेण रणे अलंसमर्थास्यात् या च स्त्रीरणस्य नाममात्रतएव भयंविभर्ति तर्हि कास्त्रैर्युद्धकरणवार्त्ता विशेषतस्त्वस्माकमेव स्त्रियउत्कृष्टागण्यंते नचतासामपि शक्तिरितआह ममअवला पार्वती तव च सरस्वती रमापते विश्नोर्वलक्ष्मीरपि किंसमर्था नेत्यर्थः ॥ ५८ ॥

अहह सह महोभिर्लुंठितं नाकराज्यं
सममऽपि सुखपुंजैर्निर्जितं रत्नजातम्।
अपि सह सवभागैरंगनास्तेन भुक्ता
वत तव वरदानात्सर्वहन्दारकाणाम् ॥ ५९ ॥

अथतत्कृत्येपश्चात्तापंकरोति "अहहेति" खेदेहे ब्रह्मन् तेनमहिषेण तववरदानात् सर्वदेवानांतेजोभिः सह स्वर्गराज्यं लुंठितंचोरितं तथा तेन तेषां सुखपुंजैः समंसह रत्नजातंनिर्जितं ऐरावतादीनि सर्वाण्यपि रत्नानि जितानीत्यर्थः तथा तेषां यज्ञभागैः सह अङ्गनाः अप्सरसः भुक्ताः यज्ञभागा भुक्ताः अभ्यवहृताः अप्सरसश्च भुक्ताः रत्यादूषिता इत्यर्थः सहोक्तिरलंकारः अहहेत्यद्भुतेखेदे इति हैमः ॥ ५९ ॥

पटीयानस्त्रे तत्प्रति हतिविधौ कैटभरिपुः
पुरा तेनेदृक्षाः परिमितिविहीना विनिहताः।

अतः सर्वे यातुं प्रयतत विकुंठं प्रति सुरा
मुरारि र्यत्रास्ते जलधितनयालिङ्गिततनुः ॥ ६० ॥

अथ किं व्यतीतस्यशोकेन संप्रत्युपायः कथ्यतामितितदाश्रयंबुद्ध्वाह "पटीयानिति" एतस्यदुःखस्यप्रतीकारविधाने विष्णुरेवपटीयान् अतिचतुरोस्ति यतस्तेनविष्णुना पुराईदृशाः महिषसदृशाः अपरिमिताः असंख्याताः विनिहताः अतः अस्मात्कारणात् सर्वेपि यूयंदेवाः विकुंठंप्रतियातुं प्रयतत यत्नं कुरुत यत्रविकुंठे मुरारिः आस्तेआसीनोस्तिकीदृशः जलधितनयया लक्ष्म्या आलिंगितातनुर्यस्य सः एतेनस्वाभीष्टसिद्धिः सूचिता मुदितोहिसर्वंसंपादयति यद्वालक्ष्म्याविनातस्यवरदानादावशक्तत्वात्सशक्तिता सूचिता तदुक्तंमानसोल्लासे येपिब्रह्मादयोदेवाभक्तेभ्योवरदायिनः त्वद्भ्रूभंगशक्तिमादायभवंति च वरप्रदा इति कैटभरिपुमुरारीति विशेषणद्वयंपुरातेनैदृशावहवोहता इति वाक्यसाफल्याय अशमिवद्दृश्यते इतोदृशाः दृशेटक् सकोपमाने कार्ये इति सकृपदेरूपम् इदम् शब्दस्यचेशादेशः ॥ ६० ॥

श्रीमान् शम्भो स्वरणसदनीभूतहृत्कुम्भनाथो
लक्ष्मीनाथं कविपरिदृढं देशको सूतयं माम् ।
तेनोद्गीते महिषनिधने गीतलक्ष्मीचरित्रे
लक्ष्मीकाव्ये विरतिमगमत्सर्ग एषोऽग्नितुल्यः ६१ ॥

श्री मानित्यादि पूर्ववत्स्पष्टम् अग्नितुल्यस्तृतीय इत्यर्थः दक्षिणाग्निर्गार्हपत्याहवनीयावयोग्नय इत्यमरोक्तः ॥ ६१ ॥

इति तृतीयः सर्गः ॥ ३ ॥

इति श्री महास्वामिवंशावतंस श्री मच्छंभुनाथात्मजलक्ष्मीनाथ विरचि
तायां लक्ष्मीकाव्य व्याख्यायां

⇔ तृतीयः सर्गः समाप्तः ⇔

अथ महेशवचः प्रतिपद्य ते
विधिविलंबितमंजुकरांबुजम् ।
ययु रयाय विधाय तमग्रणीं
नगनिकेतमकेतनविष्टपम् ॥ १ ॥

ओं नमो विघ्नहर्त्रे अस्मिन्सर्गे वैकुंठलोकगमनं वर्णयिष्यते "अथेति" अथा नंतरंतेदेवाः महेशस्यवचः वैकुंठगमनोपदेशरूपं प्रतिपद्यप्राप्य तमेवमहेशं अग्रणीं विधाय नगेषुवृक्षेषुनिकेतनंगृहंयस्य सः पक्षीगरुडः सः केतनेध्वजेयस्य विष्णोः विष्टपंभुवनंवैकुंठाख्यं प्रति ययुः यातुमिच्छां च चक्रुरित्यर्थः कस्मैप्रयोजनाय अयाय शुभावहविधये कीदृशं तं महेशं विधिनाब्रह्मणाअवलंबितं आश्रितं मंजुसुंदरंकरांबुजंयस्यतं वष्टिभागुरिरल्लोपमवाप्योरित्यल्लोपः अयः शुभावहोविधिरित्यमरः केतनंध्वजमस्त्रियामिति च अस्मिन्सर्गे नवतदीयेति यावद्द्रुतविलंबितवृत्तम् द्रुतविलंबितमाहनभौभराविति लक्षणात् अंतयमकालंकारश्च ॥ १ ॥

शिखरिकूटसमुच्छ्रितपीवरे
ककुदि वेल्लितसुंदरकंधरम् ।
रसनया परिमृष्टतनुं मुहुः
सुधवलं धवलंपटचेतसम् ॥ २ ॥

"शिखरीति" युग्मं तावद्द्वितीयपद्योत्तरार्धव्याख्या अथशिवः स्वयंवृषभं आरुरुहे किं कुर्वन् तं वृषभं शिवकरेण सुखकरेण हस्तेन परिमृशन् कीदृशं वृषभं ककुदिग्रीवोपर्युच्छ्रितांगविशेषे वेल्लिता कुटिलीकृता सुंदराकंधराग्रीवा येनतं कीदृशेककुदि शिखरिकूटवत् पर्वतशृंगवत् समुच्छ्रिते तुंगे पीवरेस्थूले

च पुनः कीदृशं वृषभं रसनया जिह्वया परिकृष्टालीढातनुर्येन तथा सुधवलं गौर वर्णं तथा धवेभर्त्तरि शिवे लंपटं चेतो यस्य तं ॥ २ ॥

तनुरुहावलिवेपथुतर्ज्जिता-
ऽप्रकटदंशचयं वरकंबलम् ।
वृषभमारुरुहेऽथ शिवः स्वयं
शिवकरेण करेण परिस्पृशन् ॥ ३ ॥

पुनः कीदृशं "तन्विति" तनुरुहावलेः रोमपंक्तेः वेपथुनाकंपेन तर्जिताः तिरस्कृताः अप्रकटानां सूक्ष्माणां दंशानां अल्पमक्षिकाजातीनां चयाः समूहा येन तं तथा वरः श्रेष्ठः कंबलः सास्ना यस्य तं ककुद्वत्ककुदः श्रेष्ठवृषांगे राज्यल क्ष्मणोति विश्वः कंबलोनागरा जेस्यात्सास्नाप्रावारयोर पीति च वेल्लितं कुटिलं भुग्नमित्यमरः अथ वेपथुः कंप इति च अत्र वृषभस्वभाव वर्णनात्स्वभावोक्तिः ३।

अथ कथा विविधा विधिरूचिवान्
पथिजखेदहरा हरमुद्दिशन् ।
निजजनस्य दरः कतिधा नु किं
न भवता भवतापहृता हृतः ॥ ४ ॥

"अथेति" अथ वृषारोहणानंतरं ब्रह्मा शिवमुद्दिशन् मार्गजन्यखेदनाश काः बहुविधाः कथाः ऊचिवान् तास्कांश्चिदाह हे शिव निजजनस्य स्वभक्त स्य दरः भयं कतिधा अनेकविधः भवतापहृता संसारतापवयनाशकेन भवता

त्वया किं न हृतः हृतएवेत्यर्थः यदायदा स्वभक्तस्य भयंजातं तदातदा त्वया नाघितमेवेत्यर्थः ॥ ४ ॥

प्रमथनाथ पुराऽम्बुधिमंथने
प्रपिबता सकलं हि हलाहलम् ।
कृत महो भवतैव तदाऽवनं
दिविषदां विपदारितचेतसाम् ॥ ५ ॥

ननुकदाहृत इत्यत आह "प्रमथनाथेति" हे शिव पूर्वंसमुद्रमंथनकाले तदुत्थितं सकलमपि हलाहलं विषंपिबताभवतैव अहो आश्चर्यं तदाविपद्दारितचेतसांदिविषदां देवानां अवनं रक्षणं कृतंनान्येन ॥ ५ ॥

विशदशोणसितेतर सुत्रकैः
स्ववशनीतजगत्त्रितयं विभो ।
निजजनस्य गुणत्रयवद्द्रुतं
त्रयम ऽदाहि पुरां हि पुरा त्वया ॥ ६ ॥

"विशदेति" हे शिव पुरा त्वयैवपुरांनगराणांत्रयं त्रिपुरमित्यर्थः स्वभक्तस्य गुणत्रयवत् अदाहि दाहितं कीदृशंपुरत्रयंगुणत्रयं च एकं विशदं रजतमयत्वात् श्वेतंसत्त्वगुणमपि निर्मलत्वाच्छ्वेतं द्वितीयंतुशोणंतमस्वर्णमयत्वाद्रक्तं रजोऽपि रागात्मकत्वाद्रक्तं तृतीयंतु सितेतरं लोहमयत्वात्कृष्णं तमोप्यावरणात्मकत्वात्कृष्णं कौ० उभयं स्ववशेनोतंजगतांत्रितयंयेनतत् तदुक्तं लिंगपुराणे कांचनंदिवितत्रासीदंतरिक्षेचराजतं भुविलोहमयंचासीत्पुरंतेषां महात्मनामिति ॥ ६ ॥

भगवता प्यऽवनं क्रियते सदा
त्रिजगतां भवते व गदाभृता ।
बहुविधा न्विनिहत्य निशाचरान्
सदवतारवता रणमण्डले ॥ ७ ॥

"भगवतेति" भगवता गदाभृताविष्णुनापि भवतेवत्वयैव त्रिजगतां अवनं रक्षणं क्रियते किं कृत्वा युद्धमंडले बहुविधान् शंखासुरादीन् राक्षसान् हत्वा संतः शोभनाः मत्स्यादयोऽवताराः यस्यतेन ॥ ७ ॥

इति युवां जगतां परिरक्षणा-
नवरतव्रतधारणपारणाम् ।
क्षयपयोदजलै रपि तर्क्य ते
स्वय मिनौ यमिनौ न करिष्यथः ॥ ८ ॥

"इतीति" अमुनाप्रकारेणयुवां विष्णुहरौ जगतां परिरक्षण रूपनिरंतर व्रतस्य यद्धारणं तस्यांगभूतामपिपारणां क्षयस्यकल्पां तस्ययेपयोदाः पुष्करावर्त्त कादयोमेघाः तेषांजलैरपि न करिष्यथः इतितर्क्यंतेविचार्यंते प्रलयकालेपि जगद्रक्षाव्रतत्यागं न करिष्यथः तस्मिन्कालेपिस्वांतः प्रवेशनादिति भावः नन्वेवंविधेदुःखेकेनचित्प्रेरिता वावांनेत्याह कीदृशौयुवां स्वयमेवइनौ कर्तुमक र्तुमन्यथा कर्तुं च स्वयंप्रभूइत्यर्थः नन्वेवंचेतर्हि किं न स्वेच्छयातद्व्रतंत्यजाव इत्यत आह यमिनौ नियमवंतौ अङ्गीकृतपरिपालकावित्यर्थः ॥ ८ ॥

जय जये श शिवे त्व ऽनुलापिनी
दिविषदाम ऽय संहति मृच्छतोः ।

अनु ययौ नभ सीव भसंहति
हिमगभस्तिगभस्तिमतो स्तयोः ॥ ९ ॥

"जयेति" अथ देवानांसंहतिः हे ईश हे शिव त्वं जय जय इति उच्चकै मुहुर्भाषणशीलासती तयोः शिवब्रह्मणोः ऋच्छतोर्गच्छतोः सतोः अनुपश्चात् ययौ कयोः केव आकाशे चंद्रसूर्ययोर्गच्छतोः पश्चात्तारासंहतिरिव अभूतोपमेयम् ॥ ८ ॥

तत उदञ्चितपञ्चम उच्चकैः
परभृतैः समदै स्समुदीरितः।
श्रुतिरसायन मध्वरभोजिभिः
सुमधुरध्वनि रध्वनि शुश्रुवे ॥ १० ॥

"ततइति" तदनंतरं विकुंठलोकासक्तैः अध्वरंयज्ञं भोक्तुं शीलंयेषांतैर्देवैः अध्वनिमार्गे अतिशयेनमधुरः ध्वनिः शुश्रुवे श्रुतः कोद्दशोध्वनिः मदसहितैः परभृतैः कोकिलैः समुदीरितः उच्चारितः तथा उच्चकैः उदंचितः प्रकाशितः पंचमः स्वरोयत्र सः तथा श्रुत्योः कर्णयोः रसायनमिव सुखदत्वात् पंचमस्थान प्राप्तत्वात्पंचमः स्वरः तदुक्तं वायुः समुद्गतोनाभेरुरोहृत्कंठमूर्धसु विचरन्पंचमस्थान प्राप्तत्वात्पंचमउच्यते इति अन्यच्च पुष्पसाधारणे काले कोकिलारौति पंचममिति अनेन सर्वदैव तत्र वसंतऋतुरित्यपि सूचितम् ॥ १० ॥

सरलसालरसालतमालता-
लवलीकदलीबकुलालिभिः।
परिहृते विविशु स्त्रिदिवेश्वरा
उपवने पवनेरितनीरजे ॥ ११ ॥

"सरलेति" अथ देवाः विकुंठलोकस्य उपवने आराममेविविशुः कीदृशे पवनेनईरितानि आंदोलितानिनीरजानि कमलानि यस्मिन् तथा सरलादीनां वृक्षविशेषाणां आलिभिः पंक्तिभिः परिवृते ॥ ११ ॥

विकचपुष्पसुगंध मनुत्तमं
ह्यपि यतः परिगृह्य समीरणः।
मुकुलगर्भगसौरभलोभत
श्चलति मंदम ऽमंदमदप्रदः॥ १२॥

उपवनमेववर्णयति "विकचेति" यतः उपवनात् समीरणोवायुः अत्युत्तमं प्रफुल्लपुष्पसुगंधं परिगृह्यापि मुकुलानांअप्रफुल्लपुष्पाणां गर्भेउदरे गतस्यसौरभस्यसुगंधित्वस्यलोभतश्च मंदमंदंचलति कीदृशोवायुः अमंदंअनल्पं मदं ददातीति तादृशः अन्योपिलुब्धः बहिर्धनंप्राप्यापि गूढधनवांछया मंदमंदं चलति ॥ १२ ॥

मणिमयीषु महीषु महीयसा
प्रतिकृते विरहा न्महसा द्रुमाः।
ददृशिरे त्रिदशै रच्युतप्रभाः
स्वसदृशः सदृशः कुसुमैः स्फुटैः॥ १३ ॥

"मणीति" यत्रोपवने त्रिदशैः देवैः मणिमयीषु मणिभिः रचितासु महीषु भूमिषु जाताः द्रुमाः मणिजन्येन च महीयसा अतिमहता महसातेजसा करणेन तेषां प्रतिकृतेः छायायाः विरहात् अभावात् स्वसदृशाः निजतुल्याः ददृशिरेदृष्टाः देवाहिच्छायाविहीनाभवंति अन्यदपिदेवतुल्यतायांकारणमाह

कीदृशाः द्रुमः अमृतं जलं प्रकर्षेणपिबंतीतिताद्दृशाः देवा अपिअमृतंपीयूषं पिबंतीतिश्लेषेणतुल्यतातथास्फुटैः प्रफुल्लैः कुसुमैः सदृशः दृग्भिः सहिताः प्रफुल्लानिपुष्पाण्येवतेषांनेत्राणीत्यर्थः देवा अपि अनिमेषदृशोभवंतिइतितुल्यता प्रतिच्छायाप्रतिकृतिरित्यमरः अमृतं यज्ञशेषेस्यात्पीयूषेसलिले घृतेइति विश्वः प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटा इत्यमरः ॥ १३ ॥

सरससारसहंस परिष्कृतं सरसिजालिसमुल्लसदिन्दिरम्।
मुमुदिरेच्छमुदीक्ष्य सरःसुरा स्तलतिरोहित
रोहित मद्गुरम्॥ १४॥

"सरसेति"यत्रोपवने देवाः अच्छंनिर्मलंसरोवस्य मुमुदिरे कीदृशैः सरसैः रसिकैः सारसैः पुष्कराह्वैः हंसैश्चपरिष्कृतं अलंकृतं तथासरसिजालिभिः कमल पंक्तिभिः समुल्लसंतो इन्दिरालक्ष्मोर्यस्य तथातलेतिरोहिताः पिहिताः रोहिताः मद्गुराश्चमत्स्यविशेषायस्मिन् तत् रोहितोमद्गुरः शाल इतिझषभेदेष्वमरः ॥ १४ ॥

कुररकीर समीरणभोजिभुक् पिकचकोरकिकीदिविकोकगीः
सपदि यत्र जहार विलक्ष्य सा सुमनसां मनसा
सहिताः श्रुतीः ॥ १५ ॥

"कुररेति" यत्रोपवने कुरराः उत्क्रोशाः कीराः शुकाः समीरणंवायुंभोक्तुं शीलंयेषांतान् सर्पान् भुंजतेतेमयूराः पिकाः कोकिलाः चकोराः प्रसिद्धाः किकीदिवयः चाषाः कोकाश्चक्रवाकाः एषांपक्षिणांगोर्वाक् सुमनसां देवानां मनसासहिताः श्रुतीः स्वंप्रतिसपदिशीघ्रं विलक्ष्यजहार अतिमनोहरत्वादि तिभावः ॥ १५ ॥

अथ समीक्ष्य पुरंद्रुहिणो हरेर्नियतमुष्टिकृजूकृततर्जनी।
पुर मिदं हि सुरांसमदर्शयत्स बुबुधे विबुधैरपिचक्रिणः १६।

"अथेति"अथोपवनदर्शनानन्तरं द्रुहिणो।ब्रह्मा हरेः पुरंविकुण्ठं समीक्ष्य दृष्ट्वा नियतोबद्धोमुष्टिर्येन तथाकृजूकृता सरलीकृता तर्जनी अंगुष्ठपार्श्ववर्त्ति नी अंगुलिर्येन तथाविधः सन् सुरान्प्रति इदं पुरमित्येतावन्मात्र मेवांगुल्या-

निर्दिश्यादर्शयत् ननु हरेः पुरमिति हरेरपि नामोच्चरितवान् तदा विबुधैर्देवैरपि चक्रिणः चक्रधारिणः विष्णोः पुरमिदमिति तर्जनी सरलीकरणाभिनयादेव बुबुधे ज्ञातं इदंवल्गितिदर्शन कालेहि मुष्टिं बद्धा तर्जनी च सरलीकृत्यदर्श्यते तथैव च चक्रमपि धार्यते अतएव चक्रिणइत्युक्तम् ऋजूकृततर्जनीत्यवर्द्दूदं तस्य इयुवस्थान भिन्नस्योप सर्जनत्वेपि स्त्राकार्यं वक्तव्यमित्यु क्तेः पुंकार्याभावः ॥ १६ ।

पतति नासु सुपेत्य पुनर्जनो ऋति जनुः स्खलिले भववारिधौ ।
वदति यत्र मुदा परिदोलनै रिति निकेतन केतनसंहतिः १७

विकुण्ठमेववर्णयति "पततीति" यत्र विकुंठे निकेतनेषु गृहेषु केतनानां ध्वजानां संहतिः मुदा परिदोलनैः वायुना इतस्ततः कंपनैः इतिवदतीत्यु-त्प्रेक्षा इति किं अमुं लोकं कश्चिदपि जनः उपेत्य प्राप्य भववारिधौ संसार समुद्रे पुनर्नपतति कीदृशे मरण जन्म रूपाणि जलानि यस्मिन् अन्योपि नि-षेधं कुर्वन् शिरः कंपयति तदुक्तंश्रीगीतासु आब्रह्मभुवनाल्लोकाः पुनरावर्त्ति-नोर्जुन मामुपेत्यहिकौंतेय पुनर्जन्म न विद्यते इति ॥ १७ ॥

धृत रथाङ्गसरोजगदांबुजा विलसदाप्रपदीनवन स्रजः ।
अभिनवांबुदमंजुलकान्तयः कमलयाऽमलयाश्रितवक्षसः १८

धृतेत्यादियुग्मं तावद्द्वितीयपद्योत्तरार्धव्याख्या अत्र विकुंठे नैकेबहवः ननुमर्त्यं केपीतिवापाठः पुरौकसः पुरवासिनः आत्मनाशरीरेण हरितांविष्णुतां सादृश्यमुक्ति मित्यर्थः दधति बिभ्रति विष्णुतामेवप्रतिपादयति कीदृशाः हरि तालेन समानि पीतानि अंशुकानि वासांसि येषांते तथा धृतानि रथांगानि चक्राणि सरोजानि पद्मानि गदाः कौमोदक्याख्या अंबुजाः शंखाश्चयैस्ते तथा विलसत्यः आप्रपदीनाः पादाप्रपर्यंतलंबमानाः वनस्रजः वनमालायेषांते तथा अभिनवोयोंबुदः मेघस्तद्वत्सुंदराः कांतयोदीप्तयोयेषां तथा अमलया कमलया लक्ष्म्याश्रितंवक्षोयेषांते ॥ १८ ॥

अरविन्दोदरसोदरदृशो मुकुटकुण्डलमण्डनमण्डिताः ।
दधति नैकपुरौकस आत्मनाऽच हरितां हरितालसमांशुकाः १९

तथासरसिजं कमलं तदुदरस्यगर्भस्यसोदर्यस्समाना: शोभनाहग्ये येषां तथा मुकुटकुण्डलादिभिर्मंडनैर्भूषणैः मंडिता भूषिताः स्याविष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हियदित्यमरः आपादपर्यंतमालावनमालेति सामतंतिक लिंगः॥ १९॥

युग्मं न च तदीयतुला क्वचिदस्ति
य त्वदुपमित्यति कुण्ठित बुद्धिभिः।
इति य आजुहुवे त्रिदिवाधिपै
रपि विकुण्ठ विकुण्ठसमो ऽस्यसि॥ २०॥

"नचेति" यः लोकः देवैरिति आजुहुवे आमंत्रितःइतिकिं अयोतिकोमत्वा मंत्रणे हेविकुण्ठ त्वंविकुण्ठेनैवसमस्तुल्यासि त्वत्सदृशो उपमानांतरा भावात्स्व-यिस्वस्मिन्नेवोपमानोपमेयभावोस्तीतिभावः एतदेवाह कीदृशैर्देवैः यत् यस्मा-त्तस्यविकुण्ठस्य सम्बंधिनीतुलासादृश्यंक्वचिदप्यन्यत्रनास्तीत्यतः उपमांदातुं अतिशयेन कुण्ठितानिश्चलीभूताबुद्धिर्येषांतैः अत्र च विशेषेण अतिशयेन कुंठयति उपमादातुर्बुद्धिमितिसौच्छक निर्मितनिर्वचनादप्युपमानांतरव्यव-च्छेदोध्वनितः अनुपमाविकुण्ठलोकोस्तीतिनिष्कर्षः॥ २०॥

ना पन्न' विषमदशां विधे र्न विघ्नं ना
नूर्जस्विन मपि वर्चसा न हीनम्।
यत्रेंद्रप्रमुखसखाशिनो विनास्वं
नो रूपोज्झित मवलोकयांबभूवुः॥ २१॥

"नेति" यत्रविकुण्ठे इन्द्रादयो देवाः किमपि तत्तत्र विषमदशां कष्टदशां आपन्नं प्राप्तं नाऽवलोकयाँबभूवुः न दृष्टवः तथाविधेर्दैवस्य विघ्नं अधीनं न दृष्टः शुभाशुभकर्मणामभावात् तथा अनूर्जस्विनं बलहीनमपि न दृष्टः तथावर्चसातेजसापिहीनं न दृष्टः तथा रूपेण सौंदर्येणापि उज्झितं रहितं न दृष्टः परंतुस्वं आत्मानंविना आत्मानमेव विषमदशादिविशिष्टं तत्रदृष्ट-वंतवत्वमित्यर्थः तथा च विषमदशांमध्दिपापकारजन्यां प्राप्तं स्विदमत्वाहा-

विषमदशा विशिष्टत्वं श्लेषेणबोध्यं विषम शरवत् तथाविधैर्दृष्टस्य श्रुध्यणो श्रा श्रधीनं तथा तदपेक्षया बलहीनं तथवतेजोहीनं सौंदर्यरहितं च खात्मा नमेव दृष्टान्तत्वमित्यर्थः ॥ २१ ॥

यत्र च सुरुचिविज्वलिताशाच्छिद्रहीनहृदयाः खलु मुक्ताः।
मंदिरेषु खचिता वररीत्या निर्गुणा अपि
विभांति गुणाढ्याः ॥ २२ ॥

"यत्रेति" यत्रविकुंठे वररीत्या आवलीरीत्यामंदिरेषु खचिताः मुक्ताः मौक्तिकानि निर्गुणाः सूत्ररहिता अपिगुणाढ्याः सूत्रप्रोताइवभान्ति आवली रीत्या खचितत्वात् कीदृश्यः मुक्ताः स्वरुच्यानिजदीप्त्या विज्वलिताः आशाः दिशायाभिस्ताः तथाच्छिद्रेणरंध्रेण हीनं हृदयं मध्यं यासांतानिश्छिद्रा इत्यर्थः अथवा यत्रविकुंठे मुक्ताः सारूप्यादि मुक्तिं प्राप्ता जनाः स्वस्वमंदिरेषु खचितत्वात् निर्गुणाः सत्वादिगुणत्रयरहिता अपिवहिर्दृष्ट्या गुणाढ्याः सगुणा इव भांति कीदृशाः स्वरुचिप्रकाशितदिशः तेजोमयत्वात् यद्वा स्वरुच्यास्वाभि लाषयाविज्वलिताः प्रकाशिताः आशाः मनोरथायेषांते यद्यद्वांछंति तत्र तत्त देवाप्नुवन्तीतिभावः तथाच्छिद्रैर्दोषैः हीनं हृदयंयेषांते रुचिर्दीप्तौ च शोभा- यामभिषंगाभिलाषयोरिति विश्वः आशाकाकुभितृष्णायामिति च छिद्रंविवर- रंध्रवत् गर्तं दोषैरितिहेमः गुणोमौर्व्यांम प्रधाने सत्वादौ सूत्रइन्द्रिये इति च २२

विचित्ररत्नैर्घटितासु यत्र तुल्याकृतीनां पथिका वलीनां।
रथ्यासुतथ्यं परितः प्रयाणेकोवेदबिंबप्रतिबिंब भेदम् ॥ २३ ॥

"विचित्रेति" यत्रविकुंठे बहुविधरत्नैर्घटितासुरथ्यासु विशिखासु प्रति- बिंबेन तुल्याकाराणां पांथपंक्तीनां परितः प्रयाणे सर्वतोगमनकाले बिंबस्य प्रतिबिंबस्य च भेदंतथ्यं यथावत्को वेद को जानाति बिंबप्रतिबिंबयोर्गमना गत्यादिना तुल्यत्वात् अयंबिंबः अयं च प्रतिबिंब इति यत्र न बुध्यते इत्यर्थः ॥ २३ ॥

आद्यं यत्र सरस्सु कुंतलचयेकौटिल्य मुद्दीक्ष्यते
भ्रांतिर्लंपटता च भात्यलिकुले श्वेतास्समर्थ्याः कचाः।

नाभौ यत्र मृगीदृशांहि वलयोऽभावः सदातामसो
रथ्यायच सकर्दमामलयजैः कौचंपयोदुर्लभम् ॥ २४ ॥

"जाड्यमिति" यत्र विकुण्ठे जाड्यंशैत्यं परमेव उद्वीक्ष्यते नत्वन्येषु आद्यं मूर्खतास्तीत्यन्यथ्यवच्छेदोऽर्थाद्दृश्यते तथा यत्र पुंसांकेशसमूहेएव कौटिल्यंवीक्ष्यते नतुमनसु तथायत्र भ्रांतिर्भ्रमणं लंपटता च भ्रमरसमूहेएव भाति नत्वन्येषु भ्रांतिश्चित्तास्थैर्यं लंपटता च पदार्थेषु भाति तथा यत्र चमर्या एवकचाः श्वेताः संति नत्वन्येषां जराया ऽभावात् तथा यत्र मृगोदृशां स्त्रीणां नाभावेववलयः संति नतुमुखादिषु तथायत्रतामसः तमः संबंधी सदा अभावाः मत्यस्याभावोवर्तते नान्यस्य सर्वार्थसंपन्नत्वात् तथा यत्र रथ्याः विशिखाः मलयजैः चन्दनैरेवसकर्दमाः सपंकाः संति नतुरजोमिश्रित जलादिभिः यथा यत्र कौचं कुचजन्यं पयः क्षीरमेवपुनर्जन्माभावात् दुर्लभमस्ति नत्वन्यत् परिसंख्यालंकारः परिसंख्यानिषिध्यैकमेकस्मिन्वस्तुयंत्रणं श्लेषयः प्रटोपेषुनस्यांतेषुनतभ्रुवामितिलक्षणात् एतावानत्र भेदः लक्ष्येशाब्दोमिथः षष्ठत्वार्थ इति ॥ २४ ॥

इति मधुरिपुलोकं नाधितास्तोकशोकं
त मस्रत मिवमूर्त्तं वीक्ष्य नाकौकसस्ते ।
अथ घटित मनर्घै रत्नजाते र्हि निन्यु
भवन मवनिभर्त्तुर्दृश्यता मुज्ज्वलश्रि ॥ २५ ॥

"इतीति" अमुनाप्रकारेण ते देवाः नष्टीकृतानल्पशोकं तंविष्णुलोकं मूर्त्तंमूर्तिधरं परिच्छिन्नमितियावत् अमृतंमोक्ष मिवदृष्ट्वा अघ्यमूल्यैः रत्न जातैः रचितं वराहाद्यवतारैरनं तावतारेण वा अवनिं भूमिं बिभर्त्तीति तस्य विष्णोर्भवनं मंदिरं दृश्यतांमिन्युः ददृशुरित्यर्थः कोदृशंउज्ज्वलाश्रीः शोभायस्यतत् स्तोकाल्पक्षुल्लका इत्यमरः ॥ २५ ॥

कौदृग्वृ विघटयितु रदः कौशपाये रचिंस्यैः
किं वा रत्नैः स्वय मिह घनेस्या वतो भूयते च ।

यन्निर्माणं प्रति लवनवं चिन्तय न्विश्वकर्मा
मायानूह्या खलु मधुरिपोश्चेतसेति व्यरंसीत् ॥ २६ ॥

"तदेववर्णयति" कीदृगिति यस्यभवनस्यनिर्माणं रचनांदेवमध्येस्थित: विश्वकर्माचिंतयन् सन् चेतसाइतिमत्वाव्यरंसीत् विरराम इति किं खलु निश्चये मधुरिपोर्विष्णोर्मायाअनूह्या अतर्क्यास्ति अघटनघटनापटीयस्यामाय येवास्यघटनासंभवोनान्यथेति भाव: कीदृशं निर्माणलवंलवंलेशंलेशं प्रति नवंकिंचिंत्तयन्नित्याह यद: भवनं घटयितु: निर्मातु: बुद्धि: कीदृक् कीदृशी आसीत् अथ च स: निर्माता कै: उपायैर्निर्मितिसाधनै: आदौभवन मघटयत् कीदृशै: अचिन्त्यै: ये मयापि न चिन्त्यंते अथवाअस्यनिर्मातेव कोपिनास्ति किन्तु रत्नै: स्वयमेव इदममेत्यपरस्परंमिलित्वा आवलीभूयते स्म यंत्रीभूतं निखिलशिल्पकला कुशलोपि विश्वकर्मायंवीक्ष्य चकितो भूत्तर्हिकाऽन्येषां वार्त्तेतिभाव: ॥ १६ ॥

चरण मिव यदीयं भाति लग्ना समंतान्नि
खिलनिलयपंक्ति र्वीक्षितुं यस्य चाऽग्रम्।
कुटिल तरशिरोधि र्दूर मुद्भ्रांतदृष्टि:
करधृतकिरीटा देवतालि र्बभूव ॥ २७ ॥

अस्योच्छ्रायंवर्णयति "चरणमिति" यस्यभवनस्यसमंतात् सर्वापीतरा भवन पंक्ति: चरणमिवलग्नाभाति सर्वेभ्योप्यत्युच्छ्रितत्वात् अथ च यस्य भवनस्य अग्रंवीक्षितुं कियद्दूरमस्याग्रमिति द्रष्टुं देवपंक्ति: अतिकुटिलग्रीवा तथा दूरपर्यंतं उत् ऊर्ध्वंभ्रांता नतुप्राप्ता दृष्टिर्यस्या: तथा पतनाशंकया करै: सुदृढंधृता: किरीटा: मुकुटाययेतादृशीबभूवदृक्पथातीताग्रंभवनमित्यर्थ: २४

अथ जयविजयौ द्वौ संस्थितौ द्वारि दृष्ट्वा
धृतमणिमययष्टी विष्णुना संनियुक्तौ।
विजय सुहृज्जयाया कृय देवालि रूचे
गणयति हि सदार्त्त: शाकुनं तारतम्यम् ॥ २८ ॥

"अथेति" भवन शोभादर्शनानन्तरं देवपंक्तिः भवनस्यद्वारिजय विजयाख्यौ द्वारपालौदृष्टा कीदृशौ विष्णुना द्वाररक्षार्थसंस्थापितौ तथा धृते मणिमयेयष्टीयाभ्यांतौ तयोर्मध्ये विजयमेवाहूय वक्ष्यमानंऊचे जयं कस्मा-न्नाजुहावेत्यत आह कस्मै उरुजयाय विशेषेणजयोविजय इत्यर्थ त्वात् यतः आर्त्त दुःखितः जनः सदैव शाकुनंतारतम्य गणयति जयाह्वाने केवलं जयो भविष्यति विजयाह्वानेतु विशेषेणेति शकुनस्यतारतम्यंतविचारितमिति भावः ॥ २८ ॥

अयि विजयपतिं प्रति प्रयातु निजचरणेहि निधीयतां प्रयासः
इति विबुधशिरस्सु नुग्रह स्ते कथय समेत्य च नो
हरिं दिदृक्षून् ॥ २९ ॥

किमूचे इत्यत आह "अयीति" हे विजय पतिं विष्णुं प्रतिप्रयातुं त्वया निजचरणे एव प्रयासं श्रमोनिधीयतां स्थाप्यतां त्वयेवगम्यतामिति भावः ननुमेकासिद्धिर्भवितेत्यत आहुः इत्यर्थंगमनरूपः अनुग्रहः तवदेव शिरस्सु भविष्यति अथतत्र गत्वा किं विधेय मित्यत आहुः नः अस्मान् शिवादिदेवान् समेत्यमिलित्वा हरिं प्रति द्रष्टुमिच्छून् कथय त्वद्दर्शनार्थिनो देवा आगता इति कथय ॥ २९ ॥

अथो निदेशं परिगृह्य नाकिनां विलंघ्य कक्ष्यावहुशोरयान्वितः
जगाम सो न्तर्विजयो सुरद्विषं मुदा समाचष्ट
समागतान्सुरान् ॥ ३० ॥

"अथोइति" अथानंतरं स विजयः देवानां आज्ञां गृहीत्वा अथ च बहुशः कक्ष्याः विलंघ्य वेगयुक्तः सन् अन्तर्जगाम अथ गत्वा सुरद्विषं विष्णुं प्रति समागतान् सुरान् मुदासमाचष्ट ॥ ३० ॥

नारायणोऽपि शिवधातृसुखान्समेतो
नाकर्ण्य तूर्णतर मुत्थवपूर्णगात्रः ।

आघूर्णमाननयनो हृदि देववृंदं
प्राघूर्णिकीकृत मथे क्षितवान्क्षणं सः ॥ ३१ ॥

"नारायणोपीति" विष्णुरपिशिवधातृमुखान् सुरान् समेतान् आकर्ण्य शीघ्र तरं उत्सवेनपूर्णशरीरः अभूत् अथ च स विष्णुः किं चिन्मीलितनेत्रः सन् देववृंदंहृदिप्राघूर्णिकीकृतं अतिथीकृतं क्षणमात्रं ईक्षितवान् प्राघूर्णिकः प्राघविक इत्यमरः ॥ ३१ ॥

कुत्र कुत्र वद नाथ नाथ हे पृष्ट इत्यवलयाऽपिनैकधा ।
सम्भ्रमान्न ददद्दुत्तरं च तां निस्ससार बहिराशु शार्ङ्गभृत् ३२

"कुत्रेति" अथ शार्ङ्गभृत् विष्णुः अवलयालक्ष्म्या हे नाथ हे नाथ कुत्र कुत्र गम्यते इति वद इत्यनेकवारंपृष्टोति संभ्रमात् तांप्रतिउत्तरं न ददत् सन् शीघ्रंबहिर्निस्ससार हिरक्तानांजयादीनां च शतुर्गमनेति ददत् ॥ ३२ ॥

असुरभि सुमनःकदंबकंतत् हृदि विकचं चबहिःसमीक्ष्यतावत्
मधुहृदुरुमुदं समुच्छ्रयंतौ मथ शबलीकृतवाञ्शुचा
ऽपि पश्चात् ॥ ३३ ॥

"असुरभीति" यथामधुपुष्परसंहरतीतिमधुहृत् भ्रमरः सुमनसांकर्णिकारादि पुष्पाणांकदंबकंवृंदं तावत् आदौ बहिर्वाह्ये विकचं प्रफुल्लंसमीक्ष्य पश्चात् हृदिमध्ये असुरभिसुरभिरहितं वीक्ष्य अनुभूय आदौसमुच्छ्रयंतीं उपचीयमानांमुदंप्रीतिं पश्चात् शुचाशोकेनशवली करोति मिश्रितां करोति तथा मधुदैत्यंहरतीति मधुहृत् विष्णुः तत् सुमनसांदेवानांवृंदं आदौबहिर्मुखादींगितैर्विकसितंवीक्ष्य हृदि च असुरसंभ्रमहिमसा शोभयंयस्मिन् तादृशं वीक्ष्य सर्वज्ञत्वादनुभूय आदौ उपचीयमानां मुदं पश्चात् शोकेनापिमिश्रिताम करोत् मधुः पुष्परसेचोद्रेमध्येनातुमधुद्रुमे वसन्तदैत्यभिवेत्रे इति हैमः श्लेषमूलोपमेयम् ॥ ३३ ॥

आकाशव्याप्त मुच्चैर्वितरणनिपुणं निर्मलत्वा न्वतस्स
आगोत्पत्तिं च विद्युद्वसन मतिशयश्यामलस्निग्धवर्णम् ।

तापघ्नं सर्वबीजप्रभवमुरुतरं बिभ्रतं जिष्णुचापं।
वीक्ष्योपेन्द्रं प्रपेदे मुदमथ नितरां चन्द्रभृन्नीलकण्ठः ॥ ३४ ॥

"आकाशव्याप्तमिति" अथ मस्तके धृतचन्द्रः नीलकंठः शिवः उपेन्द्रं विष्णुं वीक्ष्यनितरां मुदं प्रीतिं प्रपेदे प्राप कीदृशंविष्णुं आकाशवत् बहिरंतश्च व्याप्तं तथाउच्चैः निर्मलमायाकृतोपाधिरहितस्य अमृतस्य मोक्षस्य वितरणे स्वभक्तानुप्रतिदानेचतुरं तथा यागानां यज्ञानां उत्पत्तिर्यस्मात् यज्ञपुरुषत्वात् तथाविद्युत्वत् वसनानिवासामियस्य तथातिशयेनश्यामलस्निग्धं च वर्णमस्य तथा संसारतापव्ययनाशकं तथासर्वेषां महदादीनां बीजं मूलकारणं प्रकृतिः तस्याः प्रभवउत्पत्तिर्यस्मात् तथाउरुतरंमहांतंजिष्णुंजयनशीलं शार्ङ्गाख्यंचा-पंधनुर्बिभ्रतं अथोपमानात्मकोऽप्रस्तुतार्थः तथाहि चंद्रवत् वर्हंधृतमेचकः नीलकंठः मयूरः उपेन्द्रंइन्द्रस्यसमीपेवर्त्तमानं मेघं वीक्ष्य नितरांमुदंप्रपेदे कीदृशंमेघं आकाशेव्याप्तं तथा उच्चैः निर्मलस्य स्वच्छस्य अमृतस्यजलस्य दानेचतुरं यथायज्ञेभ्यः उत्पत्तिर्यस्य यज्ञाद्भवति पर्जन्यइतिगीतोक्तेः तथा विद्युतोवसनं निवासो यस्मिन् तथा अतिशयश्यामलस्निग्धवर्णइतितुल्यं तथा धर्मजन्यसंतापनाशकं तथा सर्वेषांगोधूमादिबीजानां प्रभवोयस्मात् तथा महांतं जिष्णोरिंद्रस्यचापंबिभ्रत मेघेहिचित्रवर्णं अवत् शक्रधनुर्दृश्यते नील-कंठस्तुदात्यूहेकलविंकेचवर्हिणि सितापांगे हरेपीतसारकेकाल कंठवदिति विश्वः चंद्रांवुकाम्ययोः स्वर्णशुभ्रांशुकर्पूरकांपिल्यमेचकेपिचेतिहैमः जिष्णुर्ना-वासवेऽर्जुने जितूरिवाच्यवदिति च ॥ ३४ ॥

तद्दृग्नात्सफलतामनिमेषदृष्टेर्मत्वाथशर्वमुखसर्वसुपर्वसंघाः
कोटीरकोटिगतहीरमणिप्रदीपैर्नीराजयन्ति चरणौ
स्म तदा तदीये ॥ ३५ ॥

"तदिति" अथशिवाद्याः सर्वदेवसमूहाः तस्यविष्णोर्दर्शनात् निमेष-रहितायाः स्वदृष्टेः सफलतांमत्वा अद्यैवनचिरमर्जितस्यानिमेषत्व गुणस्य साफल्यंजातमिति निश्चित्यमुकुटाग्रगतहीरकमणि रूपैः प्रदीपैः तदातदीये विष्णुसंबंधिनो चरणौनीराजयंति स्म विष्णुचरणयोः प्रणेमुरित्यर्थः ॥ ३५ ॥

श्रांतश्चिरं किं दयदंऽघ्रिजा मे पुनर्भदंशो हि नदी निधिस्थु:।
इति भ्रमेणेव नमंत मीशमुत्थाप्य दोर्भिः स्वजतेस्म विष्णुः ३६

"श्रांपइति" अथविष्णुः नमंतंनतिंकर्तुमुत्सकं देवंश्रियं इतिभ्रमेणैव स्वभुजैः उत्थाप्य आलिंगितवान् इति किं अयंश्रिवः चिरकालं मत्पादप्रसूतांन दीर्गंगांशिरसिदधत् सन् किंश्रांतः अथ च श्रममसहमानः पुनर्मत्पादे एव शिरोनमयित्वा किंतांनिधिक्स्; निधातुकामोस्ति ॥ ३६ ॥

> चार्वर्णां मनुमनुवर्णकं क्रमेण स्वौ
> भर्तुर्भणित दशावतार लीलाम।
> आरब्धुं स्तुति मथ कृत्यहर्षिणीं
> ते शक्राद्याः परिकरबंध माशु चक्रुः॥ ३७ ॥

"चार्वर्णामिति" अथ प्रणामानन्तरं इन्द्राद्याः देवाः विष्णोः स्तुतिं आरब्धुं परिकरबंधमाशुशीघ्रंचक्रुः स्तुतिंकर्त्तुमुन्मुखा अभूवन्नित्यर्थः कीदृशीं स्तुतिंचारूणि अर्णानि वर्णानियस्यां तथामनोः ओं नमोभगवतेवासुदेवायेति द्वादशार्णमंत्रस्य वर्णं वर्णं प्रतिक्रमेण विष्णोर्भणितामत्स्यादीनांदशावताराणां लीलायस्यां तथा हृत् हृदयंप्रहर्षितुंशीलमस्यास्तां प्रहर्षिणीति स्तुति गत वृत्ततामप्यभिहितम् ॥ ३७ ॥

> ओंकारं श्रुतितततयो य मामनन्ति
> कल्लोला इव जलधे र्दशावताराः
> स्वां लीला मनुसरतो यत स्समासं स्तं
> विष्णुं मरकतकान्ममाश्रितास्तुाम्॥ ३८ ॥

स्तुत्यारंभेदशावतारलीलावर्णनायबीजमाहुः "ओंकारमिति" तंत्वांविष्णुं सर्वव्याप्तं वयं आश्रिताः स्मः ननुसर्वव्याप्तस्य दर्शनंहिविशेषतोऽप्यागमने किं प्रयोजनमित्याहुः कीदृशंत्वां मरकतोनीलमणिः तद्वत्कांतसुन्दरं अयंभावः त्वंसर्वव्याप्तोप्यस्मदादीनामतत्त्वज्ञानां चर्मचक्षुषामनुग्रहाय धृतपरिच्छिन्न सगुणस्वरूपोसि अतएवाश्रिताः स्मः तंकंयंत्वां श्रुतिततयः ओंकारं ओंकार वाच्यं परमात्मानं आमनंति तथाहि ओमित्यनेनैवाक्षरेण परंपुरुषमभिध्यायीत प्रश्नहितोयायंश्रुतोया ओंकाराक्षरवाच्यं पुरुषमुपासीदित्यर्थत्वात् ओमित्या-त्मानं युंजीत ओमितिब्रह्मध्यायथात्मानमित्याद्याः श्रुतयः गीतायामप्युक्तम् ओं

इतीश्वरांबश्चेति अथचयतस्तव: सांलीलां अनुसरत: मत्स्यादयो दशावतारा: समासन् प्रादुर्बभूवु: कस्मात्के इव जलधे: समुद्रात्कल्लोला इव यथा कल्लोला: समुद्रात् नाममात्रतएव पृथङ् निर्दिश्यंते वस्तुतस्तुतद्रूपाएवतथात्त्तोऽवतारा अपीति भाव: ॥ १८ ॥

नष्टासु श्रुतिषु विरंचिधाम्नि सिंधौ
शंखेन प्रसभसुरद्विषा हृतासु ।
तं हत्वा पुनरपि यो ददौ विधात्रे
तान्वेदांस्त्वमसिस चापि मत्स्यमूर्तिः ॥ ३९ ॥

तावन्मत्स्यावतारंवर्णयंति "नष्टास्विति" पुराब्रह्मलोके श्रुतिषु नष्टासु लुप्तासुसतीषु अथ च प्रसभेन बलात्कारेण सुरान् द्वेष्टीति तेनशंखनाम्ना असुरेण सिंधौहृतासु सतीषु अथतंशंखासुरंहत्वा पुनरपि ब्रह्मणे तान् वेदान् यो ददौ स: मत्स्यमूर्त्ति: धृतमत्स्यावतारस्त्वमेवासि ॥ ३९ ॥

क्षीरार्थं सुररिपुसंहतेः पयोधौ
मंथानीभवति च मंदरेऽध्यधस्तात् ।
तं धर्त्तुं किल कमठीकृताकृतिं त्वां
वैकुण्ठं स्मरति न कः कठोरपृष्ठम् ॥ ४० ॥

कूर्मावतारं वर्णयंति "क्षीरार्थमिति" पुराक्षीरोदमंथनकाले दैत्यसमूहसक्षीरार्थं सिंधौ च मंदराचले मंथानीभवतिसति तं मंदराचलं धर्त्तुं अधस्तात् कूर्मीकृतस्वात्मानंत्वांक: श्रेयोर्थीनस्मरतिअपितु सर्वोपि कोदृशं त्वां वैकुण्ठंविकुण्ठनिवासिनं तथाकठोरपृष्ठं कूर्मत्वात् ॥ ४० ॥

भद्रं नो दिशतु तवैव यज्ञमूर्त्तेर्वाराहीतनुरवनिं समुज्जहार
या मग्नां खलु जलधौ हिरण्यचक्षुर्दैत्यारेरसममसृग्भिस्
सृक्तितो गाम् ॥ ४१ ॥

वराहावतारं वर्णयंति "भद्रमिति" तेहि तवेवयज्ञमूर्त्ते: सावराह संबंधिनीतनु: न: अस्मात् भद्रं कल्याणं अदिशत् ददौ सांकायां हिरण्याक्षनाम

दैत्यस्य प्राणैः सह समुद्रेमग्नां भूमिं उज्जहार दंष्ट्राग्रेणेतिशेषः हिरण्याक्षंहत्वा भूमिमुद्धृतवतीत्यर्थः कीदृशस्याग्रां पृथ्वीमुद्धृतः चैरयतः सहोक्तिरलंकारः ४१

गर्हायां श्रुतिभि रटन्नसौ सरण्यां
सम्भ्रांतनिरसुरकारि येन तीक्ष्णैः।
हस्ताग्रैः किल कशिपुर्हिरण्य पूर्वः
प्रह्लादप्रियमिह तं नुमो नृसिंहम्॥ ४२ ॥

नृसिंहावतारं वर्णयंति "गर्हायामिति" तं नृसिंहावतारं नृ वयंस्तुमः कीदृशं प्रह्लादः प्रियो यस्य प्रह्लादरक्षार्थस्वीकृतावतारमित्यर्थः तं कं येन तुया वेदनिंद्यायांसरण्यांपथि अहमेवेश्वर इत्यात्मन्यत्यन्तपूज्यताति श्रुत्याध्यारोपरूपे वेदविरुद्धमार्गेगच्छन् हिरण्यपूर्वः कशिपुः हिरण्यकशिपुरित्यर्थः सम्भ्रमयां-तर्मध्येतीक्ष्णैः हस्ताग्रैः नखैः निरसुः गत प्राणः अकारिकृतः। ४२।

वर्धिष्णु स्तव च तनुर्विभो यदंघ्रि
न्यासार्थं जग दखिलं बभूव ना लम्।
य वीक्ष्यार्थिन मिव वामनं मनस्वी
पाताला द्बलिरलभत् स्थितिं नचार्वाक्॥ ४३ ॥

वामनावतारंवर्णयंति "वर्धिष्णुरिति" तेतव हृविशोला वामनीतनुः विभो वर्धिष्णुतामिवाहुः कीदृशीयस्याः पादविक्षेपार्थं स कलमपिजगत् अलं पर्याप्तंनासीत् यंचत्वां मनस्वी मानशीलः बलिः वामनंखर्वशरीरं अर्थिनं याचकमिववीक्ष्य पातालात् अर्वाक्स्थितिंनअलभत् इतरयाचकवद्दर्शनमात्रा सवयेवाधोपतत्किमुसाक्षात्तवावज्ञायाः फलं वक्तव्यमितिभावः॥ ४३ ॥

तेरु यँ जलनिधित श्रयाः कपीनां
संभूय प्रथमजुषोऽपि तद्वदेव।
पौलस्त्यं यमसदनं निनाय यश्च
प्रायं नतमिह रघूद्वहं नमस्तान्॥ ४४ ॥

रामावतारमाह: "तेदरिति" तंरघूद्वहं रामःवतारंत्वांस्तुमः तं कं यंत्वां संश्रित्यकपीनां हनुमदादीनांपयाः जलनिधितः तेरुः तदद्देवत्तं व प्रकारेण यं संश्रितावित्यर्थः प्रणमज्जुषः योगिनोपि जलनिधितः संसार समुद्रात् यद्वाज-डानामाकाशादीनांनिधिः संसारस्तस्मात् तेरुः तथायोरामः पौलस्त्यंरावणं यमसदननिनायतंद्द्वत्वा च नः श्रस्मान् स्वास्थ्यंनिनाय ॥ ४४ ॥

बाहूं स्तु किल कदलीदलालिवत्
प्रागच्छेत्साः स्वपरशुना सहस्रबाहोः ।
निःक्षत्रांक्षितिमपि च त्रिसप्तकृत्वः
कृत्वा तद्रुधिरकरैः पितॄनतार्प्सीः ॥ ४५ ॥

परशुरामावतारंवर्णयंति यः त्वं परशुरामः स्वपरशुना सहस्रबाहोः सहस्रसंख्याकान् बाहून् कदलीपत्रपंक्तिवत् प्रच्छेत्साः यश्च तुं भूमिंत्रिसप्त कृत्वः एकविंशतिवारान् निःक्षत्रां क्षत्रजातिरहितांकृत्वा तेषां क्षत्रियाणां रुधिरप्रवाहैः स्वपितॄन् श्रतार्प्सीः पितृतर्पणंचक्रयेत्यर्थः त्रिसप्तकृत्वः क्रियाया श्रावृत्तौ कृत्वसुच् इति कृत्वसुच् प्रत्ययः । ४५ ।

स्वक्रांत्वा खिलु भवनोतलं सुरारिं
संश्रित्या मररिपुकंटकां श्च निघ्नन् ।
यो बीजं सुकृतमुवाप लांगलेन
त्वं सो व्या च्चितदरहा प्रलंबशत्रुः ॥ ४६ ॥

बलभद्रावतारंवर्णयंति "स्वक्रांतेति" यः प्रलंबस्यशत्रुर्बलभद्रः सर्वं पृथ्वी तलं सुक्रांता भ्रमित्वा सुरारिं कृष्णस्य संश्रित्य सहजत्वेनाश्रित्य श्रमररिपवः दैत्या एवकंटकाः क्षुद्रशत्रवः तांश्चनिघ्नन् सन् लांगलेनहलेन सुकृतंधर्मरूपं बीजं उवाप सोपितुमेवास्ति श्रन्योपिकृषीवलः भूमिंभ्रमित्वा कंटकांश्चहलेन हत्वाबीजंवपति कीदृशः बलभद्रः श्राश्रितजनानांदरंभयंहंतीतिसः । ४६ ।

देवाना मरिवदरापनुत्तये यः
श्राम्नेदानृष्वमपि गर्हयांबभूव ।

तवाङ्गा पशुजनितां समीक्ष्य हिंसां

मूर्त्तौ सोऽपि करुणा स बुद्धमूर्त्तौ ॥ ४७ ॥

बुद्धावतारमाहुः "देवानामिति" सः त्वं बुद्धमूर्त्तौ हिंसानिषेधात् मूर्त्ता परिच्छिन्ना करुणादयैवाऽऽसीः अभूः यः बुद्धः देवानां अस्माकं परिजनस्य दुःखस्य भयस्य अपनुत्तये नाशाय स्वान् स्वस्वात्मरूपानपि वेदान् गर्हयांबभूव निनिन्द स्वभक्तजनरक्षार्थं स्वस्वात्मरूपानपि वेदा येन निन्दिताः किमन्यत्तव कारुण्यं वक्तव्यमितिभावः ननु दोषं विना न निंदा चितेतितत्र दोषमाहुः किं कृत्वा निनिन्द तत्र वेदेषु अवासम्यक् पशुजनितां पशोरित्यर्थः हिंसां आग्नीषोमीयं पशुमाल भेतेत्यादि रूपां समीक्ष्य यद्यप्यत्र वेदेतिसामान्याभिधानं तथापि कर्मकला-माभिप्रायं द्रष्टव्यं तत्त्वमसीत्यादि तत्त्वज्ञानस्यापि वेदप्रतिपादितत्वात् सांख्य-मसतावप्युक्तम् दृष्टवदानुश्रविकः सह्यविशुद्धिक्षयाति शययुक्त इति अस्यार्थः आनुश्रविकः वैदिकः कर्मकलापः दृष्टवत् रोगादीन्प्रति औषधादिलौकिको पायवत् अस्ति ऐकान्तिकात्यंतिकदुःखत्रयप्रतीकारानुपायत्वस्योभयत्रतुल्यत्वात् अत्र हेतुमाह हियतः सः आनुश्रविकः अविशुद्धादियुक्तः अविशुद्धिः पशुवध रूपाक्षयः तत्फलस्वर्गादिः कार्यत्वात् अतिशयोऽपि स्वर्गादेरेव ज्योतिष्टोमा-दीनां स्वर्गमात्रसाधनत्वात् वाजपेयादीनां स्वाराज्य साधनत्वात् परसंपदुत्क-र्षोहिहीनसंपदंपुरुषंदुःखाकरोति । ४७ ।

वातूलप्रबलजवेन वाजिना यो

म्लेच्छानां चयमवधीत्कृपाणपाणिः ।

ध्वांतानामिव तरणिर्युगावसाने

धर्मस्यांकुरमिव सोऽसि कल्किमूर्त्तिः ॥ ४८ ॥

कल्क्यावतारं वर्णयंति "वातूलेति" सः कल्क्यावतारः त्वमेवासि सः कः यः कल्कि वातवावत् प्रबलोवेगो यस्य तादृशेन वाजिना उपलक्षितः सन् युगावसाने कलियुगांते म्लेच्छानां समूहं अवधीत् केषांसमूहंकइव ध्वांतानां तमसां समूहं तरणिः सूर्यइव कीदृशः कल्कीकृपाणः खड्गःपाणौकरे यस्य तथा धर्मस्य अंकुरं बीजमिव नष्टस्य धर्मस्य पुनरुत्पादनात् अमी अवतारा भाग-वतादिभ्यः सेतिहासंसम्यगवगंतव्याः । ४८ ।

यस्मिं स्तु व्यखिल मिदं समं प्रकृत्या
कल्पांते महदहमादि सुप्रशक्ति ।
लिल्ये सत्पुरुषे परे पुराणे
तंतूनां ततिरिव तंतुवायजन्तौ ॥ ४९ ॥

यथानुक्रमेणप्राप्तस्ययकारस्यार्थमाथं ततोऽवतारदशकस्याध्यारोप मुक्तातदुपलक्षणात्सर्वप्रामपवादमाह "यस्मिन्निति" यस्मिन् त्वयिविष्णौकल्पाते सति इदंसर्वंमहदहमादि महत्तत्त्वाहंकारादिकं जडजातं प्रकृत्यासह सुप्राप्तिः प्रकृतिर्यस्य तादृशं सत्लिल्ये लीनमासीत् कीदृशेत्वयि महतः अहमादिजडजातात् परतया पुराणेसनातने पुरुषे तथा परे सत्युत्कृष्टे त्वयिदृष्टांतमाह तंतुवायनाम्निजन्तौजीवेतंतूनां ततिरिव तथातन्तुवायः स्वेच्छयातंतून् सृजतेगृह्णाति च यथोर्णनाभिः सृजतेगृह्णातेचेतिश्रुतिः ॥ ४८ ॥

इति स्तुतप्रह्वतां मुद मुदिततोयै र्वहि रियो
द्वमंतीभ्यां दृग्भ्यामतिमुद मितां देवततिम्।
विषूचीनां विष्णुः स्वयमथ समाहूय विधिना
निनायांतः सौध हरकरसनाथीकृत करः ॥ ५० ॥

"स्तोति" इत्यस्याऽस्तुतेः उद्भूतांमुदं तज्जन्यतोयैः आनन्दाश्रुभिः वहिरिव उद्वमन्तीभ्यां स्वदृग्भ्यांकृत्वा अतिशयेन मुदंप्राप्तां देवततिं स विष्णुः अन्तः सौधंनिजांतः पुरंनिनाय कीदृशीं विषूचीनांबहुत्वात् ध्यामां किं कृत्वा विधिनाब्रह्मणासह आदरविधानेन सहवास्वयंसमाहूय कीदृशः विष्णुः हरकरेणसनाथीकृतः स्वकरोयेन शिवहस्तमवलंब्येत्यर्थः ॥ ५० ॥

प्रतिष्ठाप्य मध्ये सभं तत्र सर्वान्यथार्हं स्वयं तत्र भर्गेण सार्धम्।
विरेजे स सिंहासने सन्निविष्टो यथा ज्ञान संतस्य
योगेन साकम् ॥ ५१ ॥

"प्रतिष्ठाप्येति" स विष्णुः तत्रांतः पुरि मध्येसभं सभायाः मध्येयथा योग्यं सर्वान् प्रतिष्ठाप्यस्वयं च भर्गेण शिवेन सार्धं सिंहासनेसन्निविष्टः सन्

विरेजे कथं यथा अन्तर्हृदये योगेन चित्तवृत्तिनिरोधेन साकं ध्यानं विराजते तद्वदित्यर्थः मधोसभमित्यत पारेमधेप्रपच्च्या वेति निपातात्साधुः ॥ ५१ ॥

पृष्टः सो ऽथ प्रणयिवचसा विष्णुना चन्द्र-
मौलिर्हेतुं देवागमन मभि तं पूर्ववृत्तं निवेद्य।
प्राहो पायं कथय च विभो कावलापौ दृशौ स्या
द्यातं हन्याद्युधि हरिरिपुं स्वःसदोप्येवमूचुः ॥ ५२ ॥

"पृष्टइति" अथचन्द्रमौलिः शिवः प्रणयिवचसा प्रेमयुक्तवचनेन कृत्वा विष्णुना देवागमनंप्रति हेतुंपृष्टः सन् पूर्ववृत्तं महिषोत्पत्ति धातृवरदान देवतिरस्कारादिकं पूर्ववृत्तांतं तंप्रतिनिवेद्य अन्यच प्राहकिमित्याह हे विभो यावंता युद्धे तंहरेरिन्द्रस्य इन्द्रस्य वारिपुंमहिषंहन्यात् काईदृशौ आवलास्यावेतिसम्भावनायांलिङ् इत्युपायंकथय इतिशिववाचंश्रुत्वा अन्येपिस्वः सदः देवाः एवमेवोचु यथाशिवेनोक्तमित्यर्थः ॥ ५२ ॥

भगवानपि तस्थिवानूच्चणं हृदि गीर्वाणगिरं निगीर्य्यतांम् ।
अबलां सबलां विचिंतय जगदेथो जगदेक कारणाम् ॥ ५३ ॥

"भगवानिति" विष्णुरपि गीर्वाणानां देवानां गिरंहृदि निगीर्य क्षणं तस्थिवान् निश्चलोभूदित्यर्थः किं कुर्वन् काञ्चित् अबलां सबलां विचिंतयन् सन् अथ चिन्तयित्वा तान्प्रतिवक्ष्यमाणं जगदे कीदृशः विष्णुः जगतः एकं कारणं यद्वा जगदेक कारण रूपा मायांशक्तिमेव सबलां जगाद ॥ ५३ ॥

पृथक्केवासौ द्या द्युतिरिव रवेः प्रत्नपुरुषा
द्यया साध्वीबालं प्रथितयशसा भावि विभुना।
यदायत्तस्तिर्यक्जनिषु च पतामि प्रतियुगं
न सा शक्तिः शक्ता महिषनिधने ब्रह्ममहिषी ॥ ५४ ॥

किं जगादेत्याह "पृथगिति" सा ब्रह्मणः परमात्मनः महिषीपट्टराज्ञी-चिच्छक्तिः पूर्वप्रतिपादिताजडायाः प्रकृतेरतिरिक्तैवकाचिद् चिन्मयमहिमा भगवती महिषस्यनिधनेन शक्ता न समर्थेतिकाकुःसाका या प्रत्नपुरुषात्

परमात्मनः पृथक् भिन्ना नैवासीत् एवकारोऽत्यन्ताभेदसूचकः परमार्थतः शक्ति शक्तिमतोरभेदात् तदुक्तं कूर्म पुराणे शक्ति शक्तिमतोर्भेदं वदन्त्य परमार्थतः अभेदमनुपश्यन्ति योगिनस्तत्वचिन्तका इति मतुवशापारमार्थिकं भेदमादाय यथातन्तुमान्पट इति अमुमेवार्थं दृष्टांतेन द्रढयति रवेर्द्युतिरिव यथा सूर्यात् प्रभाभिन्ना कर्त्तुं न शक्यते सूर्यस्यप्रभात्मकत्वात् व्यवहारतस्य पुंस्त्रीनाम्ना भण्यते अथापरमार्थतोभेदंपश्यतांमतेपि शक्तेरेवाधिक्यं प्रतिपादयति यथा शक्त्याकृत्वा विभुनापरमात्मना कर्त्ता प्रथितयशसा प्रसिद्धसच्चिदानन्दादिकीर्तिमता अभावि भूतं तदुक्तं शक्तिं विनाशिवेसूक्ष्मेनामधामन विद्यते इति कोहश्याशक्त्या साध्वेव प्राकृतगतिव्रताख्यियेव यथा पतिव्रतयास्त्रियाजनः प्रसिद्धकीर्त्तिर्भवति ननुत्वत्तोपि सर्वशक्तिमतः किं सा अधिकास्तीत्या शंकापनुत्तये स्वस्यैव तदधीनतांदर्शयति यस्याः शक्त्याः आयत्तः अधीनः सन् अहमपि अनिच्छन्नपि मत्स्यवराहादिषु तिर्यक्जनिषुपश्वादियोनिषु प्रतियुगं पतामि नतुस्वेच्छयेत्यर्थः अन्यथाकोबुधोविकुण्ठति वासं विहाय गर्भवास जन्यंकष्टंपश्वादियोनिवाकांक्षेत तथा च देवा भागवतेदेवान्प्रतिविष्णुवाक्यम् यद्वहंस्यास्तन्त्रोनचिन्तयन्तुधियाकिल कथंभवामि मत्स्योऽहं कच्छपो वामशार्णवेतिर्यग्योनिषुकोभोगः काकीर्त्तिः किं सुखंपुनरित्यादि ॥ ५४ ॥

अहो किमु न स्मरसि त्वमिरेश गृहीतमदंगचयां प्रलयाप्सु।
तरिष्यसि यामभिनूय भियं मधुकैटभजां भजतामधुनापि ५५

तस्याः प्रभावं ब्रह्माणमपि पूर्वदृष्टंस्मारयति "अहोइति" हे इराया: सरस्वत्याः ईश स्वामिन् हे ब्रह्मन् प्रलयाप्सु प्रलयकालीन समुद्र जलेषु गृहीताः मदंगानांचयाः नेत्रास्यहृदादयः ययातां ममसर्वांगव्यापिनींनिद्रात्मिकां भगवतीं त्वं किं न स्मरसि इतिकाकुः तांकांयांअभिनूयस्तुत्वा त्वामत्तुकामाभ्यां मधुकैटभाख्याभ्यां दैत्याभ्यां जन्यां भियं त्वं तरिष्यसि अतर इत्यर्थः तां भगवतीं अधुनापिभज अधुनाऽपितद्वत् महिषजभयंसैव सूतानाशयिष्यतीत्यर्थः एतदेवमार्कण्डेयपुराणे योगनिद्रांयदाविष्णुर्जगत्येकार्णवी कृत इत्यादिना एवमेषासमुत्पन्नाब्रह्मणासंस्तुतास्वयमित्यंतेन सम्यक् प्रतिपादितं तरिष्यसीत्यत्र अभिज्ञावचनेलृडिति भूतार्थे लृट् इरा भूवाक् सुरासुरादिष्वमरः मौक्तिकदामनामवृत्तमिदं तल्लक्षणंवृत्तदर्पणेप्रोक्तम् चतुर्जगणैर्विहितं किमनामसुवृत्तमिदं भुविमौक्तिकदामेति ॥ ५५ ॥

इतीश निखिला वयं कथमपीश्माहे नो मनाक्
विकाशयितु मक्षिणो ऽपि शिवादय स्तां विना ।
अतः सकलदेहिनां पुरुषकाररूपा यथा
भजेत्प्रकटतां हि सा प्रयतत द्रुनाथास्तथा ॥ ५६ ॥

तत्प्रभावमुपसंहरन्नाहिमाह "इतीशेति" इत्यमुनाप्रकारेण वयं निखिलाः सर्वेपि शिवादयोदेवाः यद्वा वयं शिवादयोदेवाः निखिलाः अन्ये च सर्वलोकाः यद्वा हे शिवादयोदेवाः निखिलाः लोकाः वयं च तां शक्तिंविना अक्षिणीनेत्रे अपि विकाशयितुं उन्मीलयितुं कथंचिदपि मनागल्पेनापि न शक्नुमः किं पुनः स्पर्शादि व्यवहारं कर्त्तुं न समर्था इति वक्तव्यमिति भावः तदुक्तं श्री मच्छंकरपादैः शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पंदितुमपीति अतोऽस्माकेतोऽसा भगवती सर्व देह भृतां देहे षु पुरुषकाररूपा शक्तिरूपा यथा येन प्रकारेण प्रकटतां भजेत आविर्भूयात् हेद्रुनाथाः देवाः तथाप्रयततयत्नं कुरुत तथोक्तं मार्कंडेये या देवी सर्वभूतेषु शक्ति रूपेण संस्थितेति पृथ्वीवृत्तमिदं जसौजसयलावसुग्रहयतिश्च पृथ्वी गुरु रितिलक्षणात् ॥ ५६ ॥

अथ निजनिजतेज सर्वे एवो द्विराम
स्तनुजनि तत एवा विर्भविष्यत्यजा सा ।
इति मधुरिपुगीतां प्रेंखितै मौंलिभि स्ते
हितमुदितमुदित्वा वाच मानर्चु रुच्चैः ॥ ५७ ॥

ननुकथं सा प्रादुर्भावंभजेतेति तदुपायं स्वयमेवाह "अथेति" अथानंतरं हे देवाः वयं सर्वे तनुजनिशरीरजन्यं निजनिजतेजः उद्विरामः शरीरात् ब-हिर्निष्कासयामः ततः सर्वेषांतेजः पुंजादेव साअजा जन्महीना आविर्भवि-ष्यति जनुजनिष्यति अतएवाऽजेत्युक्तं अथतेदेवाः हे भगवन् त्वयाहितं उदितं कथितं इति उच्चैः उदित्वा उक्त्वा इत्यमुनाप्रकारेण मधुरिपुणा विष्णुनागीतां वाचं प्रेंखितैः आकंपितैः मौलिभिः मस्तकैः आनर्चुः पूजयामासुः अन्योपि श्लाघांकुर्वन् शिरः कंपयति तद्वत्स्वीचक्रुरितितात्पर्यम् वेल्लितप्रेंखिता धूत चलिता कंपिताधुते इत्यमरः ॥ ५७ ॥

श्रीमान्प्रथमो मुरारिसदनीभूत कृष्णरधुनाथो
लक्ष्मीनाथं कविपरिवृढं देशको ऽसूत यं माम्।
तेनोद्गीते महिषनिधने गीतलक्ष्मीचरित्रे
लक्ष्मी काव्ये विरतिमगमच्चैष सर्गश्चतुर्थः ॥ ५८ ॥

श्रीमानित्यादि पूर्ववत् ॥ ५८ ॥

इति श्री मल्लोस्वामिवंशावतंस श्रीमद्रघुनाथात्मज
लक्ष्मीनाथ कवि विरचिते लक्ष्मीकाव्ये
चतुर्थः सर्गः समाप्तः

इति श्री लक्ष्मीनाथ विरचितायां लक्ष्मीकाव्यव्याख्यायां
चतुर्थः सर्गः समाप्तः

ओं नमः श्रियै

अथ जय इव जातभीः कांडे महिषकृतां विनिधाय हृद्यवज्ञाम्
अतिभ्रुकुटिकराल भाल मध्य स्फुटित तृतीयदृगीश्वरः
प्रचुकोप ॥ १ ॥

ओं नमो विघ्नहर्त्रे अस्मिन्सर्गे विष्णुवाचमंगीकृत्य निजनिजतेजउद्गमतो देवेभ्यो महालक्ष्मी प्रादुर्भावो वर्णयिष्यते तावत्सर्वमुख्यत्वाच्छिवस्यैव तेज उद्गमनेत्स्वरूपमाह "अथेति" अथ विष्णुवाक्योकारानंतरं ईश्वरः शिव एवादौ चुकोप किं कृत्वा क्रोधाद्भवाय महिषेणकृतां अवज्ञां हृदिविनिधायस्थापयित्वा कोदृशः शिवः अतिशयेन भ्रुकुट्याकरालस्य भालस्य मस्तकस्य मध्यात्स्फुटिता उज्जृंभितात्तृतीयाद्दृक् दृष्टिर्यस्य कोदृश इव अकाण्डे असमये एवलये प्रलये जातभीः उत्पन्नवृद्धिरिवेत्युत्प्रेक्षा प्रलयेहि शिवस्य तृतीया दृष्टिरुज्जृंभते अत्र क्रोधः स्थायि भावः रौद्ररसोऽभिव्यज्यते अवलंबनमत्रमहिषः तत्कृतावज्ञाचो-द्दीपनं अतिभ्रुकुट्यादयश्चानुभावाः आवेगादयोव्यभिचारिणश्चाक्षेप्याः तदुक्तं रौद्रः क्रोधस्थायिभावो रक्तोरुद्राधिदेवतः आलंबनमरिस्तत्र तच्चेष्टोद्दीपनं मतं भ्रूक्षेपं मूर्धनिर्धूतिर्दृगंते पाटलच्छविः भ्रू भेदाधरकंपाद्या अनुभावास्तथो-दिताः आवेगोजडतागर्वोद्दामोहचापलौ असूयापि तथा मर्षश्रमाद्याव्यभि-चारिण इति काण्डोस्त्रीदण्डबाणार्वंवर्गावसरवारिष्वित्यमरः अस्मिन्सर्गेपु-ष्पिताग्रावृत्तं अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्च पुष्पिताग्रेति लक्षणात् ॥ १ ॥

तत उग्रतरतेज आविरासी द्दलि
कुलकालिमशालि तन्मुखाब्जात् ।
गिरिरिव धुरि तद्गराज पिण्डी
भव दभित स्व विसृत्वराचिंरयम् ॥ २ ॥

"तत इति" ततः कोपानन्तरं तस्य शिवस्य मुखकमलात् उग्रतरं अति महत् तेजः आविरासीत् कीदृशं भ्रमरसमूह कृष्णत्व शीलं तमोगुणा धिक्यात् मुखरूपकमलात्कृष्णवर्णं तेजोरूप भ्रमरसमूहस्या विर्भावोयुक्तएव तत्तेजः अथपिंडोभवत् सत् गिरिरिवरराज कीदृशं अभितः सर्वतः विसृत्वराभिर्विसर-

ज्वालाभिः अर्चिभिर्ज्वालाभिरुग्रभीमं तदुक्तं देवी भागवते श्रहरेश्शरीरा-त्तु निसृतं महदद्भुतं मषीवर्णं महातोग्रं दुर्दर्शं दारुणमभूत् घोररूपगिरिप्रख्यं तमोगुणमिवापरमिति विस्तरस्त्वत्र रुणादित्वात् प्रोक्तेयंकरप् ॥ २ ॥

तदनु सुररिपु स्तथैव कुप्यन्नति विशदंमह उद्ववाम वक्त्रात् ।
अभिनवजलदाद्विनिस्सृतस्य द्युतिमजयत्त दरं तुषाररश्मेः ३

"तदन्विति" तस्य तेजोनिस्सरणात्पश्चात् विष्णुरपि तथैवग्निवत् कुप्यन् सन् सत्त्वगुणाधिक्यादति गौरवर्णं तेजः निजमुखात् उद्ववाम तत्तेज अभिनव जलदाद्विनिस्सृतस्य चन्द्रस्य शोभामरमत्यर्थमजयत् विष्णुमुखस्वरूपत्वात् तेजसश्वेतत्वात् तदुक्तं तत्रैव ततो विष्णुशरीरात्तु तेजोराशिरिवा परो श्वेतं सत्वगुणोपेतं प्रादुरासीन्महाद्युति इति ॥ ३ ॥

अरुणमथ महो हिरण्यगर्भो रज इव मूर्त्तिधरं हिरण्यवर्णम् ।
तिजवदनत उत्प्रभं कदुष्णं वमति तदा स्म स विस्मयप्रदाढ ४

"अरुणमिति" अथ सः हिरण्यगर्भः ब्रह्मानिजमुखात् रजोगुणाधिक्यात् अरुणं रक्तवर्णं तेजस्तदावमति स्म कीदृशं मूर्त्तिधरं रजोगुणमिव तथा हिरण्यवत् तमस्वर्णवत् वर्णं यस्य तथा उत् उत्कृष्टा प्रभायस्य तथाकदुष्णं ईषदुष्णमग्नं तथा आश्चर्यप्रदाढ तदुक्तं तत्रैव इत्युक्तवति देवेशे ब्रह्मास्यवदनात्ततः उद्ववामसत्तेजो राशिंवातीवदुः सहं रक्तवर्णं शुभाकारंपद्मरागसम प्रभं किंचिच्छीतं तथाचोष्णं मरीचीजालमंडितमिति ईषदर्थंकोःकदादेशइतिकदुष्णं४

प्रलयसमयवह्निषा किमेते कनकहिमांजनभूभृतो ज्वलन्ति ।
सुरततिरिति तेजसोत्करां स्तात्सपदि समीक्ष्य
चमत्कृता बभूव ॥ ५ ॥

"प्रलयेति" अथसुरततिः तान्ग्निवविष्णुब्रह्मणां तेजः संबंधिनः उत्करान् राशीन् वीक्ष्य इति मत्वाशीघ्रं चमत्कृता चित्रीभूता बभूव इति किं एतेत्रय-स्तेजोराशयः प्रलयसमयस्यवह्निषा अग्निना .किंकनकाचलहिमाचल अंजनाचलाख्य ज्वन्ति,इदंतिश्रूयमाणत्वादपलवाचकस्य भूभृत्पदस्यप्रतीरकानुषंगः तेज-

सारङ्गगौरकृष्णवर्णत्वात् मेघादिभिस्साम्यं वह्निः कृष्णवर्त्मेत्यमरः पुञ्जराशी तूत्करः कूटमस्त्रियामिति च ॥ ५ ॥

बलरिपुरपि वीक्ष्य चित्रितात्मा तदनु ससर्ज स चित्रमेव तेजः।
भवति हि सममेव कारणेनाखिलमपि कार्यमिति
व्यतर्कि देवैः ॥ ६ ॥

"बलरिपुरिति" इन्द्रोऽपि तान् तेजोराशीन् वीक्ष्य चित्रितात्मा अभूत् तदनु चित्रं चित्रवर्णमेव तेजः ससर्ज अथ तस्य चित्रवर्णं तेजो वीक्ष्य देवैरिति व्यतर्कि इति किं चिन्तयतः अखिलमपि घटादिकं कार्यं कारणेन मृदादिना तुल्यमेव भवति तत एवास्य चित्रीभूतात्मनश्चित्रमेव तेज उत्पन्नमिति भावः अद्भुतं तथैव ततः शक्रशरीरात्तु चित्ररूपं दुरासदं आविरासीत्सुसंहतं तेजः सर्वगुणान्वितमिति ॥ ६ ॥

अथ वसुदिगधीशरुद्रसाध्यग्रहमुनयोऽपि महो निजानुरूपम्।
असृजदतिकुपितास्तदा सृजन्तो मणिमिव खे पवनाशिनो
मुखेभ्यः ॥ ७ ॥

विशेषत एषां तेजोनिःसरणप्रकारमुक्त्वा संप्रति सामान्यतः सर्वेषामाह "अथेति" तदनन्तरं वसवोऽष्टौ दिक्पाला इन्द्रेशौ विनाग्न्यादयः रुद्रा एकादश साध्या द्वादश ग्रहाः सूर्यादयः सप्त मुनयो नारदादयः एतेऽपि अतिकुपिताः निजानुरूपं स्वसदृशं स्वमुखेभ्यः तेजः सृजन्तः सन्तः तदा बभुः कं सृजन्तः खे इव आकाशे स्वमुखेभ्यः मणिं सृजन्तः पवनाशिनः सर्पा इव अतिकुपितत्वात्तेषां सर्पसाम्यम् ॥ ७ ॥

स्वयमथ महसां विसृज्य पुञ्जं स्वयमपि वीक्ष्य सुविस्मिता बभूवुः।
कवय इव विधाय नूत्नभावोज्ज्वलमनवद्यपदालिहृद्यपद्यम् ८

"स्वयमिति" अथ ते देवाः स्वयमेव तम् महसां पुञ्जं विसृज्य अथ स्वयमेव वीक्ष्य सुविस्मिता अत्याश्चर्यीभूताः बभूवुः अत्र दृष्टान्तमाह यथा कवयः लोकोत्तरवर्णननिपुणाः नूत्नेन नवीनेन भावेन उज्ज्वलं तथा अनवद्या निर्दोषा पदानां आलिः पंक्तिर्यस्मिन् तादृशं हृद्यं मनोरमं यद्वा अनवद्यपदालिभिर्हृद्य

पर्श्चं स्वयमेव विधाय निर्माय पश्चात् स्वयमेव वीच्य तत्र चमत्कारातिशयं दृष्ट्वा विस्मिता भवंति तद्वदित्यर्थः ॥ ८ ॥

शिवमहसि महांसि तानि तेषामथ
मिलितानि बभुस्तरां तदानीम्।
प्रलय इव समस्त जीवसंघा नि-
यति मुपेत्य तदीय एव तस्मिन् ॥ ९ ॥

"शिवमहसीति" अथ तेषां ब्रह्मादीनां तानितेजांसि शिवस्य तेजसि-मिलितानिसंति तदानीं अतिशयेनबभुः कथं यथा प्रलयकाले सर्वजीवसमूहाः नियतिंस्वस्वकर्मभोगावधिनियमं उपेत्य तदीयेएव तस्यांशिवस्यैव तस्मिन् तेजसिमिलितानि विभान्ति तद्वदित्यर्थः नियतिर्नियमेदैव इति विश्वः ॥ ९ ॥

व्यलसदथ तदेव देवतेजः परिणत मिंदुमुखीतया ज्वलच्छ्रि।
निजमहिम यथा निराकृति प्राक्परममहो गुणरूप
नामशालि ॥ १० ॥

"व्यलसदिति" अथतदेव एकीभूतं देवानां तेजः इन्दुमुखीतयास्त्रीरूपेण परिणतंसत् व्यलसत् कीदृशं ज्वलन्तीश्रीर्यस्यतत् कथं यथा परममहः परंब्रह्म रूपंतेजः प्राक् निराकृति आकारविशेषैर्विहीनं केवलंतेजोरूपमेवेत्यर्थः पश्चात् प्रकृतिसंगात् गुणरूपनामशालिसत् व्यलसत् तद्वदित्यर्थः कीदृशं तत् निजो ऽसाधारणो महिमा महत्त्वं यस्यतत् ॥ १० ॥

दृगविषयकटि स्त्रिदृष्टिरष्टादशभुजशोभितनूरसह्यवीर्या।
निखिलभुवनमंजुतैकसीमा सुरविसरैरिति सा व्यलोकि देवी॥

"दृगिति" अथ देवसमूहैः सामान्यतः स्त्रीमात्र दर्शनानन्तरं सादेवी मालक्ष्मीरितिरूपाव्यलोकि दृष्टा इतिकीदृशी दृशोरविषया कटिर्यस्याः अतितनुमध्येत्यर्थः तथा तिस्रः दृष्टयोयस्या त्रिनेत्रेति तथा अष्टादशभिः भुजैः शोभिनोतनूर्यस्याः तथा असह्यं परैः सोढुमशक्यं वीर्यंयस्याः तथा निखिल लोकेषुयामंजुता सौंदर्यं तस्याः एकासीमा अवधिः समूहेनिवहव्यूहसंदोह विसरव्रजा इत्यमरः ॥ ११ ॥

हिमकरशकलोल्लसल्ललाटां चि-
कुरचयाम्बरसितोरुमौक्तिकोडुम्।
अतिशयजयसूचकां शिवां तां
त्रिदिवसदो ददृशुर्मुदा तदानीम्॥ १२॥

"हिमकरेति" ते देवाः तदानीं तां शिवां मुदा ददृशुः कीदृशीं हिमकरशकलेन चन्द्रार्धेन उल्लसत् ललाटं यस्याः यद्वा चन्द्रार्धवत् उल्लसत् ललाटं यस्याः तथा चिकुरचयः केशसमूह एव अम्बरं व्योम तस्मिन् सितानि वलक्षानि विशदानि वा उरूणि भूयांसि मौक्तिकान्येवोडूनि नक्षत्राणि यस्याः तथा अतिशयेन जयसूचकां अवश्यमेवास्माकं जयो भविष्यतीति तद्दर्शनेनैव तैर्निश्चितमिति भावः यद्वा ते देवाः तां देवीं शिवां अष्टमीतिथिरूपां मुदा ददृशुः कीदृशीं अष्टमीचन्द्रार्धेन उल्लसल्ललाटां शुक्लाष्टम्यां हि अर्धचन्द्रः संध्याकाले शिरसि दृश्यते तथा केशसमूहरूपे व्योम्नि वलक्षानि भूयांसि मौक्तिकाभानि नक्षत्राणि यस्यां तथा अतिशयेन जयसूचकां जयातिथित्वात् उक्तं च जयाजयकरी प्रोक्तेति १२

कलितसकलबिम्बकालिमेव विलसति
यत्पुरतो निधिः कलानाम्।
शिशुरविरपि पाण्डुरायते तत्
मृडमहसाथ तदीयमास्यमासीत्॥ १३॥

पूर्वं समस्तदेवतेजोभ्यो मिलितेभ्यो महालक्ष्मीः प्रादुर्भूतेत्युक्तं संप्रति कस्य कस्य तेजसा किं किमङ्गमासीदिति तेजोविभागैरङ्गविभागमाह ताव-च्छिवस्य तेजसा तन्मुखं जातमित्याह "कलितेति" अथ मृडस्य शिवस्य महसा तदीयं तत् आस्यं मुखं आसीत् तत्किं यस्य पुरतः अग्रे कलानां निधिश्चन्द्रः कलितः गृहीतः सकले एव बिम्बे कालिमा कृष्णत्वं येन तादृशः सन् विलसति अयं भावः यन्मुखस्य गौरिमाग्रे बिम्बस्यैकदेशेऽपि कलङ्कवान् चन्द्रः सकलेऽपि बिम्बे कलङ्काच्छादितो भाति यद्गौरिमाग्रे चन्द्रोऽपि कृष्णीभूतो भातीति तात्पर्यं यद्गौ-रत्वोद्रेकमुक्त्वा रक्तत्वोद्रेकमाह शिशुरविः बालसूर्योऽपि यदग्रे पाण्डुरायते धूसर इव भाति अतिशयोक्तिरलंकारः॥ १२॥

अथ सितमहसा पुरा पुरारेः किं
सु तमसा जरितेन कालिमाप ।
प्रकृतिरथ निजाप्यभाजि कार्ष्णी
किमु वदनीभवता विसृज्य केशे ॥ १४ ॥

ननुकृष्णवर्णात् शंभोस्तेजसः गौरवर्णं मुखं कथं जातमिति तर्कयन्नाह "अथेति" अथेतितर्के किं पुरापूर्वं पुरारेः शिवस्य सितेनमहसा पश्चात् तमसा तमोगुणेन कृत्वाजरितेन आच्छादितेन कालिमाकृष्णत्वं आप प्राप्तं पूर्वंतुशंभोर्गौरत्वाद्गौरमेव तेजउदभूत् पश्चात्तन्निष्ठ तमोगुणाच्छादितं सत् कृष्णत्वं प्रापेति भावः अथ पश्चात् किंतेनैव कृष्णीभूतेनसितमहसा तस्यावदनीभवतानिजागौरत्वरूपा स्वकीयाप्रकृतिरपि अभाजिप्राप्ता पुनर्गौरमेवाभवदित्यर्थः ननुकार्ष्ण्यं कुत्रगतमित्यत आह किं कृत्वा तत् तमश्छादनजन्यं कार्ष्ण्यंकेशे इति जातावेकवचनंकेशेष्वित्यर्थः विसृज्यदत्वा अत्रैवोपमानमपि गूढं तथाहि यथासितं महो यस्यतेन चन्द्रेण पूर्वंसितेनापि पश्चात् तमसाराहुणाजरितेनग्रस्तेन कृष्णत्वंप्राप्यते पश्चाच्च तत्त्यक्त्वा न निजागौरत्व रूपाप्रकृतिरपि प्राप्यते तद्वदित्यर्थः पूर्वरूपालंकारः ॥ १४ ॥

त्रितयमथ दृशां तदीयमासीच्छु
चिमहसा यदसौ त्रिधा प्रसिद्धः ।
प्रकृतिमसृणमेव यत्तदस्मिन्नु रु
करुणाप्यभवत् फलानुमेया ॥ १५ ॥

अथ नेत्रत्रयमग्नितेजसा जातमित्याह "त्रितयमिति" अथ तदीयं दृशां त्रितयं शुचेः अग्नेर्महसाऽऽसीत् नन्वन्यस्य तेजसा किंनाभूदित्याह यत् यस्मात् असौ अग्निः त्रिधादक्षिणाग्न्यादि भेदेनत्रिविधः प्रसिद्धः तदेववर्णयति यत् यस्मात् तत् नेत्रत्रयं प्रकृत्यैवमसृणं स्निग्धं आसीत् तत्तस्मात् अस्मिन् नेत्रत्रये उरुर्भूयसीकरुणापि फलेनअनुमातुंयोग्या अभवत् अयं भावः सदैवस्निग्धत्वात् तस्मिन् करुणारसकृता पृथक् स्निग्धतानैवालक्षि किंतु तस्याः करुणायाः अभीष्ट प्राप्तिरूपफलेन करुणास्त्या जातेत्यनुमानादेव मालक्षिमीलितालंकारः ॥ १५ ॥

कुवलयमिदमेव सृष्ट्यमूहं नियतिकृतास्यदलीलतारकालि ।
इतरदथ तदोषधीयेव सृष्टं सुरभितयापरिलोभ्य जातु धत्ते १६

"कुवलयमिति" इदंनेत्रद्वयमेव मुख्यं कुवलयं कमलं ज्ञेयं तर्कनीयं कुतइत्याह कीदृशं नेत्रद्वयं मियत्यानियमेन कृतः आस्यदोषेण एताद्दशः तारकाकनीनिका रूपः अलिर्भ्रमरो यत्र तर्हिलोके प्रसिद्धं कमलं किमस्तीत्याह अथ इतरत् लोकप्रसिद्धंतु कमलं तस्यनेत्रद्वयरूपकमलस्य ईर्ष्यया असूययेव भृङ्गंभ्रमरं स्वसुरभितया गंधेन परिलोभ्यस्वस्मिन् धत्ते तथापि क्वातुकदाचिदेव नतुतद्वत्सर्वदेवेतिभावः अतएव तद्गुणग्राहकत्वात्तद्धौर्णमिति ध्वनितं अन्योऽपि मौण: मुखेनराजादिना सह ईर्ष्यया अन्यान् जनान् धनादिना परिलोभ्य कदाचित् स्वस्वरूपतां दर्शयति तारकाऽस्यः कनीनिकेत्यमरः ॥ १६ ॥

यदभवदथ संध्ययो रुचा भ्रू युगलमनंगशरासजैवमस्याः ।
वदनचिकुरयोस्तदन्तरे तद्दिननिशयोरिव सर्वदा विभाति १७

अथ सन्ध्ययोस्तेजसाभ्रुवौजाते इत्याह "यदिति" अथ यत् यस्मात् संध्ययोः रुचातेजसा अस्याः महालक्ष्म्याः भ्रुवोर्युगलं अभवत् कीदृशं अनंगस्य कामस्य शरासनं धनुर्जंतु शीलमस्य तत्तस्मात् तस्यामुखकेशयोः दिननिशयोरिव अंतरे मध्ये तत् सर्वदाविभाति सन्ध्येहि दिन निशयोर्मध्ये भातः ॥ १७ ॥

अथ शुचिसखितेजसा तदीय श्रुतियुगलोभवतापि मंजुलेन ।
शुचिरुचिजनिताक्षिसख्यमापे पुनरपि तेन
सतामहो सुहृत्त्वम् ॥ १८ ॥

अथ वायुतेजसातेकर्णौ जातावित्याह "अथेति" अतिसुन्दरेण शुचेरग्नेः संखावायुस्तस्यतेजसा तस्याः श्रुतियुगलोभवतापि अवस्थांतरं प्राप्तेनापि पुनरपि अग्नितेजसाजनितयोः अक्ष्णोः सख्यं मित्रता तेन आपे प्राप्तं अहो आश्चर्यं सत्पुरुषाणां सुहृत्वमविचिन्त्यमितिशेषः अयंभावः अग्निवाय्वोर्मिथः सुहृत्वात् अग्नितेजसा जनितयोर्नेत्रयोर्वायुतेजो जनितकर्णयुग प्रणयित्वात्त-त्कार्ययोरपि तैजसोस्तत्रापिमिथः सुहृत्त्वं जातं आकर्णलोचनास्वेत्यर्थः ॥ १८ ॥

निजसखिशिखिनः स पाशिशत्रो
विजयकृते स्वमहो द्विधा विभज्य ।
व्यरचयदथ पाश युग्मकं किं
श्रुतियुगलं च्छिद्रेतरं समीरः ॥ १९ ॥

"निर्जेति" अथ सः समीरोवायुः निजतेजोद्विधाविभज्य तत् श्रुतियुगलं किञ्चिद्दूरेतरं दृढं पाशयुग्मकं अरचयत् तस्य पाशाकृतित्वात् कस्मै पाशितः पाशभृतः वरुणस्य शत्रोः निजसख्युः शिखिनः अग्नेः विजयकृते विजयार्थं अयं भावः वायुर्नेति विचारितं मम मित्रस्याग्नेः शत्रुः वरुणोस्ति तस्यमुख्यं शस्त्रं पाशएव अतोहं दृढंपाशद्वयं स्वमित्रविजयार्थं रचयामि शोलार्थेच्छिदेः कुरः छिदुर इति । १८ ।

स्फुटधृतमणिसंघमेकगम्यं निजजनदीनसरस्वतीततीनाम् ।
विलसति यदिदं तु सप्तकांकाकृति किमुसप्त विजेतुमं बुराशीन् ॥ २० ॥

"स्फुटेति" इदंश्रुतियुगलं यत् यस्मात् ससेति योंकः तद्वत् आकृतिर्यस्य तादृशं सत् विलसति तत्किं ससंख्याकान् अंबुराशीन् समुद्रान् जेतुं विलसति उभयोः सप्तांकयोर्योगे चतुर्दशभवन्ति द्विगुणाश्च निजार्धान् जयन्तीतिभावः अन्यदपि जयकारणमाह कोदृशं श्रुतियुगलं स्फुटंप्रकटमेव धृतोमणिसंघोयेन समुद्रास्तु गूढ धृतमणयः अतोविशेषः तथा निजजनानां स्वभक्तानां दीनायाः सरस्वती ततयः वाणोसंहतयः तासां एकं गम्यस्थानम् समुद्रास्तु महतीनां सरस्वतीततीनां नदोपंक्तोनां गम्याः नतुदीनानां क्षुद्रनदोनामपि महत्त्वं हि दीनानां श्रयणात् भवति नतुमहतामिति भावः । २० ।

अथ लसति तदन्तरे किमष्टादशनिगमस्थितिसूचको नवाङ्कः ।
अवरतवसतेः किमत्र वेदः श्रुतिरिति लाक्षणिकं पदं प्रपेदे २१

"अथेति" अथ तस्य श्रुति युगलस्य अन्तरेमध्येयोनवाङ्काकारः स किं अष्टादशानां निगमानां विद्यानां स्थितेः सूचकोलसति कर्णमध्येहिनवांकाकृतिर्दृश्यते द्विगुणितास्वनव अष्टादशभवन्ति अष्टादश विद्यास्तुक्ताः पुराण न्याय मीमांसा धर्मशास्त्रांग मिश्रितः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति चतुर्दश आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थं शास्त्रकमिति च तिस्रः अथ किं अत्र श्रुतियुगले अवरतवसतेः निरंतरनिवासात् वेदः श्रुतिरिति पदं लाक्षणिकं प्रपेदे लक्षणाया आश्रयं लाक्षणिकं लक्ष्यशक्यसंबंधः तदुक्तं मुख्यार्थबाधे तद्योगे रूढितोथ प्रयोजनात् अन्योर्थोलक्ष्यते यत्साक्षणारोपिताक्रियेति अत्र त्वयं भावः श्रुतिपदवाच्यं तत्कर्णद्वयं तत्संबंधात् वेदोपि श्रुतिताम्नाभवत्स्ति श्रुतिरत्रप्रमाणमित्यादि अतेप्रमाणेन कर्णयुगस्यानन्ययात्

वेदैएवलक्षणाकार्येति पूर्वंतु वेदस्य एवेद वनामाभूत् ततस्तस्याः श्रुतिवृग संयोगात्ते न श्रुतिरिति नामलक्षणया प्राप्तमिति श्लोकतात्पर्यं भगवतोऽहि शिव मुखात्सर्वाणि शास्त्राण्यश्रृणोत् अत्र च शब्दार्थो परित्यागादजहल्लक्षणावे व्याख्यया मंत्राःक्रोशंतीत्यादौ श्रुतिः श्रोत्रे च तत्समष्टाम्नायवार्त्तयोः स्त्रियामिति विश्वः । २१ ।

अथ पितृपतितेजसाति कृष्णाः
कुटिलतरा स्तनवोऽति दैर्घ्यभाजः ।
मृदि मम स्पृणताजुषो निसर्गा
च्चिकुरचया वरसौरभा अभूवन् ॥ २२ ॥

अथ यमतेजसा केशाजाता इत्याह "अथेति" पितृपतेर्यमस्य तेजसा तस्याः केशसमूहा अभूवन् कीदृशाः अतिशयेन कृष्णाः तथा अतिकुटिलाः तथा तनवः सूक्ष्माः तथा अतिदीर्घाः तथानिसर्गादेवमृदिमानं मृदुत्वं मम-णतां स्निग्धतांचजुषंतीतितै तथानिसर्गादेववरं सौरभंयेषुते अन्यासांतुर्जघि-मसेहादिना कोमलाः स्निग्धाः सुगंधयश्चकेशाभवंति तस्यास्तु स्वभावादेवेति विशेषः । २२ ॥

कथमिव तुलयंति कुंतलांस्तत्कचनियमेन मनीषिणश्चमर्याः ।
क्वचसु सुरभि तेह तानवं क्व क्व च मसृणत्वमथ
क्वतेषु कार्ष्ण्यम् ॥ २३ ॥

"कथमिति" मनीषिणः कवयः तस्याः केशसमूहेन सह चमर्या केशान् कथमिव केन प्रकारेण तुलयंति इति न विद्मः कुतः इहचमरीकेशेषु तादृक् यादृशो तत्केशेषु तादृशो सुरभिताकास्ति अथ च तादृशं तानव सूक्ष्मताकास्ति तादृशं च मसृणत्वं कास्ति अपि च तादृशं कार्ष्ण्यंकास्ति नकापीत्यर्थः । २३ ।

लगति हृदि कलाप एष मुख्यः
शिरसिरुहां भुजगाशिनस्तु गौणः ।
विजितविधुबिंबं बिभर्ति चूडा
मणिमयमल्पमतोऽपि चन्द्रकं सः ॥ २४ ॥

"लगतीति" एषः शिरसिरुहां तस्याः केशानां कलापः समूहः ममहृदि

सुख्योलगति भाति भुजगाशिनः मयूरस्यतुकलापः बर्हः गौणः भाति कुत इत्याह अयं केशमनूहः विजिताविधोश्चन्द्रस्य विभाकान्तिर्येन तादृशं चूडा मणिं शिरोरत्नं विभर्त्ति सः मयूरस्यवर्हस्तु मतचन्द्रक इति निरुक्तेः कलापः संहतौकाञ्चयांवर्हभूषणतूणयोरित्यजयः । २४ ।

तिलकुसुमसदृक्षतदीयनासोभवदपि मंजुलराजराजतेजः ।
अजहदथन राजराजतां तत्परिजुषतेहि यदंघ्रिमास्यराजा ॥

अथ कुबेरतेजसानासाजातेत्याह "तिलेति" अथ मंजुलं राज राजस्य कुबेरस्यतेजः तिलकुसुमेन सदृशीयातदीयानासा तां संपद्यमानमपि अकीयं राज राजतां न अजहत् नात्यजत् कुतइत्याहहियतः यस्य तत्रासोभवतः राज राजतेजसः अंघ्रिमूलं आस्यंमुखमेव राजाचन्द्रः परिजुषते सेवते अयमर्थः राजराजोहि स भवति यदं घ्रिमितरे राजानः सेवंते तथात्रापि सुखरूपराज-स्तदंघ्रिसेवनात्पुनरपि तस्य राजराजतानष्टेति राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ यक्षेशक्रे च पुंसिस्यादिति विश्वः । २५ ।

किमुसमररथं स्मरोव्यधात्तां मलयजनिश्वसनां विजेतुमीशम् ।
नयनझषयुगंतु पार्श्वयोस्तद्धुरि च जवाय विधाय धुर्य्यमेकम् ॥२६॥

"किन्विति" तांनासांस्मरः कामः किं समरस्य युद्धस्य रथंव्यधात् किं कर्त्तुं ईश्वरं ईशं विजेतुं रथरूपतामेवाह कीदृशीं मलयजश्चन्दनः तद्वत्सुगं-धिनिश्वसनं यस्यां कामस्यापि मलया चलाञ्चनिर्यस्य तस्यश्वसनस्य वा-योर्युद्धरथोऽभिहितः श्री शंकराचार्यैः वसंतः सामन्तोमलयमरुदायोधनरथ इति यस्येति शेषः ननुरथस्तु सम्पन्नः परमश्ववाहः केइत्यपेक्षायामाह किं कृत्वा तस्यानयन झषरूपंझषयुगं मीनयुग्मं नासारूपरथस्य पार्श्वयोः धुर्यं विधाय अथेशंशोभंजेतुकामः कामस्तथापितं रथंमंथरं वीक्ष्य जवाय तस्यातिवेगाय एकंललाटसंबंधिनं तृतीयं नेत्ररूपं मीनंतुधुरि अग्रे धुर्यंविधाय अय-माशयः यस्ययद्वाहनं भवति तदेवस्वरथाग्रेयोजयति कामस्यतुमीनवाहन-त्वान्मीनानामेवरथाग्रे योजनंयुक्तं नेत्राणां च चञ्चलत्वान्मीनसाम्यम् । २६ ।

ज्वलदरुणिमसौकुमार्य्यधुर्य्यावभिनवविद्रुमपल्लवाभिमर्शौ ।
स्फुटमरुणकुमारयोर्महोभ्यामथ जनितावधरोत्तरौ तदोष्ठौ ॥

अथारुणतेजसाऽधरोष्ठःकुमारतेजसाचोत्तरोष्ठोजातइत्याह"ज्वलदिति" अथ अरुणकुमारयोस्तेजोभ्यां तस्याः अधरोत्तरौ ओष्ठौजातौ कीदृशौ ज्वलत्

प्रकाशमानस्य अरुणिम्नः शोणत्वस्य सौकुमार्यस्य कोमलत्वस्य च धुर्यवहतः इतितो अरुणकुमारयोस्तेजोभ्यां जनितत्वादितिध्वनिः तथा अभिनवयोः पल्लवविद्रुमयोः अभिमतौ प्रतिभटौ अरुणत्वात् कोमलत्वाच्च । २७ ।

विमलतरतनुः सदा सदुक्तिस्फु
टितरुचिर्विशदांशुका द्विजालिः ।
श्रुतिगुणवसुसंमिता तदीया
समजनि सा महसा प्रजापतीनाम् ॥ २८ ॥

अथ प्रजापतीनांतेजसादंताजाता इत्याह "विमलेति" अथ प्रजापतीनां दक्षादीनां तेजसाःतस्याद्विजानां दन्तानां आलिःपंक्तिस्समजनि जाता कीदृशी विमलतराचतनुः सूक्ष्माचेति कर्मधारयः तथा सदेव सदुक्तिसमये स्फुटिता प्रकटीभूता रुचिः शोभायस्याः तथाविशदा अंशुकाः किरणायस्याः तथाश्रुतिभिश्चतुर्भिर्गुणितैर्वसुभिरष्टभिर्द्वात्रिंशद्भिरित्यर्थः संमिता अथाप्रस्तुतार्थः अथ सृष्ट्यादौ प्रजापतीनां तेजसा द्विजालिः ब्राह्मण पंक्तिर्जाता कीदृशी विमलतरा तपोभिः पापमलविहीना तनुः शरीरंयस्याः तथा सदेव सदुक्तिभिः सिद्धांतप्रतिपादकोक्तिभिः प्रकटिताशोभायस्याः तथा विशदानि अंशुकानि वासांसि यस्याः तथा श्रुतयोवेदाः गुणाःमेत्रोमर्यादादयः तएववसूनिधनानितैः संमिता संमानिता ब्राह्मणानांहिविद्यैवधनं दंतविप्रांडजाद्विजा इत्यमरः २८

अथ रुचमिव लिप्सुचैतदीयां तपसि सदा रतमस्ति कुन्दवृन्दम् ।
विधुरपि निजचन्द्रिकां ह्रियेवस्थगयति तद्रुचिनिर्जितां
मुहुः सः ॥ २९ ॥

"अथेति" अथ च एतद्दंतसंबंधिनीं रुचंकान्तिं लिप्सुरिव कुन्दानां वृन्दं सदेव तपसिमाघेरतमस्ति कुन्दंहिमाघेजायते अन्योप्युच्च पदवीं वांच्छन् तपसि रतोभवति अथ स चन्द्रोपि तेषां दन्तानां रुच्यानिर्जितां निजचन्द्रिकां ह्रिया-लज्जयेव मुहुः पुनः पुनः स्थगयति तिरोधत्ते कृष्णपक्षे इति शेषः माघ्यंकुन्दमित्यमरः । २९ ।

अथ महसि निजे हरिस्तदृष्टादथ सुजनिर्मितये चतुर्भुजोत्थम् ।
निखिलमपि दधावतारजन्यं विभुजनगं किममिप्रयञ्चसारम् ॥

अथ विष्णुतेजसातदष्टादशभुजाजाता इत्याह "अथेति" हरिर्विष्णुः तस्यः अष्टादश भुजरचनार्थं निजेमहसि चतुर्भुजोत्थसारं तथानिखिलं दशा-वतारजन्यंसारं तथा त्रिभुवनजन्यं च सारं बलं किं अमिश्रयत् मिश्रितवान् अयं भावः हरिणेतिचिन्तितं केवलेन मम तेजसा ऽस्या अष्टादश भुजानां निर्मितिर्दुर्घटास्ति अतः प्रतेकभुजपर्याप्तये एकं स्वतेजः चत्वारि च भुजाः दशचावताराः भुवनानां च त्रयं एवं कृत्वा जाता अष्टादश एषां सारैरस्या भुजान् निरमात् । ३० ।

तदनु वसुमहः करांगुलीनां नवतिमजीजनदल्पपर्वसंधिम् ।
प्रतिकरमपि या करायफालैर्मनसिजयंचशरीश्रियंबभार ३१

अथ वसुनांतेजसा तत्करांगुल्योजाता इत्याह "तदन्विति" तत्पश्चात् वसूनांमहः तस्याः करांगुलीनांनवतिं अजीजनत् उत्पादितवत् ' एकस्मिन् भुजेहि पञ्चांगुल्योभवन्ति पञ्चगुणिताष्टादश नवतिर्भवति कीदृशींमंगुलिन-वतिं अल्पाः सूक्ष्माः पर्वणां संधयोयस्याः याचनवतिः प्रतिकरंकराग्रानखाएव फालाः तैरुपलक्षितासतो मनसिजस्य कामस्य पञ्चशर्याः श्रियंशोभांबभार पञ्चानां शराणां समाहारः पञ्चशरी अकारांतोत्तरपदो द्विगुः स्त्रियामिष्ट इतिङीप् । ३१ ।

उपचयमनुचापचीयमानं किमुनिजधाम सुधामयो विलोक्य ।
तदुपचितिकृतेथ तेन तेने स्तनयुगलं विमलांशुकं तदीयम् ३२

अथ चन्द्रतेजसास्तनौजातावित्याह "उपचयमिति" सुधामयश्चन्द्रः किं निजंधामतेजः सितदलेक्रमात् उपचयं वृद्धिंप्राप्य तदनुअसि तदले अपचीय मानं क्षीणतां प्राप्नुवन् विलोक्य अथतस्यातेजसोनितरां उपचितिकृते वृद्ध्यर्थं तेनतेजसा तदीयंस्तनयुगलं तेनेविस्तारयामास निर्ममावितियावत् कीदृशं विमलं अंशुकंवासो यस्मिन् धामपक्षेतु विमला अंशुकाः किरणायस्येति स्वा-र्थेकन् अयंभावः चंद्रेणेत्यालोचितं ममतेजः सदावर्द्धतेक्षीयतेचेतिकष्टं अस्याः स्तनीभूतंतुनितरां वर्द्धिष्यते नतुपुनः क्षयिष्यतीतिमत्वातत्स्तनौनि-रमात् । ३२ ।

करिपरिदृढकुंभतस्तदीयाकृतिमथ्चलं त्वखिलं श्रिया समेतम् ।
सुखमथ ललना च गौरिमाणं सुरभिसुरद्रुमतस्तु
कामदत्वम् ॥ ३३ ॥

करोत्यादिभिस्त्रिभिः कुलकम् तावत् तीयपद्यपादत्रयव्याख्या इन्दुः चन्द्रः इत्थं पूर्वोक्त प्रकारेण क्षीरोदमंथनोत्थात् निजसहजकुलात् तस्मिन् यद्यत् गुण सारं तत्तद्गृहीत्वा कथमपि महतायत्नेन मृदुभिः करैः कृत्वा किं तदीयंकुच युगलं निर्ममौ अयंभावः चंद्रेणेतिव्यवसितं केवलेनमत्तेजसाऽस्याः कुचयुगं निर्मातुमशक्यं अतोऽन्येभ्योऽपि गुणसारं गृहीत्वा रचयामि किंचान्येभ्योयाच् अयाबहवंशस्यास्यदमतः क्षीरोदोत्थितेभ्य ऐरावतादिभ्यस्तयैादश निज सहजेभ्य एवार्थयित्वा गुणसार ग्रहणं युक्तं अन्यापि अतिमनोज्ञं वस्तुनिर्मातु कामः स्वबन्धूनपि सहायीकृत्य कथमपि मंदं मंदं कोमलैर्हस्तैः कृत्वारचयति अथकस्मात्किं किं गुणसारं अग्राहीत्याह "करीति" करिषु परिवृढस्तनायकस्य ऐरावतस्य कुम्भाभ्यां तदीयांकुचयुगसम्बंधिनीं आकृतिं गृहीत्वा अन्योऽपि कुलालादिः घटादिकं रचयन् तावन्मृदादिभिराकृतिमात्रं रचयति अथ अमृतं-तुनिखिलमेव गृहीत्वा सर्वस्यापि सारभूतत्वात् कोऽयं श्रियालक्ष्याश्लेषेण शोभयेत्यर्थः समेतंयुक्तं शोभामपि समग्रामेव गृहीत्वेत्यर्थः अथ जलजात् पाञ्चजन्यशङ्खात् मुखंगौरिमाणं च गृहीत्वा शङ्खस्यहिमुखवल्कं समुखं भवति अथ सुरभिः कामधेनुः सुरद्रुमः कल्पवृक्षः ताभ्यां कामदत्वं अभिलषितार्थं दत्वं अयतुअरदत्वंबोध्यम् नचात्रजगज्जनन्याः स्तनयोः अरदत्वमनुचितमिति भ्रान्तिर्विधेया शृङ्गारवर्णनावसरेतस्योचित्यात् तथैव सौंदर्यलहर्यां श्री शंकरे-भंगवत्याः प्रत्यंगमनंगदत्वं वर्णितम् । ३३ ।

धनुष उरुकठोरतां सहालादपि
च हलाहलतो ऽरिमोहदत्वम् ।
कुतकयुत्तविनर्तनं तुरङ्गान्मणि
वरतो रमणीयतां सरम्भात् ॥ ३४ ॥

"धनुषइति" धनुषः शार्ङ्गाख्यात् उरुकठोरतां अतिकठिनतां तथा हालयामदिरयासहितात् हलाहलतः कालकूटविषात् अरीणां दैत्यानां मोह दत्वं तद्दर्शनेनहिमहिषादीनां मोहोभविष्यति विषमपि जनंमूढंकरोति तथा सुरापि अथ तुरङ्गादुच्चैः श्रवसः कुतकेनकुतूहलेनयुतंयद्विनतान तथा रम्भयाऽप्सरोभिस्सहितात् मणिवरतः कौस्तुभाख्यात् रमणीयतां सुराङ्गनि प्रियाङ्गमेत्यमरः । ३४ ।

अमरनगपर्हृतां दुग्धेद्यात्सहजकुलाद्गुणसार मित्थ मिंदुः ।

कथमपि स्वट्टुभिः करैर्गृहीत्वा कुचयुगलं किमु निर्ममौ तदीयम् ॥ ३५ ॥

"अमरेति" दिवः स्वर्गस्य वैद्यात् धन्वन्तरितः देवज्वरनाशकर्ता च गृहीत्वा तस्याः कुचयुगं किं विधुर्निर्ममाविति पूर्ववदन्वयः चतुर्दशरत्नैः घटितं तत्कुच युगमिति पर्यवसन्नम् चतुर्दशरत्नानितूक्तानि मंगलाष्टके लक्ष्मीकौस्तुभपारिजाततरवीरम्भादि देवांगना धेनुःकामदुघासुरासुरगजो धन्वन्तरिश्च-न्द्रमाः अश्वः सप्तमुखोच्चिरश्वनिचयः शङ्खोविषंचामृतं रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु ते मङ्गलमिति । ३५ ।

अथ सुरपतिविलतेजसास्यास्सम जनितचित्रवलीयुतावलग्नम् । हरिरपि तन्निरीक्ष्य यत्नदृग्भिः क्व मम महोगतमित्यभूत्सचित्रः ॥ ३६ ॥

अथेन्द्रतेजसामध्यं जातमित्याह "अथेति" सुरपतेरिन्द्रस्य चित्रवर्णेन तेजसा अस्याः तत् त्रिवलीभिर्युतं अवलग्नंमध्यं जनितं तत्कायत्मध्यं हरिरिन्द्रोपि सहस्रमिताभिः स्वदृग्भिः ननिरीक्ष्य अतिसूक्ष्मत्वाददृष्ट्वा मम तेजः कुत्र गतं इति स चित्रः साश्चर्यः अभूत् चित्रतेजसस्तस्योत्पत्तेश्चित्री कार्यं युक्तमेवेति भावः अतिसूक्ष्ममध्याजातेति निष्कर्षः वलीतिकृदिकारत्वादीप् मध्यमवावलग्नंचेत्यमरः ॥ ३६ ॥

कथितमथ च केनचित्तु मध्यं तव महसाजनि भो स्तदेवनास्ति । स्थितिरथ कुचयोः कथं न तच्चेद्यदघटनाघटनापटीयसीयम् ३७

"कथितमिति" अथ मम तेजः क्वगतमिति चित्रीभूतमिन्द्रं प्रतिदेवमध्ये केनचिद्देवेन कथितं हे इन्द्र तवमहसा अस्यामध्यं अजनि जातं अथेन्द्रो ब्रूते भो देव यन्मध्यं गदसि तदेवनास्ति यद्यभविष्यत् तदेतरांगवदद्रक्ष्यत् न दृश्यते ऽतोनास्तीत्यनुपलब्ध्यातदभाव एवेति भावः अथ पुनर्देवेनोक्तं हे इन्द्र यदि तन्मध्यं नस्यात् तर्हिकुचयोः स्थितिः कथंस्यात् अयंभावः यथापीनोदेवदत्तो दिवान भुंक्ते इत्यत्र दिवाऽभुंजानस्य देवदत्तस्य रात्रिभोजनं विनाऽनुपपद्यमानपीनत्वज्ञानात्तदुपपादकरात्रिभोजनमर्थापत्याकल्प्यते तथात्रापि मध्यं विनानुपपद्यमानातिपीनकुच स्थितिज्ञानात्तदुपपादक मध्यसंभवोर्थापत्याः कथं कल्पनीयः अथेत्यभिहितं इन्द्रोब्रूते हे देव यत् यस्मात् इयं महामाया अघटमायायाघटना तस्यां पटीयसी अतिचतुरास्ति अघटन घटना पटीयसी

मायायां किं न सम्भवतीत्यतो मध्यं विना कुचस्थितेरसम्भव उपपन्न इतिभावः अत्र तन्मध्यातितानवं वर्णयितुं देवकृत प्रश्नोत्तराभ्यां तदभाव एवकविना-भिहितः ॥ ३७ ॥

धरणिरपि च धाम्नि चारुणि स्वे
निजगुरुतामथ विस्तृतिं च सर्वाम्
प्रमुदितहृदया नियोज्य तस्मिन्
विरचयति स्म नितंबमंबिकायाः ॥ ३८ ॥

अथ पृथ्वीतेजसानितम्बोजात इत्याह "धरणिरिति" भूमिरपि प्रमुदित हृदयासती सुन्दरेस्वेतेजसि स्वकीयां सर्वामेव गुरुतां विस्तृतिं च नियोज्य अंबिकायाः नितंबंकटिपश्चाद्भागं विरचयति स्म अतएव तस्यानितंबः गुर्वविं-स्तृतश्च जात इति भावः इदानीं दुष्टजनातिभारो मत्तो व्यतिरिच्यतीति प्रमुदित हृदयेत्युक्तम् ॥ ३८ ॥

वरुणरुगपि सक्थिनी सुजंघे रुचिरतरे करुचे भवत्यमुष्याः ।
अपि कलितुमना मनाग्यदाभां विजनवने कदलीतपस्यतीव३९

अथ वरुण तेजसा जंघोरूजातावित्याह "वरुणरुगिति" अथ वरुणस्या-पितुक् अस्याः जंघाभ्यां सहिते सक्थिनी ऊरूभवतोसतीरुरुचे कोहशेतेइ अति रुचिरे ययोः स जंघयोः ऊर्वोः मनाक् स्वल्पामपि आभां ग्रहीतुकामा कदली विजनेवने तपस्यतीव तपः करोतीवेत्युत्प्रेक्षा सक्थिक्लीबेपुमानूरुरित्यमरः ३९

अथ विधिमहसा तदीयपादौ समभवतां क्रतुना विनापि रक्तौ
लवमिव समवाप्ययन्मृदिम्नः किसलयमापन पल्लवाभिधत्वम्४०

अथ ब्रह्मतेजसापादौ जातावित्याह "अथेति" ब्रह्मणोमहसातदीयौ पादौ समभवतां कीदृशौलाक्षयाविनापि प्रकृत्यैवरक्तौ अथ च ययोः कोमल-तायाः लवंलेशमिव प्राप्यकिसलयं पल्लवाभिधत्वं आपतप्राप पदोर्लवः पल्लव इति निरुक्तेः अत्र लाक्षारसावसेक कारणा भावेपि रक्तिम्नः कार्यस्योत्पत्तेर्वि-भावनालंकारःउत्तरत्र श्लेषमूलोत्प्रेक्षा अनयोःश्चाततिलतंडुलन्यायेनसंसृष्टिः४०

रुचिररुचिगतेश्च तावधस्ताद्यदकुरुतां नलिनं तथा मरालम् ।
नहि तदिदमसंगतं विधातोपरि हि यदब्जमरालयोश्चदास्ते॥

"रुचिरेति" तौ पादौ यस्मात् रुचिरया रुच्या गतेर्गमनेन च नलिनंकमलं मरालं हंसं च अधस्तात् अकुरुतां रुच्याकमलं गतेश्चहंसं सौलक्ष्यात् यदध-श्चक्रतुः तदिदं असंगतं अयुक्तं नास्ति कुत इत्याह यतः अनयोः पादयोर्विधा-ता कर्ताविधाताब्रह्मैव कमलहंसयोरुपरिसदैव आस्ते आसीनोऽस्ति कमला-सनत्वात् हंसवाहनत्वाच्च इदमत्रसारस्यं तयोः कारणं ब्रह्मैवतावधश्चकरोति तत्कार्यं किमुनकुर्यात् कार्येहि कारण गुणा दृश्यंते ॥ ४१ ॥

अथ समजनि तिग्मधामधाम्ना मृदुलतरं दशकं तदंगुलीनाम्।
पृथगिव स विभज्ययत्नभास्वान्निजकिरणांश्च शतं शतं ससर्ज॥

अथ सूर्यतेजसापादांगुल्योजाता इत्याह "अथेति" सूर्यतेजसा तस्याः पादांगुलीनांदशकंजनितं कीदृशं अतिकोमलं यत्रांगुलीदशके स सूर्यः एका-मेकामंगुलिंप्रति सहस्रमितान् किरणान् पृथक् विभज्य विभागं कृत्वेव शतं शतं ससर्ज ॥ ४२ ॥

द्वयधिदशसु रवेरवैमि नूनं तनुषु दशैव कृतार्थतां प्रयाताः।
यदिह परिणता नखात्मना याश्चरणसरोजयुगं सदा जुषंते४३

"द्वयधीति" द्वादशसुरवेर्मूर्त्तिषु दशैवमूर्तयः कृतार्थतांप्रयाताः इत्यहंजाने यद्यस्मात् इहदशस्वंगुलिषु नखात्मना परिणामं प्राप्तास्ताः दश मूर्त्तयः श्रि-योमहालक्ष्म्याश्चरण कमल युग्मं सदासेवंते ॥ ४३ ॥

इति रुचिरतरां प्रतिप्रतीकं चि-
दिवसदः समुदीक्ष्यतां तदानीम्।
स्वयमपि च निजानुभूतिमेयं
मुदतिशयं न हि वक्तु मीशिरे ते ॥ ४४ ॥

तदंगस्थं भवमुपसंहरन्नाह "इतीति" ते देवाः इत्यमुनाप्रकारेण प्रत्यंगंतां भगवतीं तदानीं अतिरुचिरांवीक्ष्य तस्माज्जातं मुदतिशयं आनन्दभरंस्वयमपि वक्तुं न ईशिरेईदृश आनन्दो जात इति वक्तुं न समर्था अभूवन्निस्वर्थः कतर्हि-मादृशः कथयेदिति कवेस्तात्पर्यं कोमुदतिशयं स्वानुभवमात्रेणमेयं अनुमानुं योग्यम् ॥ ४४ ॥

हरिरथ निखिलाज्जगादगाधेनरसमुदन्वति निर्भरं निमज्जन्
कुरुत सफलतां स्वभूषणानां धुरि जगतामुपढौकनाज्जनन्याः

"हरिरिति" अथ विष्णुः तांवीक्ष्येतिपूर्वतोनुवर्त्तनीयं गाधेतरे अगाधे सुदुरत्वति आनन्दसमुद्रे निर्भरंगाढं निमज्जन् सन् निखिलान् देवान् जगाद हे देवाः जगतांजनन्याः धुरिअग्ने उपढौकनात् अर्पणात् स्वभूषणानां सफलतां कुरुत ननुभूषणार्पणाद्भवतातस्याः शिरसिकश्चनोपकारोस्ति किंतु स्वभूषणानामेव साफल्यं भविष्यतीति भावः उदन्वानुदधिः सिन्धुरित्यमरः ॥ ४५ ॥

द्युतिविजितविद्युतिं स चूडामणिमसृजन्मुदितोथ विश्वकर्मा
शिरसि भगवती स्वयं दधौ यं गदितु मिष्टार्हति
तस्य कः प्रभावम् ॥ ४६ ॥

अथ विष्णुकथनानन्तरं ओमित्युक्तवत्सुसुरेषु तावन्निखिल शिल्पकला कुशलो विश्वकर्मैवभूषणान्यर्पयदित्याह "द्युतीति" अथ विश्वकर्मा मुदितः सन् द्युत्याविजिताविधीर्द्युतिर्येन तं चूडामणिं असृजत् ददौ तस्यै इति शेषः यं चूडामणिं भगवती स्वयंशिरसि दधौ धृतवती तस्य प्रभावं इष्टगदितु कः अर्हति योग्योभवति नकोपीत्यर्थः ॥ ४६ ॥

खचितमणिचये चकुण्डले द्वे तडिदधिकद्युतिनौ श्रितश्रिणीये
श्रुतियुगमधिगत्यतन्मुखेंदोः परिलसतः परिधी इवोभयत्र ॥ ४७

"खचितेति" तथा स एव विश्वकर्मा तेद्वेकुण्डले ददौ कीदृशी खचितो मणीनांचयोययोस्ते तथा तडितः अधिकाद्युतिर्ययोः तथा श्रिताश्रीः शोभायाभ्यां तेके ये तस्याः कर्णयुग्मंप्राप्य तस्याः मुखरूपेन्दोः उभयत्र परिधीइव परिवेशाविवपरिलसतः यथोकस्मिंदो परिवेषद्वयंस्यात्तर्हितस्याः कुण्डलद्वययुतंवदनमुपमीयतेत्य भूतोपमयाध्वनितं यथा कपोलद्वयस्य चन्द्रद्वयतुल्यत्वात्कुण्डल द्वयरूपपरिधिद्वय योग्यतयापूर्णोपमैवास्त्विति चमत्कारातिशयः परिवेषस्तुपरिधिरित्यमरः ॥ ४७ ॥

अतिविशदविभं तथार्धचन्द्रं लसदलिकाभरणं सुरैरथो यत्।
मलसत्रमपहाय शुद्धमर्धं विहृतमलब्धि सुधारभूतमिन्दोः ४८

"अतिविशदेति" तथा स एव विश्वकर्मा लसत् प्रकाशमानं अलिकस्य ललाटस्य आभरणं भूषणं अर्धचन्द्रं ददौ कीदृशं अति विशदा उज्ज्वलाविभा यस्यतत् यत् अर्धचन्द्रं देवैरितिव्यतर्कि इति किं इदमर्धचंद्रं विश्वकर्मणा इंदोर्मलसंधं कलंकलेश युतमर्धं अपहायत्यक्त्वा यदवशिष्टं शुद्धं निष्कलंकं

सुसारभूतं च यथं तदेतत् विहृतमस्ति अन्योपि राजादिभ्यो यत्किंचिदल्पर्पयन् तन्निर्मलीकृत्यार्पयति ॥ ४८ ॥

अपि निखिलभुजेषु चांगदौघं मरकतहीरकपद्मरागखंडैः।
विरचितमतिचातुरीधुरीणाम लधिषणापिशुन स्फुटंविधातुः

"अपीति" स एव च तस्यानिखिलेषु अष्टादशसुभुजेषु अंगदानांकेयूराणांओघं ददौ कीदृशं मरकतहीरक पद्मरागाणां मणीनां खंडैः विरचितं तथा विधातुः अंगदनिर्मातुः अतिशयचातुर्याः धुरीणायाधुर्यस्याया अमलधिषणायाः पिशुनंसूचकं एतेषांनिर्मानाति चतुरास्तीतिसूचकानि ४८.

स्वयमथघटितांश्च हाटकस्याकठिनतया कटकात्प्रति प्रकोष्टम्।
प्रकटमकटु कर्णयोर्यदीयंसृजतिमिथोमिलनोत्थशिञ्जितं यम्॥

"स्वयमिति" स एव च तस्याः प्रकोष्टं प्रकोष्टं प्रतिकटकान् ददौ कीदृशान् हाटकस्य स्वर्णस्य अकठिनया कोमलत्वेन स्वयमेव घटितान् नतु-लोहमय साधनैरग्नितापनैर्वा यदीयं यत्संबंधि मिथः परस्परं मिलनादुत्थितं अकटुमधुरं शिंजितंक्वणनं कर्णयोः अंकल्याणं सृजति ददाति भूषणानांतु शिंजितमित्यमरः ॥ ५० ॥

सुविमलतपनीयदर्शनीयां निखिलकरांगुलिषूर्मिकावलिंच।
यदुपरि खचिताथ नीलकालिः करकमलेष्वलिसंभ्रमं तनोति

"सुविमलेति" स एव च निखिलासुकरांगुलिषु ऊर्मिकाणां अंगुलीयकानां आवलिं च ददौ कीदृशीं सुविमलेन तपनीयेन स्वर्णेन दर्शनीयां यस्या ऊर्मिकावल्याः उपरिभागेखचितानील कमणीनां आलिः कररूप कामलेषु अलिसंभ्रमं तनोति कररूप कामलेषु इयं भ्रमर पंक्तिरिति भ्रान्तिर्जायते इत्यर्थः अंगुलीयमूर्मिकेत्यमरः ॥ ५१ ॥

लसदमलरुचिं च कण्ठभूषां निखिलमनोरमतैकसीमभूमिम्।
अथ मनुमिव ये मनोजहूतेः क्वणनमिषात्पठतश्च नूपुरेद्वे ५२

"लसदिति" स एव च कंठभूषांग्रैवेयकं ददौ कीदृशीं लसन्ती अमला रुचिर्यस्याः तथा निखिलाया मनोरमताया एका अद्वितीयासीमः अवधेः भूमिः स्थानं स एव च तद्देनूपुरे मंजीरे ददौ तेके येक्वणनस्य मिषात् व्याजात् मनोजस्य कामस्य हूतेराह्वानस्य मनुं मन्त्रमिव पठतः ॥ ५२ ॥

निधिरथ पयसां तथोपहारं स तदधिकण्ठमचीकरत् हारम्।
तरलयति समीक्षितुं यदीयस्तरलतरस्तरलो न कस्यचित्तम्॥

"निधिरिति" अथ पयसांक्षीराणां निधिः क्षीरोदः तस्या अधिकण्ठं कण्ठसमीपं शोभनंहारं उपहारं बलिं अचीकरत् अकरोत् यस्य हारस्य तरलतरः अतिचञ्चलः तरलः हारमध्यगोमणिः समीक्षितुं द्रष्टुं कस्यचित्तं न तरलयति चञ्चलीकरोति अपितु सर्वस्यैवेति भावः उपहारः करोबलिरित्यमरः तरलोहारमध्यग इति च ॥ ५३ ॥

परिणतिरहिते सदैकरूपे ऽपि परमात्मसदृक्षविस्तरे च।
दृगविषयगुणे तथांवरे द्विश्रितरविभे उपमेयताविहीने ५४

परिणतोति स एव क्षीरोदः हेमंबरेवा ससीददौ कीदृशे परिणत्या पटवस्त्वरूपपरिणामेन रहिते तथा सदैव एकरूपे नित्तितरवासोवज्ञातुकवरे अपि तथा परामहतीचेयंमा लक्ष्मी परमा महालक्ष्मीरित्यर्थः तस्या आत्मना शरीरेण सदृक्षस्तुल्योविस्तरो ययोस्ते तथादृशोरविषयः अति सूक्ष्मः गुणः सूत्रंययोः तथाश्रिता शशिनोभायाभ्यां अतिभासुनतु अतिशुभ्रे इत्यर्थः कार्यः श्रो महालक्ष्म्या रक्तवस्त्रत्वात् श्रितरविभे इति वा पाठः इत्यर्थः तथा उपमेयताधर्मेण विहीने निरुपमे इत्यर्थः अथाप्रस्तुतार्थः ईदृशेहेमंवरे आकाशेभातः कीदृशेपरिणत्या अन्यथा भावेनरहिते अतएव सदैकरूपे तथा परमात्मना ब्रह्मणासदृशोविस्तरो विभुत्वंययोः तथा दृशोरविषयः गुणः शब्दाख्यः ययोः शब्दस्य श्रवणविषयत्वात् यद्यपि दृशोरविषय त्वं स्पर्शादावप्यस्तीत्यतिव्याप्त्या आकाशस्य शब्दमात्रगुणत्वात् स्पर्शादि गुणवत्तापत्तिरपि तथापि यादृक् दृग विषय त्वं शब्दस्य न तादृक् स्पर्शादेरिति सूक्ष्मदृष्ट्या विवेचनीयं कमलादेः कोमलत्वस्य सौरभस्य च ज्ञानलक्षणया चक्षुषापि ग्राह्यत्वात् तथा द्राक्षादेर्मधुरत्वस्य नवनीतादेरपि चक्षुषा मधुर शब्द ग्राह्यतास्तीति वाच्यम् तत्र विशेषतः श्रवणेनैव प्रतीतेः वस्तुतस्तु गूढश्लेषादौ शब्दालंकारेनाति व्याप्त्यादि दोषराहित्यस्यात्यंता पेक्षास्ति पुनः कीदृशेश्रितः रविः भानि नक्षत्राणिचयाभ्यां ते तथा उपमेयताधर्मरहिते गगनंगगनाकारमितुक्तेः अत्र चार्थवशाद्विभक्ति वचनयोः काचित्कपरिणामवशादाकाश पक्षेत्वेक वचनंबोध्यम् तस्य द्वितीयत्वात् अंबरंवाससि व्योम्नीति विश्वः ॥ ५४ ॥

षड्भिरपिददिःस्रजं स तस्मै स्फुटलतराम्बदितारविन्दवृन्दाम्

उरसि शिरसि चापरामदृभुम्लमणुपरम्भमरं च केलिकं समृ॥५५॥

"उदधिरिति" समुद्रोपि तस्यै स्रजंमालां ददिः अदात् एकां उरसि अपरां च शिरसि एवंद्वेमालेऽदादित्यर्थः कीदृशीं मृदुलतरं अति कोमल अमृदितं अम्लानं च अरविंदानां पद्मनां वृन्दं यमत्रांस एवं च केलिकच्छं क्रीडायोग्यं पद्मं च अदात् कीदृशं अदभ्राः बहवः भ्रमणपराः भ्रमरा यस्मिन् ददिरित्यत्र दाधातोराकारां तत्वाहूतेर्थकिः प्रत्ययः;द्वित्वं च ॥ ५५ ॥

मणिरचितमदात्स नागहारं विहितसुवेशविशेषमेष शेषः।

अलितिरुचिरामथाक्षमालां मृदुनि शयांवुशये प्रजापतिस्य॥

"मणीति" अथ एषः धरणिधरः शेषनागः तस्यै शोभनं नागहारं अदात् कीदृशं मणिभिः रचितं तथा विहितः सुवेषस्य विशेषः उत्कर्षोयेनतं अथ प्रजापतिः तस्याः कोमलेकरकमले भ्रमरपंक्तिवत् रुचिरां रुद्राक्षमाला अदात् पद्मशाखः शयः पाणिरित्यमरः ॥ ५६ ॥

अददत सुरया न जातु रिक्तं जितसुधया धनदस्तु पानपात्रम्।

सुरसरिदमलार्णसाथ पूर्णं कनकमयं च कमंडलुं विधाता ५७

"अददतेति" अथ धनदः कुवेरः पानपात्रं अददत कीदृशं जितासुधा अमृतं यया तया सुरया मदिरया जातुकदाचिदपि नरिक्तं पानेकृतेपि पूर्णं-भवेत्यर्थः अथ विधाता ब्रह्मास्वर्णमयं कमंडलुं अददत कीदृशं सुरसरितः गंगायाः अमलेन अर्णसाजलेन पूर्णं अत्रापि न जातुरिक्तमिति विशेषणं देयं अददतेतिददानेधातुराति ॥ ५७ ॥

अथ तुहिनगिरिस्समोदमस्या विमलमनेकविधं सुरत्नजातम्।

अपि विवुधवरैरदृष्टपूर्वं पदनलिनेह्युपढौकयांबभूव ॥ ५८ ॥

"अथेति" हिमाचलः अस्याचरणकमले सानंदं शोभनं रत्नजातं अर्पयामास कीदृशं विमलं तथा बहुविधं तथा देव श्रेष्ठैरिन्द्रादिभिरपि अदृष्ट;पूर्वं पूर्वं दृष्टं दृष्ट पूर्वं न दृष्ट पूर्वं अदृष्ट पूर्वं ॥ ५८ ॥

क्षुरखरनखरे खरांशुनेत्रं विकटसटाजटिलांससुग्रदंष्ट्रम्।

भयमिव तनुभृद्विषां च मध्येऽसमरमरालसुवालधिं च सिंहम्॥

"क्षुरेति" स एव हिमाचलः सिंहं च ददौ कीदृशं क्षुरवत् खरास्तीक्ष्णाः नखरानखायस्य तथा खरांशुः सूर्यः तद्वत् उग्रेनेत्रेयस्य तथा विकटाभिः सटा

भिः अटितो यंसोस्कंधोयस्य तथा उग्रादंष्ट्रायस्य तथा युद्धमधेर हिर्षा भक्ष्णां तनुभृत् मूर्त्तिधरं भयमिव तथा करालाा सुवालधिः शोभनः पुच्छोयस्य । ५८ ।

इति निखिलविभूषणानि वीक्षावयवचये परिधायभूषयंतीम् ददुरथ हरिणेव नोदितास्ते निजनिजमायुध मुच्छ्लन्मुदोस्यै ॥ ६० ॥

"इतीति" तेदेवाः इत्यमुना प्रकारेण सर्वाणि भूषणानि चूडामण्यादीनि निजांगसमूहे परिधार्य भूषयन्तींतां भगवतीं वीक्ष्य उच्छलन्तो स्वपुष्पमां-तोमुत् येषांते अतिमुदिता इत्यर्थः अथ विष्णुनैव प्रेरिताः अस्यैस्वंस्वं आयुधं च ददुः अन्येतु भूषणैर्भूषिता भवन्ति सातुमतुरत स्वांकेषु धारणात् भूषणानि भूषयतिस्मेति चमत्कारातिशयः ॥ ६० ॥

प्रथममथ निमथ्य तिग्मधारात्प्रमथपतिर्निजशूलतोन्यशूलम्। व्यतरदवरतासुरोरसाक्त्क्षतजनिपानरसज्ञकोटि तस्यै॥६१

"प्रथममिति" आदौ प्रमथपतिः शिवः तीक्ष्णधारात् निजशूलात् अन्यत् शूलंनिमथ्य उत्पाद्य तस्यैव्यतरत् ददौ कीदृशं अवतरं असुराणां उरसोजातस्य रक्त प्रवाहस्य निपानेरसताकोटिरग्रभागो यस्य असुरवक्षश्छेदकमित्यर्थः ६१

विलसति विलये यदीयकीलावलिवलित भुवनत्रयं नितांतम्। विपिनमिव सवन्यशाखिजीवंप्रबलदवानलकीलदह्यमानम्६२

"विलसतीति" प्रलयकाले यस्य शूलस्य कीलावल्या ज्वालापरंपरया वलितंआहतं भुवनत्रयंनितान्तंविलसति किमिव प्रबलदवाग्निज्वालयादह्यमा नंवनमथ हृक्षजोव सहितं विपिनंवनमिव वह्नेर्द्वयोर्ज्वालकीलावित्यमरः ६२

दलितदितिजशांबरीतमस्क हसितसहस्रसहस्रगुप्रतापम्। हरिरपि विविधारधारमस्या अभिनवचक्रमुपायनीचकार॥

"दलितेति" विष्णुरपि अभिनवं स्वचक्रात्स्य उत्पादनान्नूतनं चक्रंसुद-र्शनाख्यं अस्याभगवत्या उपायनीचकार उपहारं कृतवान् कीदृशं दलितं नाशितंदितिजानां शांबरीरूपं मायारूपंतमोयेन तद्यनेनैव दतैररचितामाया विलीयते इत्यर्थः तथा हसितः सहस्राणां सहस्रगूणां सूर्याणां प्रतापोयेन स्वं भदपं कोदृशोसोतिहासाभिप्रायः सहस्रसूर्येभ्योप्यधिक प्रताप इत्यर्थः तथा विविधा आराधाराच यस्य आमायायां वरीत्यमरः ॥ ६३ ॥

अरिषु कुलिशकर्कशेषु दृष्टं
क्वचिदपि यत्प्रहृते न पौनरुक्त्यम् ।
भ्रमणरयविकीर्णभासस्फुलिङ्गः
स्फुरति तडित्सगदा मदान्मुदाताम् ॥ ६४ ॥

अरिष्विति सएवविष्णुः तां प्रति तां गदां कौमोदक्याख्यां मुदाऽदात् तां कां वज्रवत्कठोरदेहेष्वपि शत्रुषु यस्याः प्रहृतेः क्वचिदपि समये पौनरुक्त्यं न दृष्टं एकवारमेव प्रहारं कृत्वा शत्रून्नाशयतीत्यर्थः । अथ च यस्या भ्रमणरयेण विकीर्णानां भासां यः स्फुलिङ्गो ऽग्निकणः स एव तडित्भूत्वा स्फुरति अत्र अपि यत् सतामिति पदानि देहलीदीपन्यायेनाभयत्रोपकुर्वन्ति ॥ ६४ ॥

उरुधरणिधर प्रवशंकपातो
त्थितदहनद्विगुणीकृतात्मरोचिः ।
असुहरणविधौ द्विषां पटीयो
निजकुशात्कुलिशं ददौ शचीशः ॥६५॥

उर्विति शचीशः इन्द्रः स्ववज्रान्नवमुत्पाद्य तस्मै वज्रं ददौ कीदृशं उरुषु बहुषु पर्वतेषु निशंकं पातेन उत्थितो यो दहनः तेन द्विगुणीकृता आत्मनो रोचिर्येन तथा शत्रूणां प्राणहरणविधौ अति चतुरं ॥ ६५ ॥

अपि च स हि वलीचकार घंटां
वलमथनोऽभ्रमुवल्लभाद्वलंतीम् ।
प्रबलमपि बलद्विषां न सोढुं
यदनुपमेयरणत्कृतिं रणेऽलम् ॥ ६६ ॥

अपिचेति स एव इन्द्रः अभ्रमुवल्लभात् ऐरावतगजात् घंटांवलीचकार उपहारंकृतवान् कीदृशींवलन्तीं जाज्वल्यमानां यस्या घंटायाः अनुपमेयां रण-

त्कांतिं सोढुं युद्धे प्रबलमपिशत्रूणां सैन्यं ष्अलं समर्थं न भवति बलिर्दैत्यप्रभेदे च करचामरदंडयोः उपहारे पुमानस्त्रीजरया ग्रिथचर्मणीति विश्वः ॥ ६६ ॥

तदनुहुतभुजाऽप्यऽदायि शक्तिः
क्वचिदऽपि न स्खलनात्स्फुटेव शक्तिः ।
न च भवति निवर्त्तनं यदीयं
रिपुनिवहं युधि भस्मसाद कृत्वा ॥ ६७ ॥

तदन्विति तत्पश्चात् अग्निनापि तस्यै शक्तिः अदायि दत्ता कीदृशी क्वचिदपि शत्रौ न स्खलनात् न मोघीभवनात् स्फुटा मूर्तिधरा शक्तिः पराक्रम इव यस्याश्च शक्त्या निवर्त्तनंपरावृत्तिःयुद्धे शत्रुसमूहं भस्मसात् सर्वं भस्म न कृत्वा न भवति शत्रून् भस्मीकृत्यैव निवर्त्तते नान्यथेत्यर्थः अनेन तस्याः प्रहारं कृत्वा पुन निवर्त्तनमपि दर्शितं इति सामान्यनिर्देशादन्दैवामप्येवमेवबोध्यम् तदधीन कात्स्न्र्ययोर्वासात् शक्तिरायुधभेदेस्यादुत्साहादीवले स्त्रियामिति हेमचन्द्रः॥६७

श्रवणगतगुणं परैरभेद्यं
समितिचरै रविलम्बितागमैश्च ।
कृतरिपुगणभेद माशुगैः स्वैर्ददि
रनिलोऽपिदृढंधनुःप्रधानम् ॥ ६८ ॥

श्रवणेति अथ वायुः तस्यै प्रधानं श्रेष्ठं दृढं च धनुर्ददौ कीदृशं समिति युद्धे श्रवणगतः कर्णपर्यन्तं प्राप्तः गुणोज्या यस्य तथा परैः शत्रुभिः भेत्तुमशक्यम् दृढत्वात् तथा स्वैः स्वस्मान्निसृतैः आशुगैर्वाणैः कृतो रिपुगण भेदो येन कीदृशैः वाणैः चरैः चंचलैः तथा शत्रुभिरविलम्बितः अज्ञातः आगमः प्राप्ति र्येषां तैः चंचलत्वात् अत्र धनुषो महामात्रेणापि सादृश्यं श्लेषेण प्रतीयते तथाहि धनुः प्रधानं महामात्रात्मकं कीदृशं प्रधानं दृढं नीतिकार्येष्वशिथिलं तथा राज्ञां श्रवणे कर्णे गतो गुणो मंत्ररूपो यस्य गूढमंत्रमित्यर्थः तथा परैः शत्रुभिर्दानादिना स्वप्रभोर्भेत्तु मशक्यं तथा चर गूढपुरुषैः कृतो रिपुगणस्य भेदो

येन कीदृशैः चरैःसमिति युद्धे भविलम्बितः जटादिवारकतया भप्रातःभागमो येषां तैः तथा भाशु शीघ्रं गच्छंतीतितैः प्रधानं स्यात्मइामात्रे प्रकृतौ परमात्मनि प्रज्ञायामपि च क्लीबमेकत्वेनूत्तमे सदे तिविश्वः ॥ ६८ ॥

शरधि मपि स एव तेन साधं
व्यतरदमोघशरौघरम्य मस्मै ।
अपि वहुषु विनिसृतेषु कोशा
दिषुषु पुन र्न जहातिपूर्णतां यः ॥ ६९ ॥

शरधिमिति स एव वायुः तेन धनुषा साधं अस्मै शरधिं निषङ्गमपि व्यसृजत् कीदृशं अनिष्फलेन वाणसमूहेन रम्यं यः शरधिः युद्धे कोशात् वहुषु वाणेषु निसृतेष्वपि पुनः पूर्णतां न त्यजति सदा परिपूर्णमेवेत्यर्थः ६९।

नच रुधिर परिस्रुतिं रिपूणां न च कुरुते खलु मर्मभेदनं यः
व्यसृजदथसपाशभृत्स्वपाशं द्विषदसुकर्षणमात्रशालिनं तम् ॥

नचेति अथ पाशभृत् वरुणः स्वपाशं व्यसृजत् यः पाशः संग्रामे परिच्छिन्नः खड्गादिवत् रिपूणां रुधिरपरिस्रुतिं न कुरुते तथा यः गदादिवत् रिपूणां मर्मभेदनमपि न कुरुते तर्हि किं करोत्यत आह को० पाशं रिपूणां प्राणनिष्कासनमात्रमेव शीलमस्य कण्ठादिकं निपीड्य प्राणानेव कर्षति न च रुधिरादिविमोक्षणं कुरुत इति भावः ॥ ७० ॥

अधिकमुपचिते गंभीरनादैर्लयघनघोषतिरस्क्रियाकरिष्णुम्
दितिजदितिजदारगर्वगर्भप्रमथनमप्यतिरापिपच्च शंखम् ॥७१

अधिकमिति स एव अपांपति वरुणः शंखं च आपिपत् को० अधिकं यथा स्यात्तथा वृद्धिं प्राप्तैर्गम्भीरनादैःकृत्वा प्रलयकालीनमेघनादस्य तिरस्कारकरणशीलं तथा दितिजानां दितिजदाराणां च क्रमेण गर्वं अहंकारं गर्भं च प्रमथ्नातीति तादृशं यन्नादं श्रुत्वा दैत्यानामहंकारो नश्यति दैत्यस्त्रीणां च गर्भच्छेदो भवतीत्यर्थः ॥ ७१ ॥

अथपरिघमदादस्मै विश्वकर्मा दनुजवधूविधवाविधानबीजम्।
मन इव विषयैश्च योगभाजां दृढमथ वर्मपरायुधैरभेद्यम् ॥

अथेति स विश्वकर्मा तस्यै परघं अदात् की० दैत्यस्त्रीणां विधवाविधाने बीजं कारणं दैत्यनाशकत्वात् अथ स एव वर्म्म कवचं च अदात् की० परेषां आयुधैरभेद्यं कैः किमिव विषयैः रूपादिभिः योगभाजां मन इव यथा तत्र भिद्यते तद्वदित्यर्थः ॥ ७२ ॥

अतितनुषु तनूरुहेषु तस्या निज किरणप्रकरं ससर्ज सूर्य्यः।
कवलयति विलोकितोप्यसून्यस्तु मदित तस्य सुतस्तु काल दण्डम् ॥ ७३ ॥

अतीति अथ सूर्यःतस्याः अतिशयेन सूक्ष्मेषुरोमसु निजकिरणानां समूहं ससर्ज अथ तस्य सूर्यस्य सुतः यमस्तु तं काल दंडं अदित तं कं यः कालदंडः विलोकितो दृष्टोपि असून् प्राणान् कवलयतिग्रसीकरोति ॥ ७३ ॥

अपरमिव तमेव दुर्निरीक्ष्यं सुरजननी करवालमापकालात्
अथ सदृश मनेन कुण्ठतद्विट्प्रहरणसंहतिचर्म्मचाष्टचन्द्रम्

अपरमिति अथ सुरजननी भगवती कालात् निमिषाद्यभिमानिदेवतायाः करवालं खड्गं आपकालस्तस्यै खड्गं ददावित्यर्थः की० अपरं द्वितीयं तं कालमेवेव दुःखेन द्रष्टुं योग्यं एवकारो दुर्निरीक्ष्यत्वादिना तत्साद्दृश्यासंगथत्वसूचकः अथ तस्मा देव कालात् साचर्म फलकं च आपकी० अनेन खड्गेन सदृशं तुल्यं तद्योग्य मितार्थः तथा कुंठिता द्विषां प्रहरणानामायुधानां संहतिर्येन तेषा मकिंचित् करत्वात् तथा अष्टसंख्याकरलादिघटितचंद्राकार सहितम् ॥ ७४ ॥

निजनिजमपरैरपीत्थमेव प्रहरणमाभरणं मुदापहृत्य
कृतनतिनुतिभिस्समानिता सा सदसि सुरे र्नितरां रराजदेवी

आयुधदानमुपसंहरन्नाह निजनिजमिति अपरै रनुक्तैरपिदेवैरित्थमनेनैव प्र .ारेण निजं निजं प्रहरणं आयुधं आभरणं भूषणं च मुदा उपहृत्य तस्या उपहारं कृत्वा सदसि सभायां समानिता सा देवी नितरां रराज की०

देवैः कृता नतयः नुतयाः स्तुतयश्च यैः अत्र मूलं मूलाद्विनिष्क्रम्य ददौ तस्यै पिनाकभृदित्यारभ्य अन्यैरपि सुरै र्देवीभूषणै रायुधै स्तथा रूमानितित्यंत मार्कंडेयपुराणांतर्गत सप्तशतीस्तोत्रात्प्रमाणमवसेयम् अत्र शिष्टं तु देवी भागवतादेव ॥ ७५ ॥

लसंतीं भूषाभिः करकलितघोर प्रहरणां कृपा पूर्णापांगीं स्मितसुदृशभुजाम् सरोषां दैत्येंद्रे कृततदतिकुत्सां दिविषदः सदा शांताकारां मुमुदिव वुदीक्ष्येति रसिनः॥ ७६ ॥

लसंतीमिति ते रसिनः शृंगारादि नवरसभावविदा देवाः तदा तां मत्वा लक्ष्मीं इत्येवं विधां वीक्ष्य मुमुदिरे इति कीदृशीं भूषाभिश्चूडामण्यादिभिर्लसंतीं भूषणानुकलनोपनीतया शोभया जनितशृंगाररसा मित्यर्थः तथाकरैः कलितानि गृहीतानि घोराणि भयानकानि त्रिशूलादीनि प्रहरणान्यायुधानि यया अनेन तस्या भयानकवीररसविषयत्वं व्यज्यते तथा कृपया पूर्णः अपांगो नेत्रांतो यस्या अमो मद्भक्ता देवाः दुःखो भवंतीति सा नुग्रहगोचरोमोचित करुणरसामित्यर्थः तथास्मितेन शोभता दृक् यस्याः अहो किममी शिवादयः समर्था अपि तृणतुल्यान्महिषाद्बिभ्यतीति मंद स्मितोदितहास्य रसां तथा अष्टादश मिताभुजा यस्याः अनन्य साधारणै रष्टादशभिर्भुजै रुत्पादिताद्भुतरसां तथा दैत्येंद्रे महिषे सरोषां महिषकृताव. ज्ञासंचिन्तनोत्थितयत्क्रोधोत्थत्र रौद्ररसां तथा कृता तस्या महिषस्यैव अति कुत्सा यया तस्य विनाशोन्मुखत्वात्कृतकुत्सन जातवीभत्सरसां तथा-सदैव शांत आकारो मूर्ति र्यस्या वस्तुतस्तु शांतरूपा मेवेत्यर्थः अत्र शांतरसोतवमोव्यज्यते तथा च दशरूपके न यत्र दुःखं न सुखं न चिंता न द्वेषरागौ न च काचिदिच्छा रसः प्रशांतः कथितो मुनीन्द्रैः सर्वेषु भावेषु च मृग्यमाण इति अत्र मिथः विरोधिनामपि शृंगारादीना नवरसानामेकत्रस्थापने न दोषास्पदं भिन्नविषयत्वात् अत्र च लसंती भूषाभि रित्यत्र करकलित घोरप्रहरणा मित्यत्र अष्टादशभुजा मित्यत्र च शृंगारादीनां रसाना मुत्पत्त्याश्रयत्वं देवानां अन्यत्र तु भगवत्या एवेति विशेषोऽवसेयः अनुक्रमेण रस मात्रवर्णने एव कवेः प्रतिपादयिषितत्वात् ॥ ७६ ॥

नो जायटीति जननं जगतां जनन्या जानीमहे जनित मद्य निजोदयं हि इत्थंजसा सुमनसो मनसावगत्य प्रोचु स्त मर्थ मथतां हितमर्थ यत्नः ॥ ७७ ॥

नोइति यस्या जगतां जनन्याः जननं उत्पत्तिर्नो जायटीतिन युक्तं भवति जगज्जननीत्वात् अनवस्थाप्रसंगाच्च तर्हि किं जातमित्याहुः अयं तु निजस्य उदयं भाग्यमेव जनितं जानीमहे ते देवाः इति मनसाऽञ्जसा सम्यक् निश्चित्य अथ स्वहितं प्रार्थयंतः तां प्रतितमेवार्थं मनसि चिंतितं प्रोचुः ॥ ७७ ॥

त्रिभुवनजनयित्र्याः का स्तापेत्ता स्मदस्त्राभरणरुचिभिरुच्चै र्हेतु मत्रापि विद्मः भगवति करुणां ते माकृथा स्त द्विलंबं महिष जनितभीते स्त्राहि रक्षावपाहि॥ ७८ ॥

किमचुरित्याह त्रिभुवनेति हे भगवति त्रिभुवन जनयित्र्यास्तव अस्मदी यैरस्त्रैः आभरणैः भूषणैः रुचिभिस्तेजोभिश्च उच्चैरुत्कृष्टाकैव अपेक्षास्ति नि- खिलकारणत्वात्परिपूरणत्वाच्च न कापोत्यर्थः तर्हि किमर्थं मया गृहीता इत्याहुः हे भगवती अत्रापि अस्मादिग्रहणे तव करुणामेव हेतुं विद्मः अस्मद्विष यिण्या कृपयैव त्वया गृहीता नान्यथेति भावः तत्तस्मात् करुणा हेतोः विलंबं मा कृथाः न कुरु कस्मिन्नर्थं इत्याहुः हे देवि महिषात् जनितभीतेः, अस्मात् त्राहि रक्ष अवपाहि त्राहीत्याद्येकार्थाभ्यासोत्र अवश्यमेव रक्षेति ज्ञापकः बहूनां पृथगुक्तिर्वा सर्वेरुच्यत्वाच्चतुर्मुखस्यैव वा ॥ ७८ ॥

सेत्याकर्ण्य गिरं सुधातिमधुरा मूचे सुधाभोजिनाः
किं यूयं विबुधा बुधा अपि मुधा मुग्धा स्तृणारंदरात्
मत्क्रोधाहितभालजातभ्रुकुटीभ्रूभङ्गरौद्राननं
वीक्ष्यासौ कुणपायते मृतिरपि त्रासोपि संत्रस्यति ॥ ७७॥

सेति सा भगवती इति तेषां वाचमाकर्ण्य तान् सुधाभोजिनः देवानप्रति सुधातोप्यतिमधुरां गिरमूचे हे विबुधाः देवाः यूयं बुधाः कुशला अपि अस्मात् तृण तुल्यात् अरेर्महिषस्य यद्वा तृणानामरे भक्षकस्य महिषस्य दरात् भयात् किं मुधा वृथैव मुग्धाः मूढाः जाताः ननु त्रैलोक्यजेता महिषः कथं तृणायमन्यते इति तेषामाशयं ज्ञात्वा स्वप्रभावातिशयं दर्शयति हे देवाः क्रोधेन आहितःयुक्तो यो भालस्तस्मिन् जातया भृकुट्या भ्रुवोर्भंगेन कौटिल्येन च रौद्रं मम मुखं वीक्ष्य असौ स्मृतिरपि कुणपः शवस्तद्वदा चरति सर्वजन शवीकारकतया प्रसिद्धोपि मृत्यु, यदि शवी भवति किं पुनर्महिषादयः कीट प्राया इति कैमुत्य न्यायेन बोध्यम् तथा एतादृशं मम मुखं वीक्ष्य स्वयं त्रासोपि संत्रस्यति का पुनर्महिषादीनां वार्तेति ध्वनिः मुग्धस्तु सुंदरे मूढे इति मेदिनी भंगस्तरंगभेदे च रुग्विशेषे पराजये कौटिल्ये भयविच्छित्यो रिति हैमः। कुण-पः शवमस्त्रिया मित्यमरः अतिशयोक्तिरलंकारः ॥ ७७॥

इत्युक्तिं साट्टहासां सरभसमुदितां चण्डिकायाः प्रचण्डा
माकर्ण्या सीदसीमत्रिभुवनमभितः साचला भूश्चकंपे
वेलातिक्रांतिभीतिक्षुभितजलचरा क्रुष्टकोलाहलाढ्याः
पाथोनाथाविनाथा विपथमभिययुः साध्वसं विद्विषश्च ॥७८॥

इत्युक्तिमिति इत्येवं विधां तस्याश्चंडिकायाः कोप शीलायाभगवत्याः अट्टहास सहितां सरभसं सावेशं च उदितां उच्चरितां प्रचंडां अत्युत्कृष्टां च उक्तिं आकर्ण्य त्रिभुवनमपि असीम उल्लंघित स्वस्वमर्यादमासीत् तथा अचलैः पर्वतैः सहिता भूः पृथ्वीचकंपे तथा पाथोनाथाः सप्तसमुद्रा अपि विनाथा दीनाः संतः विपथं अनियतमार्गं प्रतिययुः कीदृशाः वेलायाः स्वमर्यादाया अतिक्रांत्या उल्लंघनस्य भीत्या क्षुभिताः क्षोभं प्राप्ता ये जलचराः मकरादयः तैराक्रुष्टेन उच्चरितेन कोलाहलेन कलकलशब्देन आढ्याः युक्ताः तथा विद्विषः महिषादयः शत्रवः साध्वसं भयः किमेतादिति भयं प्रापुः अब्ध्यंबुविकृतौ वेलाकाल मर्यादयोरपीत्यमरः भीतिर्भीः साध्वसं भय मिति च ॥ ७८ ॥

श्रीमाञ् शंभो स्वचरणसदनौ भूतहृच्छंभुनाथो
लक्ष्मीनाथं कविपरिवृढं देशिकोसूतयं माम्
तेनोद्गीते महिषनिधने गीतलक्ष्मीचरित्रे
लक्ष्मीकाव्ये विरति मगमत् पंचमः सर्ग एषः ॥ ७६॥

श्रो मानित्यादि पूर्ववत् ॥७६॥

इति लक्ष्मीकाव्ये पंचमः सर्गः ॥ ५ ॥

इति श्रीलक्ष्मीकाव्यव्याख्यायां पंचमः सर्गः ॥ ५ ॥

ओं नमः श्रिये कश्मलं त्रिजगता मथ हन्तुं
स्वर्नदीव भुवि सा वततार।
तत्कुतूहल मथेचितु मासीत्
खे घनेषु पिहितः सुरसङ्घः॥ १ ॥

ओं नमो विघ्नहर्त्रे अस्मिन्सर्गे महिषमर्दिनीं वर्णयिष्यति तावन्महालक्ष्म्याः पृथिव्या मवतरणमाह कश्मलमिति अथ देवतेजोभ्यः प्रादुर्भवन-भूषादिग्रहण संलापानंतरं सा श्रीमहालक्ष्मीः त्रिजगतां कश्मलं दुःखं हंतं स्वर्नदीगंगेव भुवि पृथिव्या अवततार अथ तस्याः कुतूहलं द्रष्टुं देवस मूह आकाशे मेघेषु पिहितः तिरोभूतः आसीत् अत्र तिरोहितानस्मान्महिषोपि न द्रक्ष्यति सर्वं कौतुकमपि द्रक्ष्याम इत्याशयेन तत्र लीना आसन्निति भावः अस्मिन्सर्गे स्वागतावृत्तम् स्वागतेति रनभाद्गुरु युग्ममिति लक्षणात्।.१

तत्र विंध्य इति नाम विनाशं प्रापितो घट भुवापि स भूभृत्।
भूय उच्चपदवीं विजगाहे ध्यासित स्त्रिजगतां जनयित्र्या ॥२ ॥

तत्रेति तत्र भुवि विन्ध्य इति नाम पर्वतः पुरा मेरुस्पर्धया रविमार्गरोधार्थमुच्छ्रीयमाणः पश्चात् घटभुवा ऽगस्त्येन विनाशं प्रापितोऽपि त्रिजगतां जनन्या ऽध्यासितः सन् भूय उच्चपदवीं विजगाहे प्राप भगवती श्रितिं महिम्नेति भावः ॥ २।

सैरिभोप्यथ निजस्पश वक्त्रात्तत्स्वरूप मति मञ्जुनिशम्य
मन्मथोन्मथितिहृन्निज माराद्राजुहाव सचिवं कृतिनुन्नः ॥ ३ ॥

सैरिभोपीति अथ महिषोपि निज चारमुखात् तस्या महालक्ष्म्याः स्वरूपं अति सुंदरं श्रुत्वा कामेन पीड़ित हृदयःसन् निजं सचिवं काम कला कुशलं आरात् समीपे आजुहाव आमंत्रयामास कौ० महिषः कृत्यानुन्नः प्रेरितः एतच्चिकीर्षितस्यावश्यं मृत्युर्भविष्यतीति भावः आराद्दूरसमीपयो रित्यमरःअपसर्पश्चरः स्पश इत्यमरः ॥ ३॥

मंत्रिनायक मनः कुरु गन्तुं तत्प्रवृत्तिमवगंतु मितोंग तत्र
तादृश मुपाय मुपेया येन सा भजति मे महिषीत्वम् ॥ ४ ॥

तमाहूय किमूचिवानित्याह मंत्रीति हे मंत्रिश्रेष्ठ तस्या देव्याः प्रवर्तिकास्ति किमर्थमागतेत्यादि व्यवहारं अवगंतु ज्ञातुं इतो ऽस्मात् स्थानात् तत्र गंतुं मनःकुरु तत्र याहीत्यर्थः अथ च हे अंगमित्र तत्र गत्वा तादृशं उपायं उपेयाः प्राप्नुयाः येनोपायेन सा देवी मम महिषीत्वं पटराज्ञीत्वं भजति मे महिषस्य स्त्रीत्वात्तस्या महिषीत्वं युक्त मेवेति श्लेषेण ध्वनितम् ॥ ४ ॥

देव यद्दिशसि त न्मयि सर्वं त्वत्प्रसादजुषि सिद्धमवेहि ।
तत्पदोरिति निपत्य तरस्वी निर्ययौ कतिपयै र्भृतकैस्स ॥ ५

अथेत्याश्रमो मंत्री प्रति वक्ति देवेति हे राजन् यत्त्वं दिशसि आज्ञापयसि तत्सर्वं कार्यं तव प्रसादसेवित मयि सिद्धमेवेति जानीहि सवेगशीलः मंत्री इति वदन् तस्य महिषस्य पादयोः निपत्य कतिपयैः परिमितैः सेवकैः सहपुरात् वहिर्निर्ययौ ॥ ५ ॥

तामुपेत्य सदृशी घंनसारं सस्मितं कुवलयं भ्रमयन्तीम् ।
ऊचिवान् समुचितै स्स वचोभि स्सकलं कल मपि कलयन्तीम्॥६

तामिति सःमंत्री तां देवीं प्राप्य ददर्शेति शेषः कीदृशीघंन सारं कर्पूरंतीं कर्पूरं हिनेत्रयोः सुखं ददाति तथा स मंद हास्यं कमलं भ्रमयंतीं अथ तां कलमपि कलयंतीं भगवतीं सकलं यथा स्या त्तथा सहुचितैः तत्कालोचितैः सुसुवचोभिःऊचिवान् कलमपि कलयितुं समर्थाया स्तस्या अग्रे सकलोक्तिर्हास्यास्पद मेति भावः तादृशी घंनसार मिति पदद्वये लिंगवचनभेदेपिवेदाः प्रमाणमितिवत् विभक्ति रेकैवेत्यत उपमानतां प्राप्नोति यदुक्तं लिंगसंख्या विभेदे पिह्युपमानोपमेयतां विभक्तिः पुनरेकैवचोपमानोपमेययो रिति अथ कर्पूर मस्त्रियां घनसारश्चंद्रसंज्ञइत्यमरः ॥ ६ ॥

कासि सुन्दरि चिकीर्षसि किंवा हेतिभिर्वद जिघांससि कांवा त्वद्गुणश्रवणजात्म भुवाहं प्रेषितस्तु विभुना महिषेण॥७॥

किमुचिवानित्याह कासीति हे सुंदरि त्वं का असि किंनाम्नी किं जातिरसीत्यर्थः अथ च किं कर्त्तु मिच्छसि तथा एभिः हेतिभिः शस्त्रैः कंहंतु मिच्छसि इति वद ननु यदि त्वया त्वं किमर्थं पृच्छसि स्वार्थं परार्थं वेत्याह अहं तु महिषेण प्रेरितस्त्वां पृच्छामि नत्वं ताद्दशे दौत्य कर्मणि प्रेरितै रपि बुधैर्न प्रवर्तितव्या मित्याह कीद्दशेन महिषेण विभुना प्रभुणा प्रभुणा माज्ञाप्य विचार्य्य वावश्यं कार्य्येति भावः अनेनतत्प्रभावापिसूचितः ननु किमर्थं तेनमां प्रति प्रेषितो सोत्याह पुनः कीद्दशेन तेन तव गुणानां श्रवणेन जातः आत्मभूः कामो यस्य त्वांदारान् कर्त्तु मिच्छतीतिभावः पुष्पधन्वा रति पतिर्मकर ध्वज आत्मभूरित्यमरः ॥ ७ ॥

यो भुनक्ति भुवनत्रय राज्यं मृत्यु रप्यथ विभेति यतोसौ सोपिते मृदतिलिप्सति दास्यं किं त्वया परमतः स्पृहणीयम्

पुनरपित त्प्रभातिशयं दर्शयति य इति यः महिषः भुवनत्रयस्य राज्यं स्वयमेव भुनक्ति अनेन तदैश्वर्य्यं सूचितं यतःमहिषात् असौ मृत्युरपि विभेति अनेनतस्य शौर्य्य प्रतापश्च सूचितः हे मृदतिस्र: ईद्दशगुण विशिष्टोपि महिषः तव दास्यं लिप्सति वांच्छति अतः परं त्वया किं स्पृहणीयं अस्ति ॥ ८ ॥

तन्मदीय मुररी कुरु वाक्यं भोक्ष्यसे हरिहरा ननुभूतान् तेन सार्द्ध मतुलानथ भोगांस्त्वद्धिताय हि मयेद मिहोक्तम् ॥ ९ ॥

तदिति तस्माद्धेतोःमदीयं वाक्यं स्वीकुरु स्वीकृतेच तेन महिषेण सार्धं हरिहरा दिभि रपि अननुभूतान् अतुलान् भोगान् भोक्ष्यसे नत्व स्मिन्नर्थे तव किं मे स्यनीत्याह इदं वचः तस्यो कारकपं इह तव हितार्थ मेव मया उक्तं तवैव कार्यं सेत्स्यति नममेति त्वयि जात कारुण्ये नैव मयोच्यते इति भावः ९ ॥

इत्युदीर्य विरतं बहुधा तं चाटुतां बहुविधा मपहाय
सस्मितं वदति सा स्मच तथ्यं निर्भयो गदति नैवमृषा यत्॥१०

इतीति अमुना प्रकारेण बहुधा उदीर्य उक्त्वा विरतं तं मंत्रिणं प्रति सा भगवती सस्मितं यथास्यात्तथा तथ्यं वचः वदति स्म किं कृत्वा बहुविधां चाटुतां तद्व्यापारं जनाय मिथ्याभियुक्तवचनचातुरीं अपहाय त्यक्त्वा यत् यस्मात् निर्भयो जनः मृषा मिथ्या नैव गदति ॥ १० ॥

मंत्रिवर्य्य जननीं जगतां मां प्रार्थितां सुरवरै रिह विद्धि
नोचिरा द्युधि निहन्मि हयारिं स्वर्गिणो निजपदे ष्वभियोक्तुम्

किं वदति सेत्यपेक्षायां त्वं कासि किं चिकीर्षसि केतिभिश्च कं जिघांससीति तत्प्रश्नानां क्रमेणोत्तरं ददावित्याह मंत्रिवर्येति हे मंत्रिश्रेष्ट मां जगतां जननीं मूलप्रकृतिं विद्धि जानीहि अनेन महिषस्य स्त्री भवेति तदुक्तवचोपि तिरस्कृतं कोदृशीं मां इह अस्मिन्महिषवधरूपे ऽर्थे सुरवरैः ब्रह्मादिभिः प्रार्थितां सा अहं नोऽचिरात् शीघ्रमेव हयारिं महिषं युद्धे निहन्मि किं कर्तुं स्वर्गिणः इंद्रादिदेवान् तेनापहृतेषु निजनिजपदेषु अभिवेक्तुम् ॥ ११ ॥

ब्रूहि तन्निजपतिं पतितं तं शीघ्र मेत्य कुमतिं वचसा मे
चेज्जिजीविषसि सद्म बले स्त द्याहि वा युधि यमस्य सदस्त्रैः १२

ब्रूहीति तस्मात् इतः शीघ्रं एत्य गत्वा पतितं पापिनं कुमतिं नष्टबुद्धिं च निजपतिं महिषं ममैव वचसा ब्रूहि किमित्याह हे महिष चेद्यदि त्वं जीवितुमिच्छसि तर्हि बलेःसद्म पातालं प्रतियाहि अथ चेत्तव हृदि बलावलेपोस्ति तर्हि युधि ममास्त्रैः यमस्य सद्म मंदिरं प्रतियाहि अन्यथा ऽवश्यमेव त्वां घातयिष्यामीति भावः ॥ १२ ॥

पुच्छिनी न च विषाणवती वा तादृगस्मि यदमुं पशु मीहे।
चेद्बवानपि भवेन्मदुवाङ्नो भस्मसादिह दृशैव करोमि १३

मम ताद‍ृशं चक्रवर्तिनं किं न स्वीकरोषीत्याह पुच्छिनोति हे मंत्रिन् अहं तादृक् यादृशो: असौ महिष: तादृशो पुच्छवती नास्मि तथा विषाणवती श्रृंगिण्यपि नास्मि यद्यस्मा‍द्धेतो: असुं पशुं अहं ईहे वांछामि इत्युक्ता तदवज्ञां संस्मृत्यातिरुष्टा तं प्रत्युवाचेत्याह हे मंत्रिन् चेद्यदि भवानपि कोमलवक्ता न भवेत् तर्हि इह दृशैव त्वा मयुक्तवादिनं भस्मसात् करोमि त्वया अयुक्त-मुक्तं परं मृदुवाक्यं मिश्रितं अत स्तवनाशो न कृत इति भाव: ॥ १३ ॥

इत्युदीरित मथो स निशम्य स्वर्गिमातुरतिमंतुमदुग्रम् ॥
प्रत्युवाच रुषतीं गिर मीषद्रोषपाटलिमजुष्ट दृगेताम् ॥ १४ ॥

इतीति स मंत्री स्वर्गिणां देवानां मातु: भगवत्या: इत्यमुना प्रकारेण अतिशयेन मंतुरपराधो विद्यते यस्मिन् तत् तथा अत्युग्रं उदीरितं वच: निशम्य श्रुत्वा एतां प्रतिरुषतीं अकल्याणीं गिरं उवाच कीं० मंत्री ईषज्जात-रोषेण पाटलिम्ना ईषद्रक्ततया जुष्टे दृगौ यस्य श्वेतरक्तस्तुपाटलइत्यमर: रुषती वागकल्याणीति च ॥ १२ ॥

चंडि यत्प्रलपितं हि भवत्या वेद्मयरण्यरुदितं निखिलं तत्
क्वाबला प्रकृतिभीरुरहो त्वं कासर: क्व च तृणीकृत काल: १५

किमुवाचेत्याह चंडीति हे कोपशीले यत् भवत्या प्रलपितं अनर्थमुक्तं तत्सर्वमपि अरण्यरुदितं वेद्मि यथा निर्जने रोदनं साध्यंतराभावान्निष्फलं भवति तद्वत्त्वद्वचोपीत्यर्थ: कुतो निष्फल मित्याह अहो आश्चर्यं त्वं अबला ना-मत एव बलहीना स्त्री कासि कीदृशी प्रकृत्या स्वभावेनैव भीरुर्भयशीला अथ कासर: महिष: क्वास्ति कीं० तृणीकृत: कालो येन अतो युद्धे महदंतरमिति भाव: तत्सरस्वतो तु प्रत्युतस्तीति हे चंडि भगवति यत्त्वया तेन सह युद्धं करो-मीत्युक्तं तत्सर्वमपि निष्फलं जाने अत्र हेतु: अहो आश्चर्यं त्वमबलानास्ति ब-लसमोऽन्यो यस्या स्तादृशी तथा प्रकृति र्मूलप्रकृतिरपि भीरु: स्वेच्छयाधृत संदरस्त्रीरूपा क्व अथ च तृणीकृत: त्वदग्रे तुच्छीभूत:काल:कृष्णवर्णश्च महिष:

भास्ति त्वया सह स युद्धं कर्तुं न समर्थ इत्यर्थः विशेषाल्त्वंगनाभीरु रित्यरः विषमालंकारः ललायो महिषोवाहद्विषत्कासरसैरिभा इत्यमरः ॥ १५

किं त्वया न समरं क्व च दृष्टं मन्यसेथ नलिनीभ्रमणं किम्।
किं तु यौवनमदेन धृतास्त्रां त्वां विचारविधुरा मह मूहे ॥१६॥

किमिति प्रश्ने संशये च हे चंडि त्वया समरं युद्धं न कुत्रापि दृष्टमिति जाने कस्माच्चिद्युद्धेति नामैव श्रुत्वा त्वया स्वस्मिन्नितरव्यवहारवदवगतं न तु साक्षाद्दृष्टमित्यर्थः अथवा तद्युद्धं किं नलिनीभ्रमणं मन्यसे यथा करे कमलं भ्रामयसि तथा युद्धमपि किं क्रीडाप्रायमेव जानासीति भावः युयुत्सायामेतद्धेतुद्वयमपि निरस्य स्वमतमाह किंत्वेतत्कारणमस्ति यौवनस्य मदेन धृतान्यस्त्राणि यया तादृशो त्वां विचारेण युक्ता युक्तविवेकेन विधुरां रहितां अहं ऊहे तर्कयामि कस्माच्चिदस्त्राणि गृहीत्वा त्वयि मदोद्रेको जातः परं मोघ एवेति भावः ॥ १६ ॥

केवलास्ति रसभंगजभीर्मेपत्युरप्यथ न मेस्ति निदेशः
नेति चेदहमिहैकक एव त्वां कचेषु विनिगृह्य नयामि ॥१७॥

नन्वेतच्चेत्तर्हि त्वं किं न बलात्मां नयसीत्याह केवलेति हे देवि मम तु केवला रसस्य शृंगारस्य भंगात् भीरस्ति एतां चेद्बलान्नयामि तर्हि रसभंगो भवितेति भयान्ननयामीति भावः अथ च मम पत्युः महिषस्यापि एतादृशः आज्ञानास्ति सामपूर्वमेव त्वया नेतव्या नतु बलेनेति तेनाज्ञप्तत्वात् चेद्यदि इति बलाद्ग्रहण प्रतिबंधि हेतुद्वयं न स्यात् तर्हि अहं एक एव त्वां केशेषु गृहीत्वा नयामि तत्रेति शेषः ॥ १७ ॥

अब्रवीदथ पुनर्जगदंबा सत्यमेव निखिलं यदवोचः।
नास्ति मे बलसमो यदिहान्यो विद्धि मां तदबलां वरदूत १८

अब्रवीदिति अथेत्युक्ता जगदंबा पुनः अब्रवीत् हे वरदूत विरुद्धलक्षणया हे नीचदूत यत् त्वं अबलासीत्यादि अवोचः कथितवानसि तत्सर्वं सत्यमेव

यत् यस्मात् इह लोके मम बलसमः अन्यः कोपिनास्ति तत्तस्मान्मां अबलां विद्धि नास्ति बलसमोऽन्यो यस्याः सेत्यर्थं जानीहि नतु बलहीनेति भावः ॥१८

नो मयापि समरं क्व च दृष्टं कोपि यत्प्रतिभटो न मदग्रे ।
लीलयैवहिनिहन्मियतोरीन्युद्धमस्ति नलिनीभ्रमणं तत्॥१९॥

यत्तु त्वयोक्तं किं त्वया न समरं क्व च दृष्टमन्यसेथ नलिनीभ्रमणं किमति तदपि सत्यमेवेत्याह नोइति हे दूत मया समरमपि कुत्रापि न दृष्टं कुतः यस्मात् ममाग्रे प्रतिभटः कोपिनासीत् मत्तुल्यस्यान्यस्या भावात् अथ च हे दूत यतो ऽहं लीलामात्रेणैव अरीन् निहन्मि तत्तस्मान्मदग्रे युद्धं नलिनीभ्रमणमेवास्ति न तु महद्भातीत्यर्थः ॥ १८ ॥

नास्मि विस्मृतमते वनिताहं नो पुमानपि च सत्य मवेहि।
त्वत्पतिः पशु रसावबलातो मृत्यु मैहतविधेर्बहुतप्त्वा ॥२०॥

ननु वनितायां त्वय्यसंभाव्य मेतदित्याह नास्मीति हे विस्मृतमते नष्टबुद्धे अहं वनिता नास्मि तथा पुमानपि नास्मि एतत्सत्यं जानीहि यद्वा मां सत्यात्मकं परं ब्रह्म जानीहि तर्हि वनिता किमर्थं जानासीत्याह हे दूत असौ त्वत्पतिः महिषः पुराबहुतद्या तपः कृत्वा ब्रह्मणः सकाशात् स्त्रीतः स्वमृत्युं अकांक्षत अत एव पशुः अन्यथा को बुधः स्त्रीतः स्वमृत्युं याचेत ॥ २० ॥

तत्कृतेहमथ वासवमुख्यैः प्रार्थिता विरभवं वनितात्वम्।
आत्मनः प्रकृतिचारु विधाय स्वेच्छया कुहकवद्विभुशक्तिः ॥२१

तद्दिति तदर्थं तेन ब्रह्मणा दत्तवरसाफल्यार्थं अहं इंद्रादिभिर्देवैः प्रार्थिता सती प्रकृत्येव चारु आत्मनः स्वस्य वनिता त्वं विधाय आविरभवं तर्हि परप्रेर्यतापत्ति रित्याशंका निरासायाह स्वेच्छयेति ननु शुद्धः सन् स्वेच्छया कोवाप्युद्धिं कांक्षते इत्याह कुहकवदिति यथा नटः अनासक्त एव स्वेच्छया सिंहादिर्भवति तथा ममाप्यत्र न कश्चिदभिनिवेशोस्तीति भावः कुत इद

मित्याह कीदृशी अहं विभुः सर्वत्रानुस्यूता शक्तिःसामर्थ्यं यस्याः यद्वा विभोः परमात्मनः शक्तिः तद्रूपैवेत्यर्थः शक्ति शक्तिमतोरभेदात् ॥ २१ ॥

किंबहुप्रलपनैस्त्वरित तत्सज्जितं कुरु पतिं तमुपेत्य।
तत्कलेवरजरौधिरधाराः पक्षिणामिह पिपासति संघः ॥ २२

किमिति हे मंत्रिन् बहुभिः प्रलपनैः व्यर्थवचनैः किमस्ति न किंचिदपीत्यर्थः ततस्मात् शीघ्रं न स्वपतिं महिषं प्राप्य सज्जितं कुरु हि यत इह तच्छरीरजन्याः रुधिरस्य धाराः पक्षिणां काकगृध्रादिपक्षिणां मदीय बाणानां वा संघः पिपासति पातु मिच्छति पक्षो श्येने रथे कांडे शरे खड्गे च पक्षिणोति विश्वः ॥ २२ ॥

इत्यतीव परुषं स तयोक्तः प्रारुहद्विविधसंशयदोलाम्।
किं नयामि बलतः पति मेतां यास्यु ता कृत कृतिर्गतलज्जः २३

इतीति इत्यमुना प्रकारेण तया देव्या अतिनिष्ठुरं यथा स्यात्तथा उक्तः सः मंत्रीप्रतिद्विविधां संशयरूपां दोलां प्रारुहत् द्वैविध्यमेवाह एतां देवीं किंबलात् किं पतिं नयामि तर्हि अनायासेन नैतत्कार्य मिति भयं उत असंपादितकार्यः सन् गतलज्जः तं प्रति यामि ॥ २३ ॥

तावदेत्य महिषाय समस्तं वृत्त मेव कथयामि विचित्रम्।
इत्यसौ हृदि विचिंत्य जवेनोपेयिवानभितमु ज्झितरोचिः२४

अथ किंनिश्चिकायेत्याह तावदिति आदौ तत्र गत्वा इदं विचित्रं अभूत पूर्वं समस्तं वृत्तांत मेव महिषाय कथयामि असौ मंत्री इति हृदिविचिंत्य त्यक्त शोभः सन् वेगेन तं महिषं प्रति प्राप्तवान् ॥ २४ ॥

सोभिवाद्य जगदीशं नाथ सास्ति चात्र जगतो विपरीता।
यत्तया परुष मुक्त मिदं मद्वा गलं न गदितुं पुरतस्ते॥२५॥

स इति अथ सः मंत्री तं जगदीशं महिषं नमस्कृत्य जगाद हेनाथ सा देवी जगतो विपरीता अनन्यसाधारण सौंदर्यो पेतास्ति अष्टादशभुजादि मत्तया

वा विलक्षणास्ति अत्र तया किमुक्त मित्याह हे नाथ तया यत् निष्ठुरं वच उक्तं तदिदं वक्तुं तत्रात्र मम वाक् समर्थो नास्ति ॥ २५ ॥

सम्यगिवहि हिताय नियुक्तैः स्वामिने ऽथ भृतकै र्भणनीयम् ।
चाटु मर्हसि ततस्तु मृषात्तं नो हितं भवति चारु वचो यत् २६

तर्हि न वाच्य मित्याह सम्यगिति हि यतः स्वामिना स्वहितार्थं कार्येषु नियुक्तैः सेवकैः स्वामिने सत्यमेववाच्यमितिनीति विदुक्तिः तत्तस्मात् वक्ष्यमाणं वचः परुषमपि चाटु मर्हसि मधुरं किं न ब्रूष इत्याह हि यतः मिथ्याभिहितं मनोहरं वचः परिणाम स्वामिनो हितकृत् न भवति मधुरोषवदितिभावः२६

सा विभा जगदपूर्वसुरूपा ऽष्टादशोज्ज्वलभुजा कलितास्त्रा ।
धोरणीकृतमहाहरिणेंद्रा मन्यते न निजतः परमन्यम् ॥ २७ ॥

इति युक्त्या स्ववचनयोग्यतां प्रतिपाद्य तदुक्तिं निवेदयितुं तावत्तत् स्वरूप माह सेति हे विभो सा देवी जगतः अपूर्वसुरूपा अस्ति अनेन तत्सौन्दर्यं प्रतिपादितं तथा अष्टादशमिताः उज्ज्वलाः भुजा यस्याः तथा तेषु भुजेषु कलितानि गृहीतानि अस्त्राणि यया तथाधोरणी कृतः वाहनीकृतः महासिंहो यया स एतादृशो निजतः स्वस्मात् अन्यं कमपि परं उत्कृष्टं न मन्यते स्वात्मानमेव परं जानातीत्यर्थः ॥ २७ ॥

सामपूर्व मुदितापि मया सा तप्तसर्पि रिव सिंचितमद्भिः ।
प्रत्युतज्ज्वलितवत्यतिरोषादित्युवाच धुरि मां च निषण्णम् २८

सामेति सा देवी मया सामपूर्वं उक्तापि जलैःसिंचितं तप्तघृतमिव प्रत्युत अतिकोपात् ज्वलितवती अथ च अग्रे स्थितं मां इति वक्ष्यमाणं उवाच ॥२८॥

ब्रूहि तं पशु मितो वचनान्मे चेज्जिजिविषसि गच्छततोऽधः
युद्धमेहि यदिवाप्य ह मत्ते त्वां यमातिथि मिहाद्य करोमि २९

किमवाचेत्याह ब्रूहीति हे मंत्रिन् इतो गत्वा मम वचनात् तं पशुं महिषं ब्रूहि हे महिष यदि त्वं जीवितु मिच्छसि तर्हि अधः पातालं प्रतिगच्छ यदि

वा कश्चिनाभिमानोऽस्ति तर्हि गुडं प्राप्नुहि इत्र च अहं एकैव सर्वैः त्वां यम-स्थानिश्रिं गतप्राणं अद्य करोमि ॥ २९ ॥

नूत्नमित्यभिभवं परिशृण्वन् ज्ञात हेतुमधिगत्य च मत्या।
पृच्छतिस्म सचिवानथ मुख्यान्सादरं स महिषोदरदूनः ॥३०॥

नूत्नमिति अथ सः महिषः इति नवीनं पूर्वं केनचिदपि न कृतं तिर-स्कारं परिशृण्वन् सन् अत्र च तिरस्कारेस्वबुद्ध्या हेतुं नाधिगत्य अथ तद्विष-यार्थं मुख्यान् निज मंत्रिणः सादरं यथा स्यात्तथा वक्ष्यमाणं पृच्छतिस्म को० महिषः दरेण भयेन दूनः दुःखितो ईषद्दुःखितो वा ॥ ३० ॥

अत्र मे भणत हेतु ममात्याः स्वस्व बुद्धि मनुसृत्य यथावत्।
चित्रमस्ति यदियं प्रमदा मां योद्धुमाह्वयति हंतिभिरुच्चैः ३१

किं पप्रच्छेत्याह अत्रेति हे अमात्याः अत्रास्मिन्कार्ये स्वस्वबुद्धिं अनुसृत्य यथावत् मह्यं हेतुं भणत कस्मात्कार्ये इत्याह हे मंत्रिणः एतन्महच्चित्रमस्ति यत् इयं मेकापि काचन प्रमदा मां शस्त्रैःयोद्धुं उच्चैः आह्वयति अत्र को हे-तुरित्यर्थः ॥ ३१ ॥

इत्थमर्वरिपुणाथ निदिष्टा वर्चसा च वचसा च वरिष्ठाः।
तत्क्षणस्फुरणशालिधियस्ते स्वामिनंप्रति पृथक्पृथ गूचुः॥ ३२

इत्थमिति अथ अर्वरिपुणा महिषेण इत्थमाप्रमास्ते अमात्याः स्वामिनं महिषं प्रति पृथक् पृथक् ऊचुः को० ते वर्चसा तेजसा वचसा च वरिष्ठाः तथा तत्क्षणप्रश्नश्रवणाव्यवहितोत्तरकाले एव उत्तरदानाय स्फुरणशालिन्योधियो येषां ते ॥ ३२ ॥

अब्रवीदथ विरूपदृगेवोपेक्षयेषदवधूय करास्यम्।
किंबिभेति भुवनत्रय जिष्णु र्जिष्णुजि द्धत भवानपि नार्य्याः ३३

अब्रवीदिति अथ तावत् विरूपदृक् विरूपाक्षनामा मंत्री एव तं प्रति अब्रवीत् किं कृत्वा अहो किमिदं महत्कार्यं मित्युपेक्षया करं आस्यं च ईषत

अवधूय कांतयित्वा अन्योत्य,पलगा ऊतं सुखं च किंचित्कांतयति कमपूर्वो-दित्याह हे राजन् वा ऽहं भयात् भवनत्रयजयन शीलापि तथा इंद्र जेतापि सन् नार्या सकाशात् किं बिभेति अनुचित इतदिन्‍य: कराम्य मिति प्राप्यगत्वादेकवद्भाव: ॥ ३३ ॥

देव कीयं सबला स्ति वराकी किं त्वयाणु रचलो क्रियतेऽहो ।
तद्वचोभि रपि नेहि भयं यस्मात् मानृतजुषा स्त्रियोषः ॥३४

देवेति हे राजन् इयं वराकी तुच्छा अबला कास्ति न कापीत्यर्थ: अहो आश्चर्यं त्वया अणु: परमाणु रपि किं अचलो क्रियते स्थापि त्वया परमाणु रूपा मप्येतां पर्वतरूपां जानासीत्यर्थ: ननु अणुरूपा चेदियं तर्हि किं प्रतिभट-वद्गर्जतो त्याह हे राजन् तस्या:निष्टुरं वचोभि रपि भयं न प्राप्नुहि कुत इत्याह यत् यस्मात् सर्वा अपि स्त्रिय: साहसं अविचार्यकारित्वं अनृतं असत्य वक्तृत्वं च जुषंतीति तां इ य: संति वाचेव तासां शूरता न तु बलेनेति भाव: ।३४

तां तु यौवन मदेन वलंती वालुकां रविकरै रिव मन्ये।
धूलि मेव पुन रप्यहमेक: सैंहिकेय इव तां प्रकरोमि ॥ ३५ ॥

अस्ति चेत्किंचिद्बलं तथापि तत्प्रतीकार महमेवविधास्यामीत्याह ता मिति हे राजन् तां तु यौवनस्य मदेनैव वलंतीं प्रकाशमानां अहमन्ये-का मिव रविकरै: वालुकां सिकतामिव ,यथाधूलि रपि सिकता सूर्यकिरणै: रजत वत् प्रकाश्यते तथा निर्बलापि सा यौवनमदेन बलवता वभातो त्यर्थ: अथ चाह मेक एव सैंहिकेय: राहु रिव तां पुनर्धूलि मेव प्रकरोमि यथा राहुणा-च्छादिते रवौ प्रकाशमानापि सिकता पुनर्धूलि रेव जायते तथा मया तस्या यौवनमदे भग्ने सति पुन: सा निर्बलेव भविष्यतीतिभाव: ॥ ३५ ॥

पश्य मे बल मतर्क्य मिदानीं ता मुपेत्य तरसा युधि राजन् ।
संनियम्य सुदृढा यस पाशै रानयामि भवदंतिक मेव ॥३६ ॥

स्वपराक्रमं दर्शयति पश्येति हे राजन् इदानी मम बलं अतर्क्यं पश्य कि-

मित्याह अधुनैव तस्मा वेगेन तां युधि प्राप किं च दृढैः लोहमयैः पाशैः संनियम्य वद्धा तव समीप मेव नयामि ॥ ३६ ॥

इत्यतीव परुषास्य रुषोक्ति र्नो प्रभो रभिमता रसभंगात्।
चेतसेति स विमृश्य बभाषे दुर्धर स्तदनु तं दनुसूनुः ॥ ३७ ॥

इतीति तदनु तस्य विरूपाक्षस्य कथनानंतरं दुर्धरो नाम दनुसूनु इति चित्तेन विचार्य तं महिषं प्रति बभाषे इति किं अस्य विरूपाक्षस्य इतीयं क्रोधेन युक्ता तिनिष्ठुरा उक्तिः प्रभो र्महिषस्य अभिमता नेति जाने कुतः रसस्य शृंगारस्य भंगात् नाशात् रस वार्त्तायं युक्ता ननु रस भंग वार्त्तेत्यतोरसवार्त्तां वच्मीति भावः ॥ ३७ ॥

हे रसेश भवता किमदृष्टा विस्मृताः किमथ मन्मथचेष्टाः।
व्यंग्यभाव मुदितं न य दस्या स्तु विमर्शपदवी मधि रूढम्॥३८॥

किं भवाषे इत्याह हे इति हे रसायाः भूम्याः ईशराजन् यद्वा रसस्य शृंगारस्य ईशनायक त्वया कामस्य चेष्टाः वक्रोक्त्यादयः किं अदृष्टाः अननुभूताः यद्वा दृष्टा अपि किं विस्मृता जाताः कुत इद मुच्यत इत्याह यत् यस्मात् व्यंग्यो गूढो ऽभावो ऽभिप्रायो यत्र तादृशं अस्या देव्याः उदितं वचः तव विमर्श पदवीं न अधिरूढं त्वं न विचारयसीत्यर्थः ॥ ३८ ॥

यत्तया गदित माशु पृषत्कै र्हृद्विदार मिह तं खलु हन्मि।
विद्धि तद्धनन मत्र कटाक्षैः कामिमानसविदारणदक्षैः ॥३९॥

ननु किं तया व्यंग्य मुदित मिति त्वमेव कथयेति स्वय मेवाभिव्यनयति यदिति हे राजन् तया यत् गदितं अहं शीघ्रं तं महिषं हृदयं विदार्य इह बाणैर्हन्मि तत्तु अत्र हननं कटाक्षैर्जानीहि स्त्रीणां हि कटाक्षा एव शरा भवंति ननु तेषां हृद्विदारणशक्तिः कास्तीत्याह कीदृशैः कटाक्षैः कामिनां मानसस्य विदारणे दक्षैः चतुरैः तदुक्तं कालिदासेन इयं व्याधायते बालाभ्रूरस्याः कार्मुकायते कटाक्षाश्च शरायंते मनो मे हरिणायते इति ॥ ३९ ॥

पातयामि युधि यत्र तयोक्तं तत्त्ववेहि शयनीय निपातम्।
युद्धमत्र तु नखानखिदंतादंति विद्धि विविधं स्मरजन्यम् ॥४०॥

नन्वेतत्तु संपन्नं परन्तु यत्तयोक्तं तं युद्धे निपातयामि तत्किमित्याह पातयामीति हे राजन् यत्र तयोक्तं तं महिषं युधिपातयामि तत्तु शयनीये रतिकाले शय्यायां निपातं जानीहि अत्र युद्धं तु स्मरजन्यं विद्धि कीदृशं नखैः नखैः प्रहृत्येदं युद्धं प्रवृत्त मिति कृत्वति नखानखि तथा दन्तैर्दन्तैः कृत्वति दन्तादंति युद्धं वृत्तं न तेनेदमिति सरूपाति समासः अन्येषामपि दृश्यते इति पूर्वपदस्य दोर्घः इकृ कर्मव्यतिहारे इत्यनेनासान्तः तिष्ठद्गुप्रभृतीनीति चेत्यव्ययम् एवं प्रकारेण विविधं इस्ता हस्त्यादिकमस्ति ॥ ४० ॥

एतयाथ दभाणी गतासुं तं करोमि तदपीति विमृश्यम्।
वीर्य्यमेव हि जनेष्वसुभूतं निसृते निरसुता न किमस्मिन् ४१

ननु यत्तयोक्तं तं गतप्राणं करोमि तत्किमित्याह एतयेति यत्तु एतया अभाणि कथितं तं महिषं गतप्राणं करोमि तदपि त्वया इतिविचार्य इतिकिं सर्वेष्वपि जनेषु वीर्यमेव प्राणरूपमस्ति अथास्मिन् वीर्ये निसृते सति किं गत प्राणतानस्यात् स्यादेवेत्यर्थः ॥ ४१ ॥

इत्थमप्यपरमानवतीनां संश्रुतान् पुरुवचांसि मयेश।
मत्समःस्मररहस्यरसज्ञः क्वापि नास्ति जगतीह यदन्यः ॥४२॥

अथ किं त्वयाद्यैवेदमुदीर्यते उत पूर्वमप्यनुभूत मित्याह इत्थ मिति हे ईश इत्थं अमुनैव प्रकारेण अपरासामपि मानवतीनां भूयांसि व्यंग्यवचनानि मया पूर्वमपि सम्यक् व्यंग्योद्घाटनपूर्वकं श्रुतानिकृत इत्याह यत् यस्मात् इह जगति मत्समःअन्यः स्मरस्य रहस्यं गूढ भावं रसं च जानातीति तादृशःकोपि नास्ति अहमेवात्रातिनिपुणोस्मीत्यर्थः ॥ ४२ ॥

मां हि निर्दिश तदत्र विभो त्वं तां करोमि भवताशु सनाथाम्
चेतसा हृषद पीह भवेद्यामस्मदुक्तिभि रनंगवशे स्यात् ॥ ४३॥

अथैवं सतो किं विधेय मित्याह मा मिति हे विभो तस्मात् अत्र कार्ये मा मेवं विदिश त्वयि का शक्ति रित्याह अंघमेव तां देवीं भवता त्वया सनाथां करोमि तत्र महिषीं करोमात्यर्थः नन्वाद्य्या दृढनिश्चया कथमधोनतां भजिष्यतोत्याह इह लोके या स्त्री चित्तेन इमन् पापाण दृढनिश्चयाऽपि स्यात् सापि मनकोमलोक्तिभः कामाधोना स्यात् तर्हि किमियं भङ्गुर निश्चयेति भाव ॥ ४३ ॥

इत्युदीर्य विरतेथ रतिज्ञे नम्रकंधर उवाच स ताम्रः ।
मद्वचोऽपि नृपते श्रवणीयं चारु वेतर दथास्तु विचारे ॥४४॥

इतीति इत्य व मुक्त्वा तस्मिन् रतिशास्त्रज्ञेदुर्धरे विरत सति नम्राकंधोरा ग्रोवा य ः तादृशः ताम्रो नाम मंत्री उवाच हे नृपते मद्वचोऽपि श्रवणीयं त्वयेतिशेषः तत्तु वचः विचारे क्रियमाणं चारु अस्तु अथवा इतरत् अचारु अस्तु अथापि दृष्टे नात्तरं देयमेवेतराशया श्रोतव्य मिति भावः ॥ ४४ ॥

संति चारु वचना इह नैके रंजनाय नृपते नं हिताय ।
सत्यवक्तु रिह दुर्लभतो च्छाश्रोतु रप्युभयुजिस्तु समृद्धि ॥ ४५

ननु तद्वचश्चेदचारु त्वया निर्णीतं तर्हि किंकथनेनेतत्राह संतीति हे राजन् इह जगति चारुवचनाः अनेके संति यद्वा चाटु वचना इति पाठः तत्र मिथ्याभियुक्त चतुरवचना इतार्थः परन्तु ते नृपतेः रंजनाय वदन्ति नतु हिताय परिणामे दुःखदत्वात् अथ च इह स्वामिना हिताय सत्यवक्तुर्जनस्य दुर्लभता ऊच्चा न केवलं सत्यवक्तुरेव किन्तु सत्यवचः श्रोतुरपि दुर्लभतैवास्ति उभयाः संभवे किं सिद्ध्यतीतत्राह उभयोः सत्यवक्तृसत्यश्रोत्रोः युजियोगस्तु समृद्धये संपद भवति तदुक्तं किराते स किं सखा साधु न शास्ति योधियं हितान्नयः संशृणुते स किं प्रभुः सदानुरक्तेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्व संपद इति ॥ ४५ ॥

नैव सा स्मरवती व्यवसेया ना नुजुर्लसति गौरदसीया ।
मन्यसे यदि विलोम मथास्याहेति संहतिभृतीवद हेतुम् ॥४६

अथ किं सत्यं गदसीति पृष्टस्तावद् धैर्योक्तिं खंडयति नैवेति हे राजन् सा देवी स्मरवती कामुकी त्वया न व्यवसेया न विचारणीया तर्हि व्यंग्यं कथं गदनीत्यत आह अगदनीया एतत्संबंधिनो गो: वागपि अनृजु वक्रा न लसति वाच्यार्थ एव तद्वचमि नतु व्यंग्यार्थे इत्यर्थ: अथ यदि विलासं मदुक्त वचस: अन्यथा स्मरवत्वादि विशिष्टतां तस्यां मन्यसे तर्हि अस्या: शस्त्र समूहधारणे हेतुं वद यदि स्मरवती स्यात् तर्हि शस्त्राणि कथं धारयेत् वीरशृङ्गारयोर्मिथो विरोधादित्यर्थ: अतो दुर्धरोक्तं त्वया न ग्राह्य मिति भाव: ॥ ४६ ॥

न व्यलोकि जगति क्व च नैवा श्रावि तादृगबलातुलरूपा ।
निर्भयं धृतमहासिनि शिताष्टादशप्रमितदो र्हरियाना ॥ ४७

उक्त वचो दाढर्याय तस्या आश्चर्यतां दर्शयति नेति हे राजन् तादृशी अबला इह जगति कुत्रापि न व्यलोकि न दृष्टा नापि अश्रावि श्रुता कीदृशी अतुलं अनुपमं रूपं यस्या: तथा निर्भयं यथा स्यात् तथा धृतानि महा- सि यया तथा अष्टादश प्रमिता दोष: भुजा यस्या: तथा हरि: सिंहोयानं वा हनं यस्या: यदि कामुकी स्यात्तर्हि दृग्रूपा न स्यादिति भाव: ॥ ४७ ॥

दुर्निमित्तपिशुना निशि दृष्टा: सुप्तिगेन च मया प्रतिगेहम् ।
कृष्णवेषवनिता विलपंत्य: पक्षिणश्च विकृतारववंत: ॥ ४८ ॥

ननु स्यादेतत् परन्तु बलेनापि तां स्वाधीनां करोमीति तदाशयं ज्ञात्वा तस्य मरणासन्नतां सूचयति दुर्निमित्तेति हे राजन् अद्य रात्रौ सुप्तिं प्राप्तेन सुप्तेन मया विलापं कुर्वंत्य: मलिनवासो धारिण्य: वनिता: गेहंगेहं प्रतिदृष्टा: तथा विकृता: वैलक्षण्येन भीतिप्रदा: आरवा: शब्दा येषां तादृशा: पक्षिणश्च दृष्टा: ननु तेषां किं फल मित्याह को० वनिता: पक्षिणश्च दुर्निमित्तस्य अशुभस्य पिशुना: सूचका: अग्रे अशुभमेव भावितेति ज्ञापका ॥ ४८ ॥

तन्न भावि भद्रकं भविता ते लक्षणै रिति विलक्षित मेभि: ।
प्रातिकूल्य मुपगंतरि दैवे वज्रतां तृणमपि व्रजतीह ॥ ४९ ॥

एतदेवाह तदिति तत्तस्मात् इन्द्राभिदैःस्वप्नादिभिर्लक्षणैः मया इति चिन्तितं इति किं न तत् भावि भविष्यत्कःतोन भवकं कल्याणं न भवता त्वां मा हनिष्यतो न ध्वा न: नान्यत्रा द जनार मां सा कथमलं जर्नुमितरातयाह हे राजन् दैवे प्रतिकूलतां उपगतवति सति इह तृणमपि वज्रतां व्रजति अतो ऽबलापि त्वां हन्तु मल मिति भावः ॥ ४८ ॥

चेच्चिकीर्षसि पलायन मद्भिमज्ञशक्रजेतु रतुला तत्र गर्हा ।
युद्ध मेव तदिहास्ति वरीयो यद्भवेदुभयथा सदुदर्कं ॥ ५० ॥

इति चेतर्हि पलायनं करोमि यतस्त्राह चेदिति अस्मिन्कार्ये यदि त्वंपलायनं कर्तुमिच्छसि तर्हि इन्द्रजेतुस्तव अतुला गर्हा निंदा भविष्यति अहो इंद्रादि जेतापि महिषः स्त्रिया पलायिता इति जना निंदांकरिष्यन्तीति भावः तर्हि किं विधेय मितरातयाह तत्तस्मात् इह तत्र युद्धमेव वरीय अति श्रेष्ठमस्तियत् युद्धं उभयथापि मृता जित्वा स्वयं मृतेपिच शोभनोत्तरफलं भवत् पक्षद्वयेपितवलाभ एवेत्यर्थः तदुक्तं गीतायां हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं तस्मादुत्तिष्ठकौन्तेय युद्धाय कृतनिश्चय इति उदर्कःफल मुत्तरमित्यमरः ॥५०॥

नीतिरीति रिति ते गदितामे या यथामति हिता किमु नेयं ।
इत्युदीर्य्य विरतं स तमूचे साधु ते सचिव सूनृत मुक्तम् ॥५१

अथ मीति परीक्षार्थे तं पृच्छति नीतीति हे राजन् ते तुभ्यं इत्येवंविधाया नीतिरीति मया यथा मति गदिता सा हितास्ति किमु न हितास्ति अथेत्युक्त्वा विरतं तं ताम्रंसः महिषः ऊचे हे सचिव त्वया साधु शोभनं सूनृतं सतं च उक्तं अत स्तव वचोऽतिदुर्लभ मितिभावः प्रियसत्ययोरेकत्रावस्थापनात् तदुक्तं किराते हितं मनोहारि च दुर्लभं वचः इति सूनृतं प्रिये सत्ये इत्यमरः ॥ ५१ ॥

अथ्य दक्षतमति स विडालाक्षा महोचित मथोज्झितपक्षः ।
दक्षता क्षितिपतेऽत्र विलक्ष्या मंत्रिणा मभि तदागमहेतुम्

अव्यदिति अथ विडालाख्यो नाम मंत्री सद्धोचितं मध्विषं अव्यत्कोदृश: अघता अनष्टा मति र्यस्यतथा उज्झित स्त्यक्त:पक्षो येन पक्षपातं विहाय यथा वदुक्तवानित्यर्थ: किमुवाचेतयाह हे क्षितिपते अत्रास्मिन् नीतिकार्ये एषां मंत्रिणां तस्या आगमहेतुं प्रति त्वया दघता विलक्षा ज्ञातव्या किमर्थं मिय-मागते त्येतान् पृच्छे तदर्थ: ॥ ५१ ॥

मन्मते तु नृपते कृतिरे षा मायिनां दिविषदां निखलास्ति
अन्यथा कथ मिहानवलंवा गर्जतीय मवला सवलेव ॥५२॥

अथ त्वमेवाख्याहीतयतआह मदिति हे राजन् मम मते तु एषा नि-खिलापि तदुत्पत्त्यागमनादिरूपाकृति:मायावतां देवानामस्ति अन्यथा तेषां चेत्कृति र्न स्यात् तर्हि इयं अनवलं वा निराश्रया अवला इह सवलेव कथं गर्जति ॥ ५२ ॥

तानपीह पिहतान् क्वचिदूहे सर्वं एव समये तु सहाया: ।
प्राक्तना निजवृषा इव तस्यास्त्वद्वधाय विवुधा भवितार: ५३

ननु ते कुत्रेतयतआह तानिति तान् देवानपि इहैव कुत्रचित् पिह-तान् तिरोभूतान् तर्कयामि अथ पिहता: किं करिष्यतीत्यतआह समये युद्ध काले सति एते सर्वे एव देवा: तव नाशाय तस्या: सहाया भवितार: के इव प्राकृता: पूर्वजन्म संचिता: निजवृषा: स्वपुण्यानीव यथा अदृष्ट रूपेण तिरो-हितानि निजपुण्यानि समये सहायानि भवंति तद्वत्तेपीतयर्थ: वृषो गव्याखु धर्मयो रिति हैम: ॥ ५४ ॥

एत देवविषयीकुरुते धीर्नास्ति मे गति रथो भवितव्ये ।
यद्वियासुघटितं नियति स्तद्राकृणोत्यवटितं तु तनोति ॥५४॥

ननु तेषु सहायो भूतेष्वपि पुन: किं भविष्यतीतयतआह एतदिति हे राजन् मम वुद्धि: एतन्मात्र मेवार्थं विषयी कुरुते अथ मे गति र्भवितव्ये इदमेवभवि-ष्यतीतय र्थं त्रिधेर्थे नास्ति ननु वुद्धिमतां भविष्यदर्थेपि गतिरस्तीतयतएवु-द्धिमद्भि र्यत् वुधा सम्यक् एतदेव भविष्यतीति घटितं स्यात् तत् नियति: दैवं

द्राक् शीघ्रं कृणोति नाशयति यत्तु बुद्धा कदाचिदपि न घटितं तत् तनोति विस्तारयति तदुक्तम् अघटित घटितानि घटयति सुघटित घटितानि जर्जरी कुरुते विधिरेव तानि घटयति यानि पुमान्नैव चिंतयतीति ॥ ५४ ॥

जीवव त्त्व मसि न स्तुयि तुष्टे सासवो निरसव: स्म च खिन्ने।
त्वन्निदेश मनुसृत्यविपत्ति: श्रे यसे विपदिवेतरथा श्री: ॥५५ ॥

न च स्वप्राणरक्षार्थं युद्धाद्भीतैं भंवद्भि रिद मुच्यत इति वाच्य मितयाह जीववदिति हे राजन् अस्माक मनुजीविनां तुं जीववत् असि अतएव त्वयि तुष्टे सति वयं सासव: सप्राणा: स्म त्वयि खिन्ने तु निष्प्राणा इव स्म अथ तदीयं निदेशं आज्ञामनुसृत्य विपत्तिरपि अस्माकं श्रेयसे भवति इतरथ तदाज्ञा मननुसृता तु श्रीरपि विपत्ति रिव ॥ ५५ ॥

दुर्मुखोप्यभिमुखं महिषस्य प्राहिणोत् द्रुहिणधी रितिवाचम्।
एतदुक्तपुनरुक्तय एषा शेमुखी हि मुखरी कुरुते माम् ॥ ५६ ॥

दुर्मुखइति अथ दुर्मुखो नाम मंत्री अपि महिषस्य संमुखं इति वाचं प्राहिणोत् प्रेरयामास कीदृश: द्रुहिणवत् ब्रह्मवत् धीर्यस्य यद्वा द्रुह्यतीति द्रुहिणा कलहार्थिनी धी र्यस्य इति कां हे राजन् एतेन विडालाक्षेन उक्तस्य अर्थस्य पुन रुक्तये एषा शेमुखी बुद्धिरेव मां मुखरो कुरुते वाचालं करोति तव हार्दार्थमेत त्प्रतिपादित एवार्थो मयापि स्वबुद्ध्या ऽन्यरीत्या प्रति पाद्यत इत्यर्थ: धी: प्रज्ञा शेमुखी मतिरितामर: ॥ ५६ ॥

कालरात्रि रिवन: कुलमूलोन्मूलनाय खलु लक्ष्यत एषा ।
नाणवो ऽपिसुधियायदुपेक्ष्या: स्फायमानरुग मिवहुताशा: ॥

किं गदस्रोतयाह कालरात्रि रिति हे राजन् एषा देवो अस्माकं रक्षसां कुलरूपवृक्षस्य मूलोन्मूलनायकालरात्रि: प्रलयोपलक्षिका रात्रि रिवलक्ष्यते नाम न्यूनतु बुद्धि: कार्यंतरतह यत् यस्मात्धीमता अणव: न्यूना अपिरोगरिपु

हुताशाः स्फायमाना वृद्धिं प्राप्नुवंतः न उपेक्ष्याः यथाऽग्निरोगौ स्वल्पावपि वृद्धिं प्राप्य दुष्करौ भवतः तथा शत्रुरपीत्यर्थः ॥ ५७ ॥

साम सा मनति नो न च दानं दूततः श्रुत मिदं भवतापि ।
भिद्यते कथ मसावसहाया तच्छ्रिये श्रय चतुर्थ मुपायम् ॥ ५८

ननु नीतिवित्प्रतिपादिताः सामादयः उपायास्तत्र विधीयंता मित्याशंकायामाह सामेति हे राजन् सा देवी सामनश्रामनति तथा दान मपि नामनति इद मेव पुरा प्रेषितात् दूतादपि भवता श्रुतमेव अथ असहा या एकाकिनी सा कथं भिद्यते भेदोहिरिपोः सहायेष्वेव युज्यते एकस्याः भेदः कथं जायेतेत्यर्थः तर्हि किं विधेय मित्यतआह तत्तस्मात् श्रियै उभयथापि संयदर्थं चतुर्थ मुपायं दंडरूपं श्रययुक्तमेव कुर्वित्यर्थः ॥ ५८ ॥

नो पलायनमति स्त्वयि युक्ता जंभभित्प्रभृतिभेत्तरिरांभे ।
चेत्पलाय्य न पुनर्मरणं स्या त्तर्हि गर्ह्य मपि तद्ग्रहणीयम् ५९

ननु युद्धे क्षते भवता चेन्मृतिरवश्यं निश्चिता तर्हि पलायनं कार्यं मिति चेत्तत्राह नो इति हे रांभे रंभात्मजेत्वयि पलायनस्य मति र्न युक्तास्ति कुत इत्याह कौ० त्वयि जंभभित्प्रभृतीन् इन्द्रादि देवान् शस्त्रैर्भिनत्तीति ताद्दशे इंद्रादीन् देवान् जित्वा भीतः पलायन मति र्निंद्य मित्यर्थः ननु स्वप्राण रक्षार्थे निंद्यमपि कर्माचारणीय मित्यतआह सत्य मेतत् परन्तु यदि पलाय्यपुनः कदाचिदपि मरणं न स्यात् तर्हि अति निंद्यमपि तत्पलायनं ग्रहणीयं अयं भावः विदुषा तु तावत् प्राणेषु नश्यत्स्वपिनिन्द्यं कर्म नाचरणीयं यदि भक्षितेपि लशुने व्याधिशांताभवत् तस्मिन्नाचरितेपि प्राणा नश्येयुस्तत्कथमा चरणीय मिति ॥ ५९ ॥

कोपि न श्वसिति संतत मस्मिन्बुद्बुदा य दसवोऽत्रभवाब्धौ
स्तोकमप्य खिललोकप शोकं मा कृथा अय वृथा मरणे तत्

न च ब्रह्मणो वरप्रदानान्मे मृतिरेव नास्तीति वाच्यमित्याह कोपीति अस्मिन्संसारे कोपि जनः सन्ततं निरन्तरं न श्वसिति न जीवति यद्वा त्वदर-

दाता कः ब्रह्मापि निरन्तरं न जीवति तस्यापि द्विपरार्धमात्र कालावच्छिन्नत्वात् कुत इत्याह यत् यस्मात् अस्मिन्संसार समुद्रे अमी प्राणाः बुद्बुदा इव सन्ति अथ मत्तो मृतेः रवश्यं भावितां श्रुत्वा युद्धोत्साहनाशकं शोकं न कुर्यादित्याशयेनाह हे अखिल लोकपालक तत्तस्मात् मृतेरवश्यं भावित्वात् स्तोकं अल्पमपि शोकं मरणविषये हृथा मा कृथाः न कुरु अपरिहार्येर्थे शोकस्य व्यर्थत्वात् तदुक्तं गीतायाम् जातस्य हि ध्रुवो मृत्यु ध्रुवं जन्ममृतस्य च तस्मादपरिहार्येर्थे न त्वं शोचितु मर्हसीति ॥ ६० ॥

नो विलंबितु मथाय मनेहा नेह पूर्ववदवेहि सुकृत्यम् ।
प्रेषयस्व भृतकं तदमुं मा मार्य कार्य मिह सेत्स्यतिशौर्यात् ॥

न च सहसा विदधीत न क्रिया मिति नीतिविदुक्तं विचार्य विलंबेन कार्यं विधास्याम इति मंतव्य मित्याह नो इति हे राजन् अथ अयं अनेहाः समयः विलंबितुं न अर्हतीति शेषः ननु पूर्वं विलंबेनेव शक्रादयो जिता इत्यत्राह इहास्मिन् कार्ये पूर्ववत् शक्रादि युद्धवत् सुखेन कृतं न अवेहि हे आर्य्य तत्तस्मात् अमुं पुरः स्थितं मां भृतकं तां प्रति प्रेषयस्व यतः इदं कार्यं शौर्यात् पराक्रमादेवसेत्स्यति सिद्धिं प्राप्स्यति अहं तत्र युद्धं करिष्यामीति भावः कालो दिष्टोप्यनेहापि समयोपीत्यमरः ॥ ६१ ॥

बाष्कलोऽप्य विकलं त मथो चे वाक्कलासु कुशलः कलहार्थी ।
खड्गचर्मभृति मा नृपभैषीः कालतोपि मयि जीवति दासे ६२

बाष्कल इति अथा विकलं यथा स्यात्तथा बाष्कल नामा मन्त्री अपि तं महिषं ऊचे कीदृशः वाचां कलासु कुशलः तथा कलहार्थी योद्धुकामः किमूचे इत्यत्राह हे नृपमयि खड्गचर्मभृतिदासे जीवति सति कालतोपि त्वं मा भैषीः भयं न कुर्वित्यर्थः कालमपि जेतुं मम शक्ति रस्ति किं पुनरबला मिति भावः ॥ ६२ ॥

भाजनं मम रुषो न सुरारि र्नो पुरारि रथ का गणनैंद्री ।
मच्छरप्रहृतिजर्जरितांगः संगरे कथ मलं सुरसंघः ॥ ६३ ॥

नन्विन्द्रादय स्तत्सहायिनः संति तान् कथं जेष्यसीतयाह भाजन मिति हे राजन् मम क्रोधस्य भाजनं पात्रमाश्रय इति यावत् मुरारि विष्णुर्नास्ति मम क्रोधं सोढुं विष्णुरपि नाल मित्यर्थः अथ पुरारिः शिवोपि न पुनः इंद्रो इन्द्रस्येत्यर्थः गणना कास्ति स तु हस्येव नंच्यतीत्यर्थः अथ च मम शराणां प्रहारे जर्जरीभूतांगो देवसमूहः युद्धे स्थातुं कथमलं न कथंचिदपीत्यर्थः ६३

उद्भवं युधि जगद्भव वीरस्थायिभाव मुररी कुरु तस्मात्।
उज्झति त्वयि तु तं वय मुच्चैः स्याम कातरतरा अपि शूराः॥

न चेतन्मानुमन्तु मुत्सहे इति वाच्य मित्याह उद्भव मिति हे जगतो भव स्वामिन् तस्मात् वीररसस्य स्थायिभावे युद्धे उद्भवं उत्साहं अंगी कुरु अथ त्वयि तमुत्साहं उज्झति त्यक्तवति तर्हि वयं उच्चैःशूरा अपि कातरतराः स्याम उत्साहं विना तदात्मकस्य वीररसस्यानुत्पत्तेः तदुक्तं कार्यारंभेषु संरंभः स्थेयानुत्साह उच्यते उत्साहात्मा भवेद्वीर त्रिधा धर्माजिदानत इति स्थायिभावस्यापि लक्षण मुक्तं विरुद्धा अविरुद्धा वायं तिरोधातु मक्षमाः आनन्दा कुरकन्दो सौभावः स्थायिपदास्पदमिति अर्वाख्यति चास्य रूपक् न्यायेन बोद्धव्या मह उद्भव उत्सव इत्यमरः॥ ६४॥

दिष्ट मत्र वद केन नु दृष्टं कल्पितं समरभीरुभि रिष्टम्।
दृश्यते प्रकट मेव यदीयं सत्फलं श्रय हितं पुरुषार्थम्॥ ६५॥

न च उत्साहस्य पौरुषात्मकत्वात्तस्मिंश्च कृतेपि प्रायशः फलसिद्धेरदर्शनादकृते च फलसिद्धे दर्शनान्निष्फलता सिद्धेर्दैवमेवपरमिति वाच्यमित्याह दिष्टमिति हे राजन् नु वितर्के अत्र जगति घटादिवत् दिष्टं दैवं केनदृष्टं न केनापीत्यतो बालविभीषिका वत्कल्पना मात्रमेवेत्यर्थः॥ तर्हि कथं प्रतिपाद्यते इत्यतआह इदं तु दैवं समरात् भीरुभिः कातरैः निर्जिष्टं कल्पितं न तु शूरैः पौरुषं चात्र दैवं च शूरकातरयो र्मतमित्युक्ते इति दैवं निरस्य पौरुषं प्रतिपादयति यस्य पुरुषार्थस्य प्रकटमेव सत्फलं दृश्यते तं हितरूपं पुरुषार्थं श्रयस्व कुरु यथेंद्रः शतयज्ञान् कृत्वेन्द्रतां प्राप्त स्तथा न कश्चिद्दैव माश्रित्य इंद्रतां प्राप्तो दृष्ट इत्यतः पौरुषमेव परं न तु दैवं

तदुक्तं वासिष्ठे सकलकारणकार्यविवर्जितं निजविकल्पवशादुपकल्पितं त्वम-
नपेक्ष्य हि दैव मसन्मयं श्रयशुभाश्रय पौरुषमुत्तम मिति ॥ ३६ ॥

संयुगाय लघु निर्दिश त न्मां त्वत्प्रतापत इदं खलु कार्यम् ।
सिद्ध मस्ति हि वयं तु निमित्त मित्रकाशित मिवात्र दृशोर्थम्

स्वोक्ति मुपसंहरन्नाह संयुगायेति हे राजन् तत्तस्मात् मां युद्धाय शीघ्र
निर्दिश अहमेव तां जेष्यामीतर्थः ननु भवद्भिः कार्यं साधिते मम किं यशो
भविष्यतीतत्राह हे राजन् इदं जयरूपं कार्यं तव प्रतापत एव सिद्धमस्ति न
तु सिद्ध मेष्यति वयं तु अत्र निमित्तमात्रं भविष्यामः तत्र दृष्टांत माह अत्र
लोके मित्रेण सूर्येण काशितं प्रकाशितं अर्थं घटादिकं प्रति दृशः दृष्टय इव
यथा घटादयोर्थाः सूर्येणाग्रे एव प्रकाशिता भवंति दृष्टयस्तु निमित्तमात्रं
भवन्ति तद्वदितर्थः ॥ ६७ ॥

इत्थमसौ विरराम गदित्वा साधु नु वा भणितं न मयेदम् ।
दास्यति किं प्रभुरुत्तर मस्मादासत चेति नृपास्य मुपश्यन्

इत्थमिति असौ वाष्कलः इत्थं गदित्वा विरराम अथ च इति निश्चयार्थं
राज्ञो मुखं उत्पश्यन् सन् आसत तत्र तस्थौ इति किं मया इदं साधु भणितं
वा न असाधु भणितं किं च अतः परं असौ प्रभुं किमुत्तरं दास्यति दोधक
वृत्त मिदं भभभाद्गाविति च्छन्दः ॥ ६८ ॥

इति मंत्रिगिरः स निगीर्य वराः
श्रवसा मनसा ऽपि विचार्य चिरम् ।
अनयो र्नयवाचि कर्वितधी
रिति तौ जगदे जगदेकपतिः ॥ ६९ ॥

इतीति स जगत एकः पति र्महिपः इतत्रमुना प्रकारेण विरूपाक्षादी-
नां मन्त्रिणांवराः श्रेष्ठाः गिरः श्रवसा कर्ण निंगीर्य अथ च चिरं मनसा-
पि तासां तारतम्यं विचार्य तौ दुर्मुखवाष्कल नामानौ मन्त्रिणौ प्रति इति
वक्ष्यमाणं जगदे नन्वितरां स्त्यक्त्वा तौ कथमूचे इतत्राह कौ० महिपः

अनयोः दुर्मुखवाष्कलयोरेव वाचिकं विना युक्ता धी र्येषा आभ्यामेव युक्त मुक्त मिति युक्ति बुद्धि रित्यर्थः नाटकव्रत मिदं इह नाटकसंबुधिसे: प्रथित मिति लक्षणात् ॥ ६६ ॥

श्लाघ्यौ दुर्मुखवाष्कलौ युधि युवां मत्कार्य्यवद्धस्पृहा
युक्तं वां नयसौष्टवांचित मद श्शौर्यप्रदं चेतसः ।
युष्माभिः सह तत्र सैनिकवरै स्त द्गम्यतां मा चिरं
साम्ना ताव दृजु र्भवे द्यदि न सा श्शाम्ना च नेया पुनः

किमूचे इत्यतआह श्लाघ्याविति हे दुर्मुखवाष्कलौ युवां युद्धे श्लाघ्यौ तथा मत्कार्ये एव बद्धा स्पृहायाभ्यां तादृशौ तथा वां युवयोः इद मुक्तं वचः न येन नोतरासौष्टवेन च वंचितं पूजितं युक्त मिति यावत् न केवल मोदृश मेव किंतु चेतसोपि शौर्यप्रदं ततस्मात् सैनिकवरैः सह युष्माभि स्तत्र गम्यतां अस्मिन् कार्ये चिरं मा नक्रार्थ्य मित्यर्थः तत्र किं विधेय मित्याह सादेवी तावदादौ साम्ना ऋजुः सरलान भवेत् तर्हि पुनः श्शाम्ना शौर्येण बल सा नेया आदौ तु सा मेव विधयं तवेत् न स्तो कुर्यात् तर्हि युद्धे न जीवंतरीवात्र वद्वानेतव्यतार्थः द्रविणं नरः सहीवनगोर्थ्यानि श्याम युष्म चेतरमरः युष्माभि रिति बहु वचनं बहुसैनिकाभिप्रायेण तद्गौरवार्थं वा ॥ ६८ ॥

श्रीमाञ्शंभो श्चरणसदनीभूतहृ च्छम्भुनाथो
लक्ष्मीनाथं कविपरिमृढं देशको सूतयं मां ।
तेनो ह्रीते महिष निधने गीतलक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति मगमत्सर्ग एषोपि षष्ठः ॥ ७० ॥

श्री मानित्यादि पूर्ववत् ॥ ६८ ॥

इति श्रीलक्ष्मीकाव्ये महिषमंत्रिमंत्रचिन्तनं नाम षष्टः सर्गः ६

इति श्री लक्ष्मीकाव्यव्याख्यायां षष्टः सर्गः ॥ ६ ॥

उँों नमः श्रिये तथेति तं मूर्ध्नि निदेश मैश्वरं
निधाय चाञ्जाय नतिं विधाय तौ।
जयाय तां प्रत्यथ जग्मतुर्बलैर्वृतौ
पतंगौ शिखिनः शिखा मिव ॥ २ ॥

उँों नमो विघ्नहर्त्रे अस्मिन् सर्गे संविर युद्ध वर्णयिष्यते तावदिति महि-षेणामत्यो दुर्मुखवाष्कलयो र्गमनप्रकार माह तथेति अथ तौ दुर्मुखवाष्कलौ तं ऐश्वरं ईश्वरस्य महिषस्य संबंधिनं निदेशं आज्ञां मूर्ध्नि निधाय मस्तके धारयित्वा अथ च अञ्जाय शीघ्रं महिषस्य नतिं विधाय कृत्वा तां देवीं प्रति जयाय जग्मतुः कीदृशौ बलैः सैन्यैः परिवृतौ कौ का मिव शिखिन अग्नेः शिखां ज्वालां पतंगाविव अनेन तयो र्मरणासन्नता सूचिता अस्मिन् सर्गे वंशस्थ वृत्तम् जजौ तु वंशस्थ मुदीरितं जराविति लक्षणात् ॥ १ ॥

ततो निमित्ता न्यगणय्य दर्पितौ
शुभेतराण्यध्वनि नद्धदंशनौ।
उपेत्य तां तौ रथिनौ महारथा
वदूर मुत्क्षिप्तभुजावथोचतुः ॥ २ ॥

तत इति तदनन्तरं तौ मन्त्रिणौ अध्वनि मार्गे शुभेतराणि अशुभानि निमित्तानि शकुनानि अगणय्य तत्र हेतु दर्पितौ किं मस्माकं बलवतां शकुनै रित्यहं कृतौ अथ च तां देवी मुपेत्य अदूरं निकटमेव उत्क्षिप्तभुजौ संत ऊचतुः कीदृशौ नद्धे बद्धे दंशने कवचे याभ्यां तथा रथा रूढौ तथा महारथ दशसहस्रेण योद्धुं समर्थौ तदुक्तम् एको दशसहस्राणि योधयेद्यस्तु धन्विन अस्त्रशस्त्रप्रवीणश्च महारथ इतिस्मृत इति तनुत्रं चर्मदंशनं उरश्छदः कंकटको जगरः कवचो स्त्रियामित्यमरः ॥

अयि स्फुरत्सुंदरतैकशेवधे विधेहि साफल्य ममुष्यवर्षणः।
मन स्तुदर्थं व्यथितं जगत्पते र्वतात किं त्वां करुणारुणाक्षि न ॥

किमूचतु चितापेक्षायां तावत् सामपूर्वक मूचतु रित्याह अयीति ।कोम-लामंत्रणे हे स्फुरंतो या संदरता तस्याः एकशेवधेनिधिरूपे देवि अस्मदावयोः शरीरस्य साफल्यं विधेहि तेन सह भोगान् भुक्त्वानिमंदस्य तच्छरीरस्य साफल्यं भविष्यतीति भावः अथ चेन्नि स्पृहामि तथापि परोपकारायापावश्य मेवेदं कार्यमित्याहतुः हे देवि नृदर्थं जगत्पते महिषस्य मनः व्यथितमस्ति वत खेदे अस्मान्नि महिषं त्वा करुणा किमर्थं न कणद्धि नावृणोति अस्मि-न्दयां कस्मान्न करोषीत्यर्थः कधिरावरणे इत्यस्य कधादित्वा न्निधि नांशेव धिरितामरः शरीरं वर्ष्मविग्रह इति च ॥ ३ ॥

वृथात्र तारुण्य मरण्यवासिभि र्हिरण्यगेहार्ह मु किंनुनीयते।
शरण्य मेनं तरुणि श्रयाशु तत् निराश्रयानो वनिता लता वरम्

वृथेति हे तरुणि अत्र निर्जनदेशे अरण्यवासिभि मृगादिभिः सह इदं तारुण्यं वृथा किं किमर्थं नीयते कीदृशं हिरण्मयगेहनिवासयोग्यं अनुचित मेतदित्यर्थः तत्तस्मात् हिरण्यगृहनिवासार्थं तारुण्य साफल्यार्थं च एनं शरण्यं महिषं आशु शीघ्रं श्रय हि यतः वनिता लताश्च निराश्रया मताः न वरं न श्रेष्ठाः यथा लता वृक्षं विना न तिष्टंति न च शोभंते तथा वनिता अपि नायकं विनेत्यर्थः वरमिति मां न मव्ययम् उक्त इतिद्वावप्यति वितर्कबोधकौ ॥ ४ ॥

इतीरिताभ्यां निजगाद सा मितं
स्मितांचितास्यां तरमर्पदोहदा
अहो पशूनां पशुता दुरत्यया
स्मरंति हा सन्नलया अपि स्मरम् ॥ ५ ॥

इतीति इतीव साभ्यां संविभ्यां उक्ता सा देवी मितं वचो जगाद कीदृशी स्मिते न अंचितं आस्यं यस्याः तथा अंत मनसि अमर्षस्य क्रोधस्य दोहदो गर्भो यस्याः किं जगादेत्याह अहो आश्चर्य एषां महिषादीनां पशूनां शुपात दुरत्यया दुःखेन नाशितुं शक्यास्ति कुत इत्याह हा खेदे आसन्न

समपोख्यो लयो नाशो येषां तादृशा अपि यतः यस्मात्कामं स्मरंति दोहदो गर्भचिन्हे पि तथा गर्भाभिलाषयोरिति हैमः ॥ ५ ॥

कथं वताई त्यधमः पशुष्वयं जगत्प्रसू मा मपि वीक्षितुं दृशा समो हि लोकेषु सुखाय संगमो न कामधेनुः खर मीहते क्वचित् ॥ ६ ॥

कथ मिति वत खेदे अयं पशुषु अधमो महिषः मां जगतां मातरं दृशापि वीक्षितुं कथं योग्यो भवति यतः लोकेषु समस्तुल्य एव संगम सुखाय भवति न तु विषमः अत एव दृष्टांत मात्र क्वचिदपि कामधेनुः खरं न ईहते न वांच्छती तात्पर्यः अनेना तिलोत्तमा तसत्र सूचिता ॥ ६ ॥

अथो खलूक्त्वा खलु तं विशृंखलं
खलं निवोढुं त्वधुनापि गम्यताम् ।
यथा स्वयं स्वर्गपदं स वज्रिणे
विसृज्य याया च्छ्वसितुं रसातलम् ॥ ७ ॥

अथोइति अथानंतरं खलूक्त्वा अन्यच्च वक्तव्य मितार्थः खलु निश्चयेन हे मंत्रिणः तं विशृंखलं उल्लंघित सदाचारं खलं दुष्टं च तं महिषं निवोढुं उपदेष्टुं अधुनापि गम्यतां किमुपदेष्टु मितात्र यथा येनोपदेशेन स महिषः स्वयमेव वज्रिणे इंद्राय स्वर्गपदं दत्वा श्वसितुं किंचित्कालं जीवितुं रसातलं प्रति यायात् तत्रैव तस्य जीवनावकाशो नान्यत्रेत्यर्थः अलं खल्वः प्रतिषेधोक्तेति खलूक्ता ॥ ७ ॥

निशम्य ता वित्यथ तापितौ रुषा
पृषत्कवृष्टिं तु भितौ ववर्षतुः ।
अनागता मेव शिवापितां तदा
शरै रणाकुलात्र जघान ता वपि ॥ ८ ॥

निशम्येति अथ तौ मंत्रिणौ इति तस्य वाचं निशम्य क्रोधेन तापितौ

संतौ तां प्रतिवाणवृष्टिं ववर्षतुः सा शिवापि तां बाणवृष्टिं मनागतामेव स्वबाणैः अग्रतः कृत्वा चूर्णयित्वेत्यर्थः तौ दुर्मुखबाष्कलावपि जघान ॥ ८ ॥

बभूव ताव द्रणमूर्ध्नि सम्मुखः स
बाष्कलः साक्षिणि दुर्मुखे स्थिते।
तयो रथासी त्तुमुलं चिरं मृधं
गदासिवाणांकुशपाशपर्शुभिः ॥ ९ ॥

युगयद्वयो र्युद्धं वर्णयित्वैकैकमस्याह बभूवेति आदौ युद्धमस्तके स वाष्कलः तस्याः सम्मुखो बभूव क सति दुर्मुखे साक्षिणि स्थिते सति अथैवं सति तयो र्देवी वाष्कलयोः चिरं कालं वाणां कुशपाशपरश्वादिभिः तुमुलं युद्ध आसीत् तुमुलं रणसंकुलं इत्यमरः कुठारः स्त्री च स्वधितिः परशुश्च परश्वधः कुटाः टंकः पर्शुरर्येति रभसात् पर्शु शब्दोपि ॥ ९ ॥

दुरासदं तं युधि वीक्ष्य चंडिका
जघान वाणै रथ पंचभीरुषा।
स चा पि चापी चपलं शिलो मुखै
र्ललाट तां स्तां तु तुतोद सप्तभिः ॥ १० ॥

दुरासद मिति अथ सा चंडिका तं वाष्कलं युधि दुरासदं दुर्विनाश्यं वीक्ष्य पंचभिर्वाणैः क्रोधेन जघान सः वाष्कलोपि चापी धनुष्मान् चपलं शीघ्र मेव स्वबाणैः तस्या स्तान् बाणान् ललाट च्छिच्छेद तां चंडिकां तु सप्तभिर्वाणैः तुतोद विव्याध ॥ १० ॥

तदीयवाणां स्त्रिगुणै स्तु पंचभि र्बभंज संजं च रथं स्वमार्गणैः।
अथार्धचन्द्रेण च तस्य कार्मुकं प्रदर्शयन्ती निजहस्तलाघवम्

तदीयेति अथ चंडकापि तस्य बाणान् त्रिगुणैः पंचभिः पंच दशभिरित्यर्थः स्वबाणै र्बभंज तस्य संजं रथं च बभंज अथ च अर्धचंद्राकारेणबाणेन तस्य धनुश्चिच्छेद कीदृशी निज हस्तस्य लाघवं चापलं प्रदर्शयंति ॥ ११ ॥

गदां गृहीत्वा स निहन्तु मुत्कटा मथाभिदुद्राव मुमूर्षुरंबिकाम्
तमापतन्तं गदयैव सा क्षिता ऽवपातयन्मूर्ध्नि निहत्य मूर्च्छितम्

गदामिति अथ मत्ताष्कलोऽपि मुमूर्षुर्मरणासन्नः उत्कटां गदां गृहीत्वा अंबिकां निहन्तुं अभिदुद्राव सापि तं आपतन्तं वीक्ष्य गदयैवमूर्ध्नि निहत्य मूर्च्छितम् अं तं क्षितौ अपातयत् ॥ १२ ॥

अथो मुहूर्तात्पुनरुत्थितः श्वसत्
फणीवरोषा द्गदया जघानताम्।
रुषाथ शूलेन शितेन चण्डिका
शिरो विदार्य भुवि तं न्यपातयत्॥ १३॥

अथोइति अथ मूर्च्छानन्तरं स वाष्कलः मुहूर्तमात्रात्पुनः उत्थितः अथ च रोषात् फणीव श्वसन् सन् तां देवीं गदया जघान सा चण्डिकापि क्रोधेन युक्ता तीक्ष्णेन शूलेन शिरो विदार्य तं वाष्कलं भुवि न्यपातयत् १३ ॥

विभग्नपत्त्याश्वरथेभसंकुले रणांगणे नृत्तपिशाचिनीगणे।
स दीर्घनिद्रामपुनर्विबोधिनीं चिरं सिषेवे प्रविकीर्णमूर्धजः॥

विभग्नेति अथ सः वाष्कलः तस्मिन् रणांगणे न विद्यते पुन र्विबोधो जागरो यस्यां तादृशीं दीर्घनिद्रां चिरकालं सिषेवे ममारेत्यर्थः कीदृशः प्रविकीर्णा मूर्धजाः केशा यस्य की॰रणांगणे विभग्नैः संकुले पत्त्यश्वरथेभैः तथा नृत्तः नृत्य॰ युक्तः पिशाचिनीनां गणो यत्र ॥ १४ ॥

समिन्मखेऽस्मिन्प्रथमंहुते मुदा मखाशिनः खेथ जयेतिचुक्रुशुः।
हुतःक्रुधाक्रूरमुखोथदुर्मुखःससंमुखोभूद्युधितां विभर्त्सयत् १५

समिदिति अस्मिन् युद्ध यज्ञे तस्मिन् वाष्कले प्रथमं हुते सति आकाशे स्थिता देवाः मुदा जयजय इति चुक्रुशुः इतश्च तेषां शब्दं श्रुत्वा क्रोधेन क्रूरमुखो यस्य तादृशः सः दुर्मुखः युद्धे तां देवीं विभर्त्सयन्सन् संमुखोऽभूत् १५

स तिष्ट तिष्टे ति वद् न्धनुर्धरो धराधरप्रख्यतनु स्समाययौ ।
शिवापिदध्मौ निजशंखमुच्चकै र्धनुश्चविस्फार्य्यरिपूनकंपयत्

सइति स च पर्वततुल्यशरीरः धनुर्धरः तां प्रति तिष्ट तिष्ठ इति वदन् समाययौ अथ शिवापि निज शंखं उच्चकै र्दध्मौ अथ च धनुः विस्फार्य्य टङ्कारयित्वा रिपून् अकम्पयत् ॥ १६ ॥

अमूमुचद्वृष्टि मसावथैषवीं प्रकुप्यदाशी विषघोरदर्शनां ।
अचूर्णयत्तामचिरेण चण्डिका प्रचण्डकोदण्डविनिस्सृतैःशरैः॥

अमूमुचदिति अथासौ दुर्मुखः ऐषवीं वाणसम्बन्धिनीं वृष्टिं तां प्रति अमूमुचत् कीदृशीं अतिक्रुध्यत्सर्प्यवत् घोरं दर्शनं यस्याः अथ चण्डिकापि अत्युग्रात् निज धनुषः विनिस्सृतैःशरैः तां शरवृष्टिं अचिरेणव अचर्णयत् । १७

परस्परं ता वभिजघ्नतु रुषा
जयेषिणौ हेतिभि रात्तकार्मुकौ
रणावनिः सा सकरं पिपासुभि
र्हता श्वगृध्रादिभि रुल्वणा भवत् ॥ १८ ॥

परस्परमिति इत्थं तौ देवो दुर्मुखौ क्रोधेन परस्परं शस्त्रैः अभिजघ्नत कीदृशौ जयाभिलाषुकौ तथा गृहीतधन्वानौ एवं सति सा रणभूमिः रुधिरप्रवाहं यात् मिच्छुभिः श्वगृध्रादिभि र्हतामतो उल्वणा अतिभयानका अभवत् ॥ १८ ॥

उवाच रोषादथ कालमोहितः सुराहितःपाणिमुदस्यतांप्रति
ऋते यमागारमुपेत्य मां शठे हरिं मृगी वाद्य वद क्व यास्यसि

उवाचेति अथ सः सुरशत्रु र्दुर्मुखः कालेन मोहितः सन् करं उत्चिप्यतां प्रति क्रोधात् उवाच किमुवाचेत्याह हे शठे अद्य मां प्राप यमसंदिरं विना कुत्र यास्यसीति वद कं प्राप्य केवमिव प्राप मृगी च तत्सरस्वती तु प्रतयुत- स्तौति हे ऋते सत्ये अद्य मां यमागारं उपेत्य प्रापयित्वा अन्यस्मिन् क्व कस्मिन् सदृशे शठे युक्ता युक्तविचारशून्ये दैत्ये हरि कालं यास्यसिप्रापयिष्यसि अंतर्भाविण्यर्थोत्र कीदृ॰तुं मृगोविद्यते यस्मिन् स मृगोचंद्र स्ताहृशो वराजमाना

यद्वा मृगाऽन्वेषणे मृगयति दुष्टान् मामतो वा अन्त्रेति वितर्के इति वद यद्वा मृगो वनिता विशेषा वानिपाञ्चितत्वादतिक्रम्य गच्छतीति मृगो वा मृगः पशौ कुरंगे च करि नक्षत्रभेदयोः अन्वेषणायांयाञ्चायां मृगो तु वनितांतरे इति हैमः ॥ १८ ॥

जगाद रुष्टा जगदंबिकापि तं श्ववद्वृथा ते बहुगर्जनै रलम् ।
यथा हतो यं समरेऽमराहित स्तथाधुना त्वा मपि हंतुमुत्सहे

जगादेति अथतत्क्षा जगदंबिकापि रुष्टा सती तं जगाद हे दुष्ट ते तव श्ववत् वृथैव बहुभि गर्जनै रलं साध्याभावात् गर्जनानि न कर्तव्यानीतयर्थ येन प्रकारेण युद्धे अयं देवशत्रु र्वाष्कलः मयाहतः तथैव अधुना त्वामपि हंतं उत्सहे अत्र गमनमानसाधनक्रियापेक्षया गर्जनानां करणत्वात् तृतीया॥२०॥

इदं वदंत्या उपरि क्रुधासुरो रुरोध मार्गं गगनस्य मार्गणैः ।
तदीयरोपानतिकोपितापिसाविधायरोपै स्तिलशस्तुतोदतम् ।

इदमिति इदंवचः वदंत्याः तस्याः उपरि सः असुरः क्रोधेन बाणै गगनस्य मार्गं रुरोध बाण राकाशमाच्छादयामा सेतयर्थःअथ सापितस्य ः बाणान् स्वकीयै र्बाणैः अतिकोपेन तिलशः कृत्वा तं दुर्मुखं विव्याध कलंबमार्गणशराः पत्रोरोप इषुद्वयो रित्यमरः ॥ २१ ॥

ततोस्यकोदंड मखंडयद्दृढं तथा कलंबै रथपंचभीरथम् ॥
सपत्तिरेवात्तविपत्ति रायया गदां गृहीत्वा जगदंबिकां प्रति॥

ततइति तदनंतरं देवी तस्य दृढं धनुः अखंडयत् तथा पंचभिर्बाणैः तस्य रथं अखंडयत् अथ सः दुर्मुखः पत्तिः पदातिरिव भूत्वा आत्ता गृहीता विपत्ति र्येन तादृशः सन् गदां गृहीता देवीं प्रति आययौ ॥ २२ ॥

हतो तिकोपाद्यतेन मस्तके तया स सिंहो न चचाल किंचन
अयोग्रधारेण शिवा त मुष्टिना चकार मूर्छा विधुरं सहासुभिः

अथ तां सिंहमस्तके न्यपातयदित्याह हतइति अथ तेन वाष्कलेन तया गदया अतिकोपात् मस्तके हतोपि सः सिंहः किंचिदपि स्थानात् न च-

चाल अथ शिवापि उग्रधारेण कृपिना खड्गेन प्राणैः सह तं दुर्मुखं मस्तकं नरहितं चकार तस्य मस्तकं छित्वा गतप्राणं चकारेत्यर्थः ॥ २३ ॥

गतेथ तस्मिन्नपि वाष्कलांतिकं
रणे स्रवंती च भटास्रजो स्रवत् ॥
ततो वशिष्टास्त्वविशीर्णविग्रहाः
पलाय्य वृत्तं जगदुर्हयारये ॥ २४ ॥

गतेइति अथ तस्मिन् दुर्मुखेपि यमलोके प्राप्तस्य वाष्कलस्य समीपं गते सति तस्मिन् रणे भटशरीरजन्यस्य असृजो रक्तस्य स्रवंती नदी अस्रवत् अथ ततो मृताः ये अवशिष्टा दैत्याः ते दीर्णशरीराः संतः पलाय्य सर्वं युद्धभवं सैन्यनाशजन्य वृत्तं महिषाय जगदुः ॥ २४ ॥

निशम्य देव्या निधनं गतौ सतौ
समं चमूभिः प्रधने विसिस्मिये ।
अहो परा कालगति र्मनीषिणो
वदंत्वतः किं नु विधेय मद्यमे ॥ २५ ॥

निशम्येति सः महिषः तौ दुर्मुखवाष्कलौ सेनाभिःसह युद्धे देव्या कृत्वा नाशं प्राप्तौ तेषां मुखात् श्रुत्वा विस्मयं प्राप किमितयाह अहो आश्चर्यं कालस्य गतिः परास्ति अवला यन्महाशूरान्निहंतीति भावः इतउक्त्वा मंत्रिणः पृच्छति हे मनीषिणः अतः परं मयाद्य किं विधेय मिति वदंतु ॥ २५ ॥

स चिक्षुराक्षेण वदन्नथेतिराडवादि सेनापतिनाकिमीशितः ।
भयंसमुत्थंमयिजीवतिस्त्रियाहतां हि तां विद्धि रणेधुनामया ॥

सइति इत्येवं वदन् सः राट् राजा महिषः अथ चिक्षुराक्षेण सेनापतिना अवादि कथितः हे ईश मयि जीवति सति स्त्रियाः सकात् भयं किमर्थं समुत्थं स्वशौर्यं दर्शयति अधुना रणे मया तां हता मेव जानीहि ॥ २६ ॥

स इत्य मुक्त्वा नृपते र्निदेशतो जगाम तामेंणि समं चमूवृतः ।
ददर्श तां स्मेरमुखीं स्मरप्रसू मनन्यसाधारणशक्तिशालिनीं२७

स इति सः चिक्षुराक्षः इत्थं मुक्त्वा मन्त्रिवसरान्नाया तात्त्वेण पार्ष्णिपाल-कैन सह समावृतो जगाम अथ गत्वा तां स्मेरमुखीं ददर्श कीदृशीं स्मरस्य प्रसूं मातरं लक्ष्मीत्वात् यद्वा दर्शनेनैव स्मरं प्रसूते जनयतीति तां अथ अन-न्यसाधारणशक्तिमतीं अनुपमपराक्रमामित्यर्थः ॥ २७ ॥

अवादय च्छंख मुदीक्ष्य तं च सा
चकार टंकार मपि सुधन्वनः ।
तदीयभीत्या स्व भटा दिशो द्रव
न्कथं चि दाश्वास्य सता नुवाच ताम् ॥ २८ ॥

अवादयदिति अथ सा देवी तं चिक्षुराक्षं वीक्ष्य शंखं अवादयत् तथा स्वधन्वनः टंकारमपि चकार तेषां शब्दजन्यभीत्या अस्य चिक्षुराख्यस्य भटा दिशः प्रति अद्रुवन् पलायिता बभूवुः अथ सः चिक्षुराक्षः तान् त्रस्तान् स्वभ-टान् कथंचित् महता यत्नेन आश्वास्य किं स्त्रिया बिभीयेति तत्र स्थापयित्वा तां देवीं उवाच ॥ २८ ॥

बिभेमि नो कातरव त्वदारवै
रवैहि भीतं त्वघटा द्वधूवधात् ॥
विभासि मूढेव बिभर्षि या शरा
न्धनुः कटाक्षे ष्वपि स त्स्वपि भ्रुवोः ॥ २९ ॥

बिभेमीति हे देवि एभिः त्वदीयैः आरवैः शब्दैः इतरकातरवत् न बिभेमि न बिभेमि तर्हि युद्धं कुर्वितश्चाह परंतु पापप्रदात् स्त्रीवधात् मां भीतं जानीहि वधूवत्न्यां स्नुषा नार्योः स्त्रिया सारिवयो रपीति हैमः स्त्रीवध पापं दुष्प्रतीकारं मत्वैव त्वया युद्धं न करोमीत्यर्थः अथ स्ववशीकरणाय तां व्याजेन स्तौति हे देवि त्वं मूढेव मां विभासि तत्र हेतुः या त्वं कटाक्षेषु सत्सु तथा भ्रुवोरपि सतोः एतान् शरान् धनुश्च बिभर्षि तव भ्रूकटाक्षयोरे-व निखिलजनहननपर्याप्तत्वे धनुर्बाणग्रहणं व्यर्थमेवेति भावः ॥ २९ ॥

अहो विमूढैः कविभिः प्रकल्पितं दिवेर्थवादैकपरै रिदं कथम्
समीहसे वा त्रिदिवं परेत्य चे न्न चे हसे नेन बहू निहैवतान्

स्यादेतत् परंतु एतयो र्भ्रूकटाक्षरूपयो र्धनुर्बाणयोः क्षेपणं नरकसाधनं एतयो र्धनुर्बाणयोर्युद्धे प्रति भटं प्रति क्षेपणं स्वर्गसाधन मिति भेद इति तदाशयं बुद्ध्वा अहो आश्चर्यं अति मूढैःकविभिः हतो वा प्राप्स्यसि स्वर्ग मित्या-द्यर्थवादवचनैकतत्परैः इदं युद्धं स्वर्गाय प्रकल्पितं अर्थवादमात्रमेवैतत् नतु वस्तुत इत्यर्थः स्यादेतत् अथापि तव न युक्तमित्याह अथ त्वं चेद्यदि परेत्य प्राणां स्त्यक्त्वा परलोकं प्राप्य एकमेव स्वर्गं कांक्षसे अथ च इहैव लोके जीवंत्येव अनेन महिषेण बहून् तान् स्वर्गान् किं न कांक्षसे मृत्वा सत्ये कस्यैव स्वर्गस्य प्राप्ते रपि संशये जीवति च बहु स्वर्गप्राप्ते निश्चये चात्र तारतम्यं त्वयैव विवेचनीय मिति भावः ॥ २० ॥

कृतं त्वया गोप्य धुना क्षमिष्यते प्रभु र्महासंचिचमूवधोद्भवम्
निसर्ग एषेष महात्मनां सदा स्मरंति नो हि श्रयतां महागसः

ननु तस्य त्रिवधरूपमपराधं कृत्वा कथमस्य साम्युक्त मित्यतआह कृत मिति सः प्रभु र्महिषः महासंचियाः सेनायाश्च वधादुत्थितं त्वया कृतमपरा-धमपि अधुना त्वया श्रिते सति क्षमिष्यते ननु कोपं करिष्यतीत्यर्थः कुतः हि यतः महात्मनां एष स्वभाव एव सदा अस्ति यतः श्रयतां जनानां महागसः महापराधस्य न स्मरंति. स्मृति योगे षष्ठी आगो पराधोमंतुश्चे-त्यमरः ॥ २१ ॥

इयं त्रिलोक्य प्यधिपे श्रिते त्वया
विहाय सापत्न्य मिहा नुगैवते।
अथापि सम्राड्भविता त्वदात्मजो
रणं करिष्यत्यरिभि स्स एवहि ॥ २२ ॥

नन्वत्र सापत्न्यं चेत्सहिं नरकादपि महत्कष्टमितात आह इयमिति हे देवि त्वया त्रिलोक्या अधिपे महिषे श्रिते सति इयं त्रिलोक्यपि सापत्न्यं

विहाय इह तव अनुगा किंकरीव भविष्यति अचेतनया अपि त्रिलोक्या साप-
त्नो त्वम् तर्हि अन्यासां स चेतनानां किं वक्तव्यमिति भावः तथापि युद्धे एव
ममाभिलाषास्तीति चेदत आह अथानंतरं तस्मिन् स्थिते सति तव पुत्र समा
चक्रवर्ती भविष्यति स एव हि शत्रुभिः सह युद्धं करिष्यति तत् फलं तु त्वय्ये
वेत्यर्थः एतदेव युक्तं भविष्यति नतु तव युद्धं युक्त मिति भावः ॥ ३२ ॥

इति ब्रुवंतं त मुवाच चंडिका जड़ा भवंतो पि जड़े सतीश्वरे
विनिश्चिता वो वहुवाचि शूरता रणेतु दृष्टैव भवादृशा मिह

इतीति इत्येवं ब्रुवंतं तं चिक्षुराख्यं सा चंडिका उवाच हे मंत्रिन् भवतां
ईश्वरे महिषे जडे युक्तायुक्तविवेकरहिते सति भवंतो यूय मपि जडा एव म-
या निश्चिताः कामधेनु खरयो रिव संगस्य वैषम्यादिति पुर्वतो वोध्यम्
अथ तस्य युद्धरभसाय सर्वेषां कातरत्वं सूचयं त्याक्षिपति वः युष्माकं स्ववत्
वहुवाचि एव शूरता मया विनिश्चिता किं युद्धे नास्तीत्यतआह युद्धे तु दृष्टैव
मया भवादृशां युष्मत्सदृशानां दुर्मुखादीनां दृष्टैव यादृशो शूरतास्ति इ-
त्याक्षेपः ॥ ३३ ॥

तव प्रभो र्वा पि जिजीविषास्ति च
त्तथेतरेषां तदधो हि गम्यताम् ।
वलावलेपो प्य थ कश्चना स्ति चे
द्दलं विलंवेन वलं वलंव्यताम् ॥ ३४ ॥

तवेति तव चिक्षुराख्यस्य प्रभोर्महिषस्य चापि तथा इतरेषामपि भटानां
यदि जीवितु मिच्छास्ति तर्हि अधः पाताल एव सर्वैः गम्यतां अथ चेत् वो
हृदि कश्चन वलस्य अवलेपो गर्वोस्ति तर्हि विलंवेन अलं विलंवो न कार्यः
स्वकीयं वलमेवावलंव्यतां आश्रीयतां ॥ ३४ ॥

इतिब्रुवाणा मभित स्ततान तां
स वाणसंतानलतान मुग्रदृक् ।
शिवा विभेदाशु तदाशुगांश्च तं
चिरं तयो रित्थमभूद्रणोद्भुतः ॥ ३५ ॥

इतीति स उग्रहक् चिक्षुराख्यः एवं ब्रुवाणां तां देवीं अभितःसर्वतः बाणा-नां संतानस्य पारंपर्यस्य वितानं उल्लोचं ततान विस्तारयामास अथ श्रियापि शीघ्रं तस्य बाणान् तं चिक्षुराख्यं च विभेदइत्थं परस्परं घातं प्रति घातैरेव प्रत्यक्षैव तयोःरणः चिरकालं अद्भुतः अभूत् अस्त्रोवितान मुल्लोच इत्यमरः ३५

त मेन मेनस्विन मुज्झित व्यथा
व्यधान् मृधे सा गदया विचेतनं ।
अथाभ्यगात्तां बलपार्ष्णिपालको
रुषा स ताम्रोप्यतिताम्रलोचनः ॥ ३६ ॥

तमिति तं एनं एनस्विनं पापिनं चिक्षुराख्यं सा त्यक्तपीडा भगवती युद्धे गदया विचेतनं मूर्च्छितं व्यधात् अकृत अथानन्तरं बलस्य पार्ष्णिपालकः पृ-ष्ठरक्षकः सः ताम्रोपि तां प्रति अभ्यगात् कीदृशः क्रोधेन अतिशयेन ताम्रे रक्ते लोचने यस्य ॥ ३६ ॥

समागतं तं तु समीक्ष्य चण्डिका
विहस्य सोत्प्रास मुवाच तद्रुषे ।
अहो किमर्थं महिषो रणेन वो
वृथाजिघांस त्यथ कीटसन्निभान् ॥ ३७ ॥

समागतमिति सा चण्डिकापि तं ताम्रं समागतं वीक्ष्य तस्य रोषाय सोत्प्रासं साक्षेपं यथा स्यात्तथा विहस्य उवाच अहो आश्चर्ये सःमहिषःवःयुष्मान् कीटतुल्यान् अत्र युद्धे प्रेषयित्वा किमर्थं वृथा हन्तुमिच्छति इत्याक्षेपः ॥ ३७

ममापि युष्मन्निधने मुधा श्रमः
शशा न्निहत्ये व हरे स्त्रपाकरः ।
गृहे स तिष्ठन् प्रकरोति किं पशु
र्मयि स्थितायां युधि जीवनोद्यमम् ॥ ३८ ॥

ममेति किं च युष्माकं कीटतुल्यानां हनने ममापि श्रमः मुधा व्यर्थ एव प्रत्युतत्रपाकरः लज्जाप्रदः कान् निहत्य कस्येव शशान् निहत्य करिनिकर

निहन्तुः सिंहस्येव अथ सः पशुमहिषः मयि युद्धे स्थितायां सत्यां गृहे तिष्ठन् सन् किं जीवनस्य उद्यमं प्रकरोति युष्मान् प्रेषयित्वा जिघांसति स्वयं च जीवितु मिच्छति इत्याशयं तेनैव मम युद्धमुचितं न भवद्भिरिति ध्वनितम् ८३

तथेति रोषा त्स भृशं तिरस्कृतो मुमोच नाराचपरंपरांपराम्
लुलाव लोकेश्यपि लीलयैवतांविकृष्यकर्णान्तमुरु शरासनम्॥

तथेति इति तया रोषात् अत्यर्थं तिरस्कृतः सः ताम्रः परां उत्कृष्टां नाराचानां लोहमयबाणानां परंपरां तां प्रति मुमोच सा लोकेशी देव्यपि लीलयैव तां लुलाव चिच्छेद किं कृत्वा उरु महांतं शरासनं कर्णपर्य्यन्तं विकृष्य प्रक्ष्वेडनास्तु नाराचा इत्यमरः ॥ ३९ ॥

सचिक्षुराख्योपि विहायमूर्छतां मुहूर्तमात्रात्पुनरुत्थितो जवात्
उभावपीमांयुगपन्नि जघ्नतु र्घनाविवौर्वं निजशीकरैः शरैः ४०

सइति अथ सः चिक्षुराख्योपि मुहूर्तमात्रात् मूर्च्छततां विहाय पुनर्जवात् उत्थितः अथ उभावपि चिक्षुराख्यताम्रौ इमां देवीं युगपत् शरैः निजघ्नतुः तथापि किंचित्कर्तुं न शेकतु रिति दर्शयितुं दृष्टान्त माह निज शीकरैः अम्बुकणैः औवं वडवानलं मेघाविव मूर्च्छामूर्तमूर्च्छितावित्यमरः ॥ ४० ॥

रुषाहिषोन्येप्यथ दष्ट दच्छदाः शरानहं पूर्विकिताः प्रचिक्षिपुः
तयापि सर्वेप्यथ तेक्षतावभुर्यथावसंते परिफुल्लकिंशुकाः ४१

न केवलं तावेव तां जघ्नतुः किंत्वन्येपीत्याह रुषेति अन्येपि असुराः तां प्रति क्रोधेन शरान् प्रचिक्षिपुः कीदृशाः दष्टादच्छदाः ओष्टायैः तथा अहं पूर्वं स्यामहं पूर्वंस्यामिति योधानां धावन क्रिया अहं पूर्विका सा जाता येषां ते तया देव्यापि ते सर्वेपि युधिशरैः क्षताः संतः वभुः कथं यथा वसन्त समये परिफुल्लाः किंशुका भान्ति अहं पूर्वमहं पूर्व मित्यहं पूर्विकास्त्रिया मित्यमरः ॥ ४१ ॥

अभिद्रुतां स्तानथ वीक्ष्य ताम्रहपुषा स नाम्नो मुशलंदृढंकरे।
निधायसिंहस्य शिरसा ताडयन्मुहु र्वलीवर्दसमंननर्द च ४२

अभि द्रुतानिति अथ तान् सैनिकान् अभिद्रुतान् पलायिनात् वीक्ष्य क्रोधेन रक्तदृष्टिः सः ताम्रः दृढं मुसलं करे गृहीत्वा सिंहस्य शिरसि अताडयत् पुनश्च बली वर्दस्य समं तुल्यं यथा भवति तथा ननर्द शब्दं कृतवान् ॥ ४२ ॥

तया स नर्दन् हि महासिना
लसत्किरीटभाजा शिरसा वियोजितः ।
कवंध मप्यस्य दुरात्मनो मना
ग्विनृत्य भूमौ निपपात दारुवत् ॥ ४३ ॥

तयेति तया देव्या सः ताम्रः शब्दं कुर्वन्नेव महा खड्गेन कृत्वा लसत्किरीटभाजा शिरसा वियोजितः शिरो हीनः कृत इत्यर्थः अथ शिरसि छिन्ने अस्य दुरात्मनः ताम्रस्य कवंधमपि मनाक् किंचित्कालं विनृत्य दारुवत् भूमौ निपपात ॥ ४३ ॥

स चिक्षुराख्यो पि समीक्ष्य चुक्षुभे
क्षितौ क्षतं तं गतमंतकक्षयम् ।
अथा सि मुद्यम्य निहंतु मुद्यतो
हरिप्रियां नाग इवाभ्यगादिमाम् ॥ ४४ ॥

स इति अथ सः चिक्षुराख्योपि तं ताम्रं क्षितौक्षतं संतं यमनिवासं प्रतिगतं समीक्ष्य चुक्षुभे क्षोभं प्राप्तवान् अथानन्तरं खड्गं उद्यम्य हरिप्रियां महालक्ष्मीं निहन्तुं उद्यतः सन् अभ्यगात् कां क इव हरेः सिंहस्य प्रियां सिंहनीं हन्तुं नागः गज इव ॥ ४४ ॥

शिवापि संधाय तदीयपंचता
मचीक्लृपद्धन्वनि पंच सायकान् ।
कृपाण मेको द्वितयं तु सक्थिनी
चकर्त तेषु द्वय मस्य मस्तकम् ॥ ४५ ॥

शिवेति ततः शिवापि धन्वनि पंचमितान् सायकान् संधाय तस्य चिक्षुराख्यस्य पंचतां कालधर्मं मृत्युमिति यावत् अचीक्लृपत कल्पयामास

तेषां पंचानां तदंगच्छेदने विभागमाह तेषु पंचस्ववाणेषु एकः तस्य कृपाणं यं खड्गमुद्यम्यागतः तं खड्गं चकर्त चिच्छेद द्वितयं इयं तस्य सक्थनी ऊरू चिच्छेद तथा इयं तु तस्य मस्तकं चिच्छेद स्वात्यंचता कालधर्मा दिष्टांतः प्रलयोत्ययः अन्तो नाशो इयोर्मृत्यु रित्यमरः ॥ ४५ ॥

अथेत्थ मीश्याह तयो स्तयो स्तया
चमूः प्रमीतः प्रमिता सृगुद्दहा।
विलप्य हाहेत्यपरे परेतरा
यम खादिवा सूनवधृत्य दुद्रुवुः ॥ ४६ ॥

अथेति इत्थं तया ईश्याहतयोः तयो दैत्ययोः सेना रक्तमुद्दहन्ती अप्रमिता असंख्याता प्रमीता मृता ततः अपरे अवशिष्टास्तु हाहेति विलप्य यममुखादिव प्राणान् गृहीत्वा दुद्रुवुः ॥ ४६ ॥

निशम्य तावप्यजया हतौ प्रभु
र्भयद्रुतै र्गद्गदया गिरोदितौ।
रुषासिलोमान मथा दिशद्युधे
तथा विडालाच्च मतीव दुःखितः ॥ ४७ ॥

निशम्येति सः प्रभु र्महिषः तावपि ताम्र चिचुराख्यौ अजया देव्या हतौ श्रुत्वाकोद्दशौ भयद्रुतै र्भटैः गद्गदया गिरा उदितौ कथितौ अथ अतीव दुःखितः सन् क्रोधेन असिलोमानं तथा विडालाचं युध युद्धाय आदिशत् ॥ ४७ ॥

उदीर्य तावोमिति भर्तृ, रग्रतो
गतौ स्थिता यत्र मृतिश्च रद्विषाम्।
अथाग्रणीभूय भयातिविह्वलो गिरा
सिलोमा श्लथया जगाद ताम् ॥ ४८ ॥

उदीर्येति तावपि स्वामिनोग्रे ॐांसंगीकृत मित्युक्त्वा यत्र स्थाने दैत्यानर मृतिरूपा देवी स्थिता तत्र गतौ अथ गत्वा तयो र्मध्ये असिलोमैव अग्रणीभूयां भयेनाति विह्वलः सन् श्लथया गिरा तां जगाद ॥ ४८ ॥

निहंसि नः कस्य कृते निरागसो
विभेषि न त्वं परतापजादघात्।
ददामि ते वांछसि चेद्धनादिकं
विधाय संधिं तदपेहि भामिनि ॥ ४६ ॥

किमित्यतआह निहंसीतिहे भामिनि कोपविशिष्टसौंदर्यवति अस्मान् निरपराधान् दैत्यान् कस्य कृते निहंसि ननु कोत्र दोष इत्यतआह त्वं परेषां तापदानजन्यात् पापात् न विभेषि इतिकाकुःन हिंस्यात्सर्वाभूतानीति श्रुतेः कोपि न हंतव्य इत्यर्थः अथ चेत् अस्मान् हत्वा धनादिकं वांछसि तर्हि किं हननेन तत् धनादिकं स्वयमेव यावत् वांछसि तावत् तुभ्यं ददामि तत्तस्मात् अस्माभिः संधिं विधाय यथेष्टं देशं अपेहि याहि सुंदरी रमणी रामा कोपनासैव भामिनी त्यमरः ॥ ४६ ॥

तथा भिधेयं सुधिया यथा सुखं
न चार्थसिद्धावपि दुःख मुद्भवेत् ॥
अहो विचारः कतर स्त्वया कृतः
स्वयं यतःक्रीत मपार्थ मेव तत् ॥ ५० ॥

तथेति हे देवि सुधिया जनेन तथा कार्यं यथा सुखं उद्भवेत् अथ च यथा अर्थसिद्धावपि सत्यां दुःखं न उद्भवेत् अहो आश्चर्ये त्वया कतरः विचारः कृतः अर्थमेव तत् दुःखं स्वयं क्रीतं गृहीत मित्यर्थः ॥ ५० ॥

वयः सुरूपं द्रविणं च भंगुरं
विचार्य कार्यं सुख मेव यद्भवत्
शिरीषपुष्पा दपि ते मृदु स्तनु
र्विकर्त्यते स्त्रै रिति मेऽति विस्मयः ॥ ५१ ॥

वयइति हे देवि वयः आयुः सुरूपं सौंदर्यं द्रविणं धनं च भंगुरं विचार्य सुधिया सुखमेव यथा भवेत् तथा कार्यं अथ मया किं दुःखं गृहीत मित्यत आह हे देवि शिरीषस्य पुष्पादपि कोमला तव तनुः त्वया स्वयं अस्त्रैः विकर्त्यते इत्ययं मम अति विस्मयोस्ति ॥ ५१ ॥

उवाच चैनं प्रति चंडिकापि गां
न मे विनार्थं श्रम एष दुर्मते ।
सदा हि लोके विचरामि देहिनां
समीक्षितुं न्याय मथेतरत्स्वयं ॥ ५२ ॥

उवाचेति अथैनं प्रति चंडिकापि गां वाचं उवाच हे दुर्मते एषा मम श्रमः अर्थं विना नास्ति किंतु सफल एवेत्यर्थः हि यत इह लोके देहिनां जीवानां न्यायं इतरत् अन्यायं च समीक्षितुं अहं सदैव विचरामि ना धुनैवेत्यर्थः गौः सौरभयो इग्वाणवाग्भूष्वप्सु च भूम्नि चेति विश्वमेदिन्यौ ५२

न मे ऽस्ति सख्यं न च वैरता क्वचि-
द्दधामि साधूनितरान् वधाम्यहं ।
असाधुमेनं महिषं निहन्मि तत्
ससंधि मिच्छेद्यदिगच्छतु ह्यधः ॥ ५३ ॥

अथ न्यायान्यायं पश्यंती किं करोषीत्यतआह नेति तत्र साधून् सदाचरणशीलान् अहं दधामि अनुगृह्णामि इतरान् असाधून् वधामि एवं सति वैषम्यापत्ति रित्यतआह तत्र निग्रहानुग्रहयोः मम धर्मदंडभृतो भूपते रिव सख्यं तथा वैरता क्वचिदपि नास्ति लोकशासनायैवैष प्रयासोस्तीति भावः सामान्यत उक्त्वा लक्ष्ये यो जयति तत्तस्मात् एनं असाधुं महिषं स्वव्रत पालनार्थं निहन्मि स चेत् मया संधि मिच्छेत् तर्हि अधः पातालं गच्छतु अन्यथा हन्मि वेत्यर्थः ॥ ५३ ॥

तदुक्त माकर्ण्य दुरत्ययं विधिं
वधार्य मर्तुं युधि तौ वधोद्यतौ
मुमोच सप्ताथ शरान्विडालह
तयाथ विद्ध स्त्रिभि रुज्झता वसून् ॥ ५४ ॥

तदिति अथ तौ दैत्यौ तस्या उक्तं श्रुत्वा स्वदैवं च दुरत्ययं हृदि अवधार्य युद्धे मर्तुं उद्यतौ अभूतां विडालाक्षः तां प्रति सप्तशरान् मुमोच अथ तयोः देव्या त्रिभिः शरैर्विद्धः प्राणान् तत्याज ॥ ५४ ॥

अथा सिलोमेतिजगाद तां शिवे
वनिश्चितं नः सकलान् हनिष्यसि ।
तथा प्यधीनो स्मिदुरात्मनः प्रभोः
समिन्मखे वीरतया जुहो म्यसून् ॥ ५५ ॥

तथेति तस्मिन् मृते सति असिलोमा तां प्रति पुनर्जगाद हे शिवे एतत् मया विनिश्चितं अस्मान् सकलानपि त्वं हनिष्यसि इति ज्ञात्वापि स्वप्राण रक्षार्थं किं न पलायसे इत्यतआह तथा प्येवं सत्यपि दुरात्मनः प्रभो र्महिषस्य अहं अधीनोस्मि पलायिते सति सः स्वयं हनिष्यतीति भावः अतो ऽस्मिन् युद्ध यज्ञे वीरधर्ममेवाश्रित्य प्राणान् जुहोमि तत्र मरणाद्युद्धे मरणं वर मित्यर्थः तदुक्तं यत्र दूते मृति र्नूनं युद्धे जीवितसंशयः तमेव कालं युद्धस्य प्रवदन्ति मनीषिण इति ॥ ५५ ॥

स इत्य मुक्त्वा विशिखान् शिखि प्रभा
तथा क्षिपत्साापि चखान तान् क्षणात् ।
शरे रनीशेन तु योद्धुमंबया
गदा थ गुर्वी जगृहे सुरद्विषा ॥ ५६ ॥

सइति अथ स दैत्यः इत्युक्त्वा अग्निप्रभान् वाणान् अक्षिपत् सा शिवापि तान् क्षणात् चिच्छेद अथ देव्या सह शरे र्युद्धं कर्तुं असमर्थेन तेन दैत्येन गुर्वी गदा जगृहे गृहीता ॥ ५६ ॥

अताडय त्केसरिणः शिरो भृशं
स दुर्मति र्दुःसहपातया तया
विधूय सिंहोपि शिरोमना ग्व्यथं
ददार शत्रोः करजै र्भुजान्तरम् ॥ ५७ ॥

अताडय दिति सः दुर्मतिः दुःसहः पातो यस्या स्तया गदया सिंहस्य शिरः भृत्यर्थं अताडयत् सः सिंहोपि तत्पातात् ईषत् जाता पीडा यस्मिन् तादृशं शिरो विधूय कंपयित्वा तस्य शत्रो र्भुजांतरं वक्षः स्थलं करजै र्नखै र्ददार ॥५७॥

अथो समुत्प्लुत्य स सिंहमस्तके
निधाय पादा वतिचित्रमाचरन् ।
अदात्प्रहारं शिरसि श्रियो भृशं
महागदाया: प्रलयानलश्रिय: ॥ ५८ ॥

अथेति अथ स: समुत्प्लुत्य सिंहस्य मस्तके पादौ निधाय इत्यति चित्रं कर्म आचरन् श्रिय: महालक्ष्म्या: शिरसि तस्या महागदाया: प्रहारं अदात् कोदृश्या: प्रलयाग्नितुल्यप्रभाया: श्रिय इतो पुंस्त्वादभावपक्षे षष्ठीरूपं ॥ ५८

प्रवंचयित्वा खलु चंडिकापि तां
समापतंतीं श्रितलाघवक्रिया ।
तदुत्तमांगं गिरिशृङ्ग मुच्छ्रितं
सितासि नेन्द्रो शनिनेवसाच्छिनत् ॥ ५९ ॥

प्रवंचयित्वेति चंडिकापि श्रिता लाघवस्य चापलस्य क्रिया ययातां समापतंतीं गदां प्रवंचयित्वा छलयित्वा तस्य असिलोम्न: उत्तमांगं शिर:असिना अच्छिनत् केन कं क इव अशनिना वज्रेण उच्छ्रितं गिरिशृङ्गं इन्द्र इव अपासु रिति स: गतप्राणोपि रणे वहूनां जीवानां गतप्राणतां कल्पयन् सन् पपात, भूमाविति शेष: निर्नायकसैन्ये देव्या: प्रयासे व्यर्थ इति मत्वा सिंहो युयुधे इत्याह अथ अपरे सैनिका: रणांगणे सिंहेन मृगसमूहा इव वेगेन हता: ॥ ६० ॥

अपासु रेवा सुभृता मयासुतां
रणे वहूनां स पपात कल्पयन् ।
अथा परे केसरिणा रणांगने
कुरङ्ग सङ्घा इव रंहसा हता: ॥ ६० ॥

केषामिति स: सिंह: अत्युत्कटात् अपरो द्वितीय: विष्णोर्नृसिंहावतार इव तस्मिन् समरे चचार किं कुर्वन् केषांचित् रक्षसां नखै: शिरांसि दलयन्

केषांचित्कोष्टानि उदरमध्यानि विस्फोटयन् अन्यांश्च क्रोधेन रक्तया दृष्ट्यैव श्रवयन् श्रवीकर्वन् परांश्च नादैरेव मूर्छयन् परांश्च भ्रमणवेगेनैव भुवि निपातयन् परेषां च रक्तं पिबन् तथा उग्राःसटाधुन्वन् कंपयन्नन् ॥ ६१ ॥

निश्श्वासा ममुचे श्रमातिचपलान्योन्युध्यमाना
शिवा ते तत्राशु सहस्रशोथ शतशः प्रादुर्बभूवु र्गणाः ।
ते वै पट्टिशभिंदिपालपरिघैर्यूथं ममंथु र्द्विषां
केचिच्छंखमृदंगवादनपरा भ्रेमु श्च वात्या इव ॥ ६२ ॥

निःश्वासानिति अथ सा युध्यमाना शिवा यान् श्रमेण अति चपलान् निःश्वासा एव तत्र युद्धे सहस्रशः शतशश्च गणाः प्रादुर्बभूवुः अथैषां कृत्यमाह ते वै गणाः पट्टिशाद्यैः शस्त्र विशेषैः शत्रूणां यूथं ममंथुः तेषां मध्ये केचित्तु शंख मृगङ्गवादनपरा आसन् अपरे तत्र वात्या इव भ्रेमुः ॥ ६२ ॥

आहूताः पूतिगंधं दिशि दिशि वहता गंधवाहेन वद्धा
मांसादिप्राज्यभोज्यां प्रति पितृवसतिं स्निग्धरक्तप्रवाहम् ।
तत्तज्जग्ध्वा च पीत्वा तुलमुद मभजन् प्राप्य पर्याप्तिमुच्चै
र्जन्येजन्या इवोग्रे वृकशुनकशिवाध्वांक्षगृध्रादिसंघाः ६३

आहूता इति अथ तस्मिन् जन्ये विवाहेऽस्तत्र प्रश्ने युद्धे वृकादीनां मांसाशिनां संघाः तत्तत् मांसं रुधिरं च जग्ध्वा भक्षयित्वा पीत्वा च उच्चैःपर्याप्तिं तृप्तिं प्राप्य जन्या इव विवाहे वरस्य स्निग्धा इव अतुलां मुदमभजन् कीदृशाः दिशि दिशि पूतिगन्धं दुर्गंधं वहता गन्धवाहेन वायुना वद्धेव तां पितृवसतिं श्मशानभूमिं प्रति आहूताः कीदृशीं मांसादिकं प्राज्यं बहुलं भोज्यं यस्यां तथा स्निग्धः रक्तप्रवाहो यस्यां अथ च जन्या अपि विवाहकाले केनचित् दिशि दिशि प्रासवता जनेन वर पितुः वद्धा स्नुषायाः पितु र्वसतिं निवासंप्रति आहूता भवन्ति तत्र वसतौ च मांसादिकमपि प्राज्यं भोज्यं भवति तथा स्निग्धानां रक्तवर्णानां च वस्तूनां प्रवाह इव इति सवकर्म योर्यान्तरध्वनिः जन्यं क्रुदे परिवादे संग्रामे च नपुंसकं वरस्निग्धे पुमानिति मेदिनी ॥ ६३ ॥

अगाधस्यानेकप्रतिहतमहानेकपगिरे
र्मृतामर्त्यारीन्द्रप्रकरविकिरन्मौक्तिमणेः।
विशेषो नैवासौ त्वमरजलधे श्चापि जलधेः
परंत्वस्मिन् प्रायो रुधिर मितरस्मिंस्तु सलिलम्। ६४

अगाधस्येति तदानीं तस्य समररूपस्य जलधेः जलधेश्च विशेषः भेदो नैवासीत् निर्विशेषतामेव दर्शयति कीदृशस्य तस्य तस्य च अगाधस्य अतुलस्पर्शस्य तथा अनेके प्रति हता ये महान्तः अनेकपाः गजाः तएव गिरयो यत्र समुद्रे हि मैनाकादयो गिरयो निवसन्ति तथा मृतदैत्येंद्रसमूहेभ्यः विकिरन्त मौक्तिकामणयश्च यस्मिन् तस्य इदानीं किंचिद्विशेषमप्याह परन्तु एतावान् विशेषोस्ति अस्मिन्समरजलधौ प्रायो बाहुल्येन रुधिरमस्ति इतरस्मिन् जलधौ तु जलमस्ति व्यतिरेकालङ्कारः अनेकपो गजो नागो इत्यमरः ॥ ६४ ॥

ननृतु रप्सरसां सरसं गणा अपरुषं पुरुकिंपुरुषाजगुः।
सुमनसः सुमनश्च यवर्षिणो मुमुदिरेषु तदा स्थिता ॥ ६५॥

ननृतुरिति अथ तेषु सर्वेषु हतेषु सत्सुदैत्येषु मेघेषु स्थिताः अप्सरसां उर्वश्यादीनां गणाः सरसं यथा स्यात्तथा ननृतुः तथा पुरवो बहवः किंपुरुषाः किन्नराः अपरुषं कोमलं यथा स्यात्तथा जगुः तथा पुष्पसमूहवर्षणशीलाःदेवा मुमुदिरे मोदं प्राप्ताः अत्र यमकानुप्रासयोः शब्दालङ्कारयोः संसृष्टिः ॥ ६५।

श्रीमाञ्शंभो स्सरणसदनीभूतहृत्कम्बुनाथो
लक्ष्मीनाथं ष्टविपरिमृढं देशिको सूतयं मां।
तेनो क्लीते महिष निधने गीतलक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति मगमत्सर्ग एषोपि षष्ठः ॥ ७०॥

श्री मानितयादि पूर्ववत् ॥ ६६ ॥

इति श्रीलक्ष्मीकाव्ये महिषसंचिमंत्रचिन्तनं नाम षष्ठः सर्गः ६

इति श्री लक्ष्मीकाव्यव्याख्यायां षष्ठः सर्गः ॥ ६ ॥

ओं नमो विघ्नहर्त्रे बहुशो निहत्य युधि
देवरिपून् श्रमकर्षिता मृदुतनुस्त्व दलम्।
इति मन्यमान इव भानु रथो
चरमाचलं समवलं वितवान्॥ १ ॥

ओं नमो विघ्नहर्त्रे अस्मिन् सर्गे पुंरूपं भूतो महिषस्य श्रीमच्छालद्भया सह संलापो वर्णयिष्यते तत्र तत्सैन्यहननपूर्वकं युद्धोपरमे वर्ण्यमाने तस्य संध्यामेव संभवा तस्मात्प्रसंगिकं संध्यासमयमेव तावद्वर्णयति बहुश इति अथ तत्सैन्यवधानन्तरं भानुःसूर्य्यःइति मन्यमान इव चरमाचलं अस्तपर्वतं समवलं वितवान् इति किं इयं मृदुतनुः भगवती युधि बहुशः दैत्यान् निहत्य श्रमेण कर्षिता जातेति मन्ये तत्तस्मात् अलं युद्धोपरमोस्त्वो त्यर्थः धर्मयुद्धस्य यावत् सूर्य्यमेवौचित्यात् मयि अस्तङ्गते युद्धोपरमादस्याः श्रम शांति भविष्यतीति भावः अस्मिन् सर्गे प्रमिताक्षरा वृत्तम् प्रमिताक्षरासजससै रुदितेति लक्ष-णात् ॥ १ ॥

दिवसे महामृध मदृष्टचरं तदुदीक्ष्यजातपुरुवीररसः।
अपि रोदसी विदधदात्मनिभे अथ शोणिमान मभजत्सरुषा।

दिवसइति अथास्ताचलगासन्नः सः सूर्य्यः रुषेव शोणिमानं रक्तता मभ-जत् किंकुर्वन् रोदसी द्यावाभूमी अपि आत्मनि भेरक्ते एव विदधत् रोषहे तावप्युत्प्रेक्षते कौ० सूर्य्यः संपूर्णे दिने पूर्वं कदाचिदपि न दृष्टं महायुद्धं वीक्ष्यजातः-पुरुवीर रसो यस्य तादृश इव सन् अन्योपि शूरः युद्धं प्रेक्ष्य जात-वीररसः सन् रुषा रक्ततां भजते ॥ २ ॥

अनुरागितां वरविसृष्ट रथो करपातनं च महसां विरहः।
अनुभूयते स्म रविणापि दशा खलु वारुणीसमवगूहनजा ॥३॥

अन्विति अपीति निश्चये तेन रविणा वारुण्याः पश्चिमदिशायाः सम-वगूहनात् संगात् जाता दशा अनुभूयते स्म अनुभूते त्यर्थः दशामेवाह यत

स्तस्मिन् अनुरागिता रक्तता आसीत् तथा अंबरस्याकाशस्य विसृष्टिस्त्यागः तथा कराणां किरणानां इतस्ततः पातनं तथा महसां विरहः अभावः आसीत् अथ च रविणा रवि तुल्येनापि जनेन वारुण्याः मदिरायाः संगजन्या दशा अनुभूयते किमन्येनेति वक्तव्य मित्यर्थः यत स्तस्मिन् जने अनुरागः विषयेषु प्रीतिस्तद्वत्ता भवति तथा अंबरस्य वाससः त्यागः करयो र्हस्तयो रितस्ततः पातनं तथा तेजसां विरहश्च भवति सुरा प्रपक्व वारुणीत्यमरः ॥ ३ ॥

अतिलोहिते र्निजकरैःपरितो रुधिरायमानसलिलंजलधिम्।
अपत न्निहंतु मिवदैत्यबलं समितेर्भ्रमादहह सृग्जलधेः॥ ४॥

अथ तस्य सिन्धुपात मुत्प्रेक्षते अतोति अथ सः सूर्यः वहत् असृतो रक्तस्य जलधि र्यस्यां तस्याः समिते युद्धस्य भ्रमादिव जलधिं अपतत् किं कर्तुमिव तत्र युद्धजलधौ देव्या सह युध्यमानं दैत्यबलं निहंतुमिव ननु तत्र युद्ध जलधिभ्रान्तिः कथं जातेत्यत आह अतिरक्तैः निजकिरणैरेव सर्वतः रुधिरायमानं सलिलं यस्मिन् तं अयं भावः कविसंप्रदाये हि अस्तकाले सूर्यस्य सिन्धौ पातः प्रसिद्धः तत्र च पतन् सूर्य स्तं अतिरक्तैः स्वकरैः रुधिर तुल्य जलाविलं वीक्ष्य रक्तप्रायं युद्धं अमंस्त तत्र च देव्याः साहाय्यमिच्छन्निवदैत्य-सैन्यं हंतुं तत्रापतन् ॥ ४ ॥

पतदातपत्र मिवदैत्यपते रसुरै रमानि विमनोभि रिनः।
सुमनोभि रेष तु दिगंतगत स्तनुभृत्प्रताप इव मातु रुरुः॥ ५

पतदिति एषः इनः सूर्यः दैत्यपते र्महिषस्य पतन् आतपत्रं राज्यच्छत्र मिव विमनोभिः असुरैः अमानि एष एव सूर्यः देवैः दिगंतं प्राप्तः मूर्तिभृत् मातुर्देव्याः उरु र्महान् प्रतापः अमानि अत्रे कस्यापि पतनःसूर्यस्य चक्रवाला कृतेस्तेजोराशेश्च विमनस्तु तया सुमनस्तु तया दैत्यै र्देवैश्च पतच्छत्रदिगंतगत देवीप्रतापरूपतया दृष्टत्वादुत्प्रेक्षालंकारः ॥ ५ ॥

अनुगतो थ हरितो हरितो वदने मृडं करचयं रचयन् ।
उदगादगादुदयतो दयितस्तिमिरं निशो ऽनिश मयं शमयन् ॥

अन्विति अथ सूर्यास्तानंतरं उदयतः अगात् उदयाचलात् निशः दयितः प्रियः चंद्रः उदगात् किंकुर्वन् अनुरागतः रक्तत्वात् हरितः हरे विंद्रस्येत्यर्थः हरितः दिशः प्राच्याः वदने मृडं किरणसमूहं रचयन् तथा अनिशं अजस्रं तिमिरं शमयन् सन् अन्योपि दयितः अनुरागतः प्रीत्या दयितायाः मुखे मृडं करं प्रसारयति हरित इति षष्ठ्यन्तात्तसिः ॥ ६ ॥

विततश्रि मूर्त मिव मातृ यशः
शुभ सूचि भाग्य मिव नाक सदाम् ।
उदियाय मंडल मचंड घृणे
रसुरप्रतापशिखिहंत सरः ॥ ७ ॥

विततश्रीति तदेवोक्तं सते तस्य अचंड घृणे चंद्रस्य मंडलं उदियाय किमिव वितता विस्तृता श्री र्यस्य तादृशं मूर्तिभृत् मातुर्देव्याः यश इव तथा भविष्यति शुभं सूचयितुं शीलमस्य तादृशं नाकसदां देवानां मूर्तं भाग्य मिव तथा असुराणां प्रतापरूपिणं शिखिनं अग्निं हंतीति तादृशं सुर इव ॥ ७ ॥

अतिकोमलैः सुखकरैः स्वकरैः
श्रितशोणतैः शिशुनिशाधिपतिः ।
जननीं स्पृशन् शिशिरमंद मरु
द्व्यजनेन खेद महरच्छ्रमजम् ॥ ८ ॥

अतीति सः बालचंद्रः स किरणैः जननीं स्पृशन्सन् सहायी भूतेन च शीतलमंदमरु द्व्यजनेन तस्याः युद्धश्रमजनं खेदं अहरत् की० स्वकरैः अतिकोमलैःतथा स्पर्शेन सुखकरैः तथा श्रिता शोणरक्ततायैः अन्योपि बालः अतिकोमलैः सुखकरैः स्वीय स्वकरैः निज जननीं स्पृशन् सन् शीतलो मंदश्च मरुद्वायु र्यस्मिन् तादृशेन व्यजनेन कृत्वा तस्याः श्रमखेदं हरति ॥ ८ ॥

सकलां कलानिधि रथ क्षणदां
परिभुज्य काममति कामुक वत् ।
चरमां दशार्ध विशिखस्य दशां
प्रथयन्महांसि विजहावुषसि ॥ ९ ॥

सकलामिति अथेत्थं सः चंद्रः सकलामपि रात्रिं कामं स्वैरं अति कामुकवत् परिभुज्य अथ उषसि प्रातः काले महांसि तत्याज निस्तेजा बभूवः किं कुर्वन् दशार्धाः पंचमिता विशिखा बाणा यस्य तस्य कामस्य चरमां परिणाम कालीनां दशां प्रथयत् अतिकामं भुक्त्वा तदंते निस्तेजस्कता भवतीति व्यापयन् सन् ॥ ९ ॥

क्षण मपाममानि न सुरैः क्षणदा
क्षणदाचरैस्तुयुगतो प्यधि सा ।
द्युसदो जगुर्जयकथा मुदिता
अपरैः पराजय कथा व्यथिताः ॥ १० ॥

क्षणमिति सा क्षणदा रात्रिः सुरैः क्षणमपि न अमानि अथ सैव रात्रिः क्षणदाचरै र्दैत्यैः युगतः अपि अधिका अमानि अथ तस्यां द्युसदो देवाः मुदिताः संतः जयकथा जगुः अपरे दैत्यास्तु व्यथिताः संतो निजपराजयकथां जगुः ॥१० ॥

अथ मागधा इव षडंघ्रिगणा
स्सरसीजराजि मति सुप्तवतीम् ।
अरुणोदये सम ववोधयितुं
सुतरां जगुः प्रति वनं परितः ॥ ११ ॥

अथेति अथ अरुणोदये सति भ्रमराणां गणाः मागधाः स्तुतिपाठका इव अति सुप्तवतीं कमलानां पंक्तिं समववोधयितुं प्रतिवनं परितः सुतरां जगुः ॥ ११ ॥

निजसोदरा न्सरसिजोदरगान्
परिमार्गयंत उषितान् जगदाम् ।
जगदुस्तरा मिव समाह्वयितुं
प्रियबांधवा भ्रमपराभ्रमराः ॥ १२ ॥

अथ तदेवान्यप्रकारेणाह निजेति ते भ्रमपराः भ्रमराः कमलानामुदरेषु प्राप्तान् तत्रैव च सर्वां रात्रिं उषितान् निजभ्रातॄन् अपरभ्रमरान्परिमार्गयंतः अन्वेषयंतः संतः अथ तान् समाहुयितुं आमंत्रयितु मिव अतिशयेन जगदुः कुत इत्यतआह की० ते प्रियाः बांधवा येषां ते ॥ १२ ॥

पुन रपत्र यं समुदित स्सविता
समरो स्समां सम स्त्रयो भविता
इति लिप्सयेव हृदि जातमुदो
बहु चक्रिरे कलकलं करटाः ॥ १३ ॥

पुनरिति इति लिप्सया वांछयेव हृदिजाता मुदो येषां ते करटाः काकाः बहुकलकलां चक्रिरे, इति किं अयं सूर्यः पुनरपि उदितः अथ च पुना समरः रुधिरे मांसेव स्निग्धो भविता अस्माकमति तृप्ति र्भविष्यतीति भावः ॥ १३ ॥

सकलां चमूं स महिषो पि हता
मनिशं निशम्य निशि योधमुखात् ।
अधुना करोमि क मुपाय महं
बहुधेति चेतसि चिचिंत खलः ॥ १४ ॥

इति प्रासंगिकान् संध्या रात्रिप्रातःकाला न्वर्णयित्वा प्रस्तुत मवतारयति सकलामिति अथ सः महिषोपि पलायितानां योधानां मुखात् सकलामपि सेनां अनिशं हतां रात्रौ स्त्रुत्वा अधुनाकं उपायं अहं करोमि इत्येवं बहुधैव सः खलः चेतसि चिन्तयामास ॥ १४ ॥

हृदये हतस्य विषमेषुशरैः पुनरेतया पि च कटाक्षशरैः।
धनुषः शरै रतिशितै स्त्र बहिः समरे गति र्मम नु का भविता ॥

अथ चेद्युद्धं कुर्यां तथापि न वर मित्याह हृदय इति ईदृशस्य मम युधि युध्यमानस्य नु इति वितर्के का गति र्भविता न कापीत्यर्थः कीदृशस्य हृदये विषमेषोः कामस्य शरै र्हतस्य पुनश्च संमुखं प्राप्ते सति एतया देव्या कटाक्ष शरै र्हतस्य बहिश्च शरीरे धनुषो निसृते रतितीक्ष्णैः शरै र्हतस्य एवं युगपदुत्तरोत्तरदुरासदत्रिविधशरतिकरनिपाताद्ध तस्य मम का गति र्भविष्यतीति भावः ॥ १५ ॥

न भवे द्यथा च समरं स्मरतो
वशगा भवेन्मम च साप्यवशा।
त मुपाय मेति मम नो कि मुधी
रिति चिंतयैव स निनाय निशम् ॥ १६ ॥

नेति अथ यथा येनोपायेन समरं न भवेत् यथा च कामतः अवशा सती साममवशगा भवेत् त मुपायं मम बुद्धि कस्मात्र प्राप्नोति इति चिन्तयैव स महिषो निशां निनाय ॥ १६ ॥

स्फुरतिस्म धीरुषसि तस्य हरस्यथचित्ततत्परतये ति तदा।
भजते थ मां प्रभु मपीश न सा पशुरूप मित्य वगतं मनसा ॥

स्फुरतिस्मेति अथ प्रातः काले एकान्ते सति चित्तस्य तत्परतया तदा तस्य बुद्धि रितिस्फुरतिस्म प्रात स्समय एकान्तता चित्ततत्परता च प्रत्येकं धीस्फुरणे हेतुः किमु तत्र युगपत्सर्वेषां संभव इति भावः तावन्मां कस्मान्न भजते इत्यस्य हेतुं प्रति तस्य धीः स्फुरति स्मेत्याह अथ सा देवी मां प्रभु मपि यन्न भजते तत्पशुरूपमिति मत्वा न भजते इति मया मनसा सम्यक् निश्चितं ॥ १७ ॥

न बलं न चाधि पतिता जगतां
बुधता कलासु निखिला स्वपिनो।

हरिणीदृशा मिह मुदं ददते
न च वेद वित्त्व मपि रूप मृते ॥ १८ ॥

इति निश्चित मर्थं लोकदृष्टप्रायेण द्रढयति नेति इह लोके बलमपि न तथा जगता मधिपतिनापि न तथा निखिलासु कलासु बुधतापि न तथा वेदवित्त्वमपि नैव हरिणीदृशां स्त्रीणां मुदं ददते परन्तु केवलं रूपं सौंदर्यं विना सौंदर्यमेव स्त्रीणां मोदं दातु मलं नतु बलादिक मित्यर्थः रूपं विना सर्वगुणसंपत्ते पि मयि तस्या अनादरात् ॥ १८ ॥

रतिभर्तु रप्यथ सुविस्मयदां
पुरुषाकृतिं रुचिरतैकनिधिम् ।
विदधा म्यनर्घ्यमणिभिः कनकै
स्त दहं परिष्कृततरां परितः ॥ १९ ॥

अथ किं विधेय मिति चिन्तयन् स्वयमेवोपायं घटयति रतीति तत्तस्मात् पशुरूपं त्यक्त्वा अहं स्वमायया स्वकीयां पुरुषस्याकृतिं विदधामि कीदृशीं रति भर्तुः कामस्यापि आश्चर्यप्रदां यत्सौंदर्यं वीक्ष्य कामोपि विस्मितो भवेत् तथा रुचिरताया एकनिधिरूपां तथा अनर्घ्यै र्मणिभिः कनकैश्च परितः परिष्कृततरा मतिशयेना ऽलंकृताम् ॥ १९ ॥

स इति व्यवस्य तदुदस्य वपुः खलु
माहिषं निखिलमायिकराट् ।
अतिचारु पौरुष मथो निरमा
दरलक्ष्मभिः क्षितिभुजा मखिलैः ॥ २० ॥

सइति निखिलेषु मायिकेषु राजा स महिषः इति निश्चित्य तच्च महिषं शरीरं त्यक्त्वा अतिसुंदरं पौरुषं शरीरं स्वस्य रचयामास कीं॰ राज्ञां अखिलैर्दोर्भिर्लक्षिते वरलक्षणै रुपेतमिति शेषः ॥ २० ॥

वदनं हिमांशुमदनल्पविभं
सततं कपाटवदुरोविततम् ।

वृषमांसलांसयुगलं स्म तदुन्नति
शालिता लसति शालसमा ॥ २१ ॥

कानिचिद्दरलक्षणान्येवाह वदनमिति तस्य पुरुषाकृते र्महिषस्य मुखं चन्द्रवत् महाप्रभं लसतिस्म तथा उरो वक्षः स्थलं कपाटवत् सततं विस्तीर्णं लसतिस्म तथा वृष वत् मांसलं तस्य स्कन्धयुगलं लसतिस्म तथा तस्योन्नतिशालितावृक्षसमा लसतिस्म ॥ २१ ॥

श्रवणांतिकप्रणयिनी नयने
भुजदंडगामि युगलं श्रवसोः।
अभि जानुनी गत मथा स्य
भुजद्वितयं च रत्नमुकराकृतिनी ॥ २२ ॥

श्रवणेति तस्य नयने कर्णसमीपगामिनी आस्तां, तस्य कर्णयो र्युगलं भुजदंडगामि आसीत्,अथ अस्य भुजद्वयं रत्नरूपा दर्शवत् आकृति र्ययो स्तेजानुनी प्रतिगतं आजानुलंबीत्यर्थः अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणभावा देकावलि रलंकारः ॥ २२ ॥

मुकुटेन रत्नखचितेन महांगदहारकुण्डलवलत्कटकैः।
तपनीयतंतुरुचिरैर्वसनै र्विबभावनंग इव सोंगधरः ॥ २३ ॥

मुकुटेनेति सः महिषः रत्नखचितेन मुकुटेन महाङ्गदै र्हारैः कुण्डलै र्वलत्कटकैः स्वर्णतन्तुभिः रुचिरै र्वसनैश्चालंकृतः अङ्गधरो मूर्तिभृत् अनङ्गः काम इव विबभौ ॥ २३ ॥

वरवर्म्मवर्ष्मणि च चर्म्म तिरःस्वकटौ महासि मपि सारसनं।
धनुरंसदेश उपतूण मभात्स निवध्य मूर्त इव वीररसः ॥ २४ ॥

वरेति स च वर्ष्मणि शरीरे वरं वर्म्म कवचं निवध्य स्वकटौ च तिर स्तिर्य्यक्चर्म्म निवध्य तत्रैव च महासिं,महाखड्ग सारसनं कंचुकदार्ढ्यार्थं मध्यकाय वन्धनपटादिं च निवध्य तथा स्कन्धदेशे धनुर्निवध्य तोइर्ण उपगतः समीप

स्वतूणौ निषंगो यत्र इत्थमायुधानि मूर्तिमत् वीररस इवा भात् यत्तु मध्यम कंचुका बध्नन्ति तत्सारसन मित्यमरः ॥ २४ ॥

न कयापि मे सुषमया विधुरं वदनं भवेन्मदनभाकदनम् ।
इति शंकया स निजभृत्यभृतंमुकुरं मुहुर्मुहु रवेक्षितवान् २५

नेति इत्थं भूषणादिधारणानन्तरं कयापि परमशोभया रहितं मम कामशोभा कदनं वदनं न भवेत् इति शङ्कया स युंकुपभु न्महिषः स्वसेवकेन धृतमादर्शं मुहुर्मुहुर्दृष्टवान् सुषमा परमा शोभेत्यमरः ॥ २५ ॥

भृतका नथादिशदसौ स्वरथानयनाय सारथि मिहाव्हयत ।
इति ते निशम्य सह सारथिना रथमानया मथ बभूरुवुकम् २६

भृतकादिति अथासौ महिषः स्वरथानयनाय सारथिं सूतं इहाहूयत इति भृत्यान् आदिशत् तेपि भृत्याः इति तस्याज्ञां श्रुत्वा सारथिना सह महान्तं रथं तत्रानयामासुः ॥ २६ ॥

शिरसो मुहुर्मुहु रधष्करणै र्नृपमादरा दभिनमद्भि रिव ।
चलदोष्टयुग्मकतया प्रभवे निजमुत्सुकै रिव रथं गदितुम् २७

रथमेव वर्णयति शिरस इत्यादिभि स्त्रिभिः तावत्तृतीयपद्यस्य विनिवेदित मित्यस्य व्याख्या महिष स्तुरथ सुदीर्घ जहर्ष कीदृशं प्रणतेन सारथिना विनिवेदितं अयमयानीत इति तथोत्कृष्टया प्रभया सूर्यतुल्यं तथा सांयुगीनं रणयोग्यं तथा अखिलाना मसुराणां निधिरूपं सर्वाङ्गसम्पन्न मित्यर्थः सांयुगीनो रणे साधु रित्यमरः ॥ २७ ॥

स्फुटिते रदैः परिहसद्भि रिव श्रियमुच्चकैः श्रवस उज्ज्वलभैः ।
वहनीयतामथ चतुर्भि रितं करणैः शरीर मिव चारुहयैः ॥२८

पुनः कीदृशं रथमित्यपेक्षायां स्फुटितैरिति द्वितीयपद्य व्याख्या अथ चतुर्भिर्वाहभि र्हयैः वहनीयतां प्राप्तं कैः किमिव करणैः मनो बुद्ध्यहंकारचित्तभेदेन चतुर्भिरन्तष्करणैः शरीरमिव को० हयैःस्फुटितैर्वहि र्निष्कासितैः कृत्वा उच्चैः श्रवसः श्रियं परिहसद्भि रिव अन्योपि निजाधमं परिहसन् दन्तान्वि-

काशयति अन्तःकरणचतुष्टयं तूक्तं वार्तिके मनो बुद्धिरहङ्कार चित्त चेतिच-तुर्विधं सङ्कल्पाख्यं मनो रूपं बुद्धि निश्चियरूपिणो अभिमानात्मकस्तहद' हङ्कारः प्रकीर्तितः अनुसन्धानरूपं च चित्त मित्यभिधीयत इति ॥ २८ ॥

विनिवेदितं प्रणतसारथिनारुणसारथिप्रतिममुत्प्रभया।
अथ सांयुगीनमखिलासुनिधिं महिषो जहर्ष त मुदीच्य रथम्

पुनः कोदृग्ं हंगे रित्यपेक्षायां शिरस इति प्रथम पद्यव्याख्या मुहुर्मुहुः स्वशिरसः अधष्करणैः अधः पातनै र्नृपं महिषं आदरादभिनमद्भिरिव अन्यो-न्यादरा नमस्कुर्वन् पुनः पुनः शिरो नमयति तथा चलत् चंचलं ओष्टयोः प्रोथयो युग्मं येषां ते चलदोष्टयुग्मका स्तत्तया प्रोथ इयचालनेने त्यर्थः प्रभवे महिषाय निजं रथं गतिवेगं गदितु मिवोत्सुकैः अयं स्वयमेव वेत्ति किमस्मत्कथने नेति न कथयंतीति ध्वनि अन्योपि स्वपराक्रमं वक्तु कामः ओष्टौ चालयति ॥ २९ ॥

अधिरुह्य तं सपदि सूत मथा दिशदर्यमारुण मिवाधिपतिः।
पुरतो वहि र्नय शतांग ममुं गमनीय युद्धधरणिं तरसा ॥ ३०

अधिरुह्येति अथ सोधिपति र्महिषः तं रथं शीघ्रमारुह्य अथ सूत मा-दिशत् कं क इव अरुण मनरूमूर्य्य इव किमित्याह हे सारथे अमुं शतांगं रथं पुरतो नगरा त्तरसा वहि र्नय वहि र्नीत्वा कुत्र गंतव्य मित्यतआह को॰ रथं गन्तुं योग्या युद्धस्य धरणी यस्य शीघ्रं युद्धभूमिं प्रापयेत्यर्थः शतांगः संयदनो रथ इत्यमरः ॥ ३० ॥

प्रकरोति यावदरुणोर्कं रथं वहि राशु पूर्वनगतोभिनभः।
त ईर्ष्ययेव स चकार रथं महिषस्य सारथि रपि स्वपुरात् ३१

अथ महिषरथवहि र्नयनवर्णनव्याजेनारुणोदय पर्य्यन्तं पूर्वप्रतिपादित प्रासङ्गानन्तरं वर्ण्यमानसूर्योदय मपराह प्रकरोतीति अथ अरुणो याव-त्पूर्वाचलात् सूर्य्यरथं नभः प्रतिशीघ्रं वहिष्करोति तावदेव इतः तस्यारुणस्य

ईर्ष्ययेव स महिषस्य सारथिरपि स्वपुरात् रथं वहिश्चकार अयं सूर्य्यसारथि रथं त्वरितं त्वरयति अहं किमस्मात्न्यूनो यन्मन्दं त्वरयामीतर्थः ॥ २१ ॥

अथ चामरप्रभृतयः सचिवाश्चतुरंगचक्रपतयः परितः ।
तमहंयवो नुययु रायुधिनः पतयो दिशा मिव सुराधिपतिम्॥

अथेति तदनंतरं चामरादयः सचिवाः तं महिषं परितः अनुययुः कं के इव इन्द्रदिक्पाला इव कौ० ते सचिवा चत्वारि पत्यश्च मातंग रथरूपाख्यं गानि यस्य चक्रस्य सैन्यस्य पतयो नायकाः तथा अहं यवः आत्मन्यत्यंत बलवत्ताभिमानवंतः तथा आयुधिनो धृतशस्त्राः अहंकारवानहंयुः स्यादित्यमरः ॥ २२ ॥

अथ सुप्रयोगविशिखा जवना वरवर्मचर्मकरवालभृतः ।
धुरिपत्तयः समपदक्रमणै श्चलदुच्चभित्तय इवा तिबभुः ॥२३ ॥

क्रमेण चतुरङ्गसेनाया गमन प्रकार माह अथेति अथ धुरि अग्रे पत्तयः समपदक्रमणैः चलंत्य दुच्चाभित्तय इव अतिशयेन वभुः अभूतोपमेयं कीदृशाः शोभिनाः प्रयोगा येषां ते सुप्रयोगा स्ताद्दृशाः विशाखा येषां ते सम्यक्कृत शराभ्या सा इत्यर्थः तथा जवना वेगवन्तः तथा वरं वर्मचर्म करवालं खड्गं च विभ्रतीति ते कृतहस्ताः सुप्रयोगविशिखः कृतपुंखवदित्यमरः प्रजवोजवनोजव इति च ॥ २४ ॥

अथसादिभि स्समवरुद्धरयाः सुदृढं खलीन मवयम्य हयाः ।
अवनिं तु किंचि दवलंब्य खुरैः र्वैहुधाख एव ययु रग्रखुरैः २४

अथेति ततश्च सादिभिः अश्वारोहैः खलीनं कविकां लगामेति भाषया प्रसिद्धं सुदृढ मवयम्य निरुध्य समवरुद्धो रयो वेगो येषां ते हयाः तीक्ष्णैः स्वखुराग्रभागै र्भूमिं किंचिन्मात्रं अवलंब्य वहुधा आकाश एव ययुः वेगाधिरूढा हि हया ऊर्ध्वमेव गच्छन्ति अश्वारोहास्तु सादिन इत्यमरः कविका तु खलीनो स्त्रीति च ॥ २४ ॥

प्रचलंत्यनाश्रयमितस्य हया वय मत्र साश्रय मयुक्त मिदम् ।
इति बन्धु वत्सलतया स्वखुरोद्धत्त मुत्क्षिपं त्यभिनभः स्म रजः

प्रचलन्तीति ते हयाः स जातीयत्वात् वन्धुषु सूर्य्यहयेषु यावत्सत्वत तथैव स्वखुरैरुद्धतं रजः आकाशं प्रति उत्क्षिपन्ति स्म इति किं अमी सूर्यस्य हया नभोगामित्वात् अनाश्रयं प्रचलंति वयंत्वत्र भूम्यां साश्रयं प्रचलामः तदे-तत् अयुक्तमस्ति अत स्तत्रापास्मात् खुरोद्धतरजसा भूमिर्भविष्यति तदा तेपि सा श्रयं प्रचलिष्यन्तीति भावः अन्योपि महान्साश्रय सन् स्वका दधमं स्ववंधु निराश्रयं वीक्ष्य करुणया तस्य यथा कथं सा श्रयतां कल्पयतीति तेषां हया-नां सूर्य्यहयेभ्यो महत्त्वमपि ध्वनितम् ॥ ३५ ॥

परिक्षुडितस्य तुरगै स्समतां धरणीतलस्य सुविधाय गजः ।
प्रशमं खुरोद्धतरजो प्य नय न्करनिस्सृतै स्स नत मंवुकणैः ॥३६

परीति अथ गजातुरगैः परिक्षुडितस्य धरणीतलस्य समतां कृत्वा तेषां खुरेभ्य उद्धतं रजोपि करात् शुंडातो निस्सृतै रंबुकणैः प्रशमं अनयन् ॥ ३६

अतिचक्रचंक्रमणचीत्कृतिभि र्वधरीकृताखिलहरिद्दनाः ।
श्रितमंथरेतरहया रमणीः सरणी रथाः पथि वितेनु रथ ॥ ३७

अतीति अथ रथाः पथिरमणी रुचिराः सरणीः यद्दतो वितेनु र्विस्ता-रयन्तः कीं० रथाः अतिशयेन यत् चक्राणां चंक्रमणं तदुत्थिताभि श्चीत्कारै र्वधरी कृतान्यखिलनां हरितां दिशां वदनानि मुखानि ये स्ते तथाश्रिताः मंथरा मंदगामिन स्तदितरे शीघ्रगामिनो हया यै स्ते मंदगामी तु मंथर इ-त्यमरः ॥ ३७ ॥

पदवीं दृशोर्मम कदै ष्यति सा किमु भाषणीय मथ तत्पुरतः
इति चिंतयन्पथि हृदा महिषो धरणीं रणस्य सुदर्शपुरः ॥

पदवीमिति अथ सा महिषः पथि हृदा इति चिन्तयन् अग्रे रणस्य धरणीं किं सा देवी मम दृशोः पदवीं कदा एष्यति कदा तां द्रक्ष्यामी स्वर्थः अथ च तस्या अग्रे मम किं भाषणीयम् ॥ ३८ ॥

अमितप्रमीतरुधिराब्धिजुषा बहुपूति गंध मभितो वहता।
मरुते व यत्र न जनाः श्वसितं प्रभवन्ति दूर मपि नष्टधियः॥

रणधरणि मेव वर्णयति अमितेति यत्र युद्धभूमौ जनाः एतादृशेन वायुनैव नष्ट बुद्धयः संतः दूरमपि श्वसितं समर्था न भवंति किं वायुना अमिता नामसंख्यातानां प्रमितानां मृतानां रुधिररूपं अब्धिं जुषतोति तेन अत एव अभितो बहुं पूति गंधं दुर्गंधं वहता॥ ३८॥

हरिशङ्कराद्यभिनुता मथवे हरिकंधरार्पितपदांवुरुहाम्।
हरिणीदृशं समरमध्यगतां हरिकामिनीं भृश मुदैक्षत सः ४०

हरीति अथ स मन्त्रिपः तां हरिकामिनीं महालक्ष्मीं भृश मत्यर्थं उदैक्षत कीदृशीं आकाशे हरि विंष्णु रिंद्रो वा शंकरः शिव स्तदादिभि र्देवै रभिनुतां तथा हरे सिंहस्य कंधरायां ग्रीवाया मर्पितं दत्तं पदांबुरुहं यया सिंहाधिरूढामित्यर्थः तथा हरिणी वत् दृशौ यस्याः तथा समरस्य मध्ये गतां प्राप्तां॥ ४२॥

किमियं सुधाकरमयी नु सुधा
भजते ब्धिमन्थनभियेह तनुम्।
सुख मेव मूर्तिमदियं कि मथो
बहुधा व्यतर्कय दुदीक्ष्य स ताम्॥ ४१॥

किमिति सतामुदीक्ष्य चित्ते इति बहुधा व्यतर्कयत् इति किं इयं पुरः स्थिता सुधाकरमयी इंद्ररूपास्ति नु वितर्के यद्वा सुधैवास्ति नच इंदुरूपा सुधावा यदि भवे त्तर्हि सिंधुं त्यक्त्वा अत्र कथ मायातेत्यतआह इह अब्धि मथन भयेन तनुस्त्रीमूर्तिं भजते यदि सिंधौ निवसामि तर्हि पुन र्मंथ न क्लेशो भविष्यतीति भयेनात्र स्त्रीरूपं कृत्वा समायाता किमिति भावः अथवा मूर्तिं मत् सुखमेव किमिय मस्ति॥ ४१॥

अथ तत्पुरो निजसुरूप मसौ बहुधा प्रसाधित मपि छलतः।
हसनीयतास्पद ममंस्त तदा क्व मणे रुचिः क्व च नु काचमणेः ॥

अथेति अथासौ मद्दिषः निजसुरूपं छलतः बहुधा प्रसाधितं अलंकृतमपि तदा तस्याः सौन्दर्य्यस्याग्रे हसनीयतास्पदं कुरूपत्वाद्धास्यं कर्त्तुं योग्यममंस्त यतः मणेः रुचिः क्वास्ति अथ च छलेन निर्म्मितस्य काचमणेः रुचि क्वास्ति महदन्तर मित्यर्थः ॥ ४२ ॥

जननीं गिरां प्रति गिरं जगदे ग्रथितां पुरैव पथिता मथ सः।
अयि सुन्दरि श्रुतिपथा हृदि मे गिर माकलय्य कुरु काम मतः ॥

जननीमिति अथ स मद्दिषः तां गिरां जननीं भगवतीं प्रति गिरं जगदे कीदृशीं गिरं पथिपुरैव ग्रथितां गिरां जननीं प्रतिछलेन ग्रथितगिरा कथनं हास्यास्पद मेवेति ध्वनितं अयि सुन्दरि तावत् मम गिरं श्रुतिपथाकर्णमार्गेण हृदि आकलय्य विचार्य्य अतः परं कामं यथेच्छसि तथा कुरु ॥४३ ॥

नितरां गभीरभवनीरनिधौ सुख मेव रत्न मुदितं विबुधैः।
उभयो र्युजे स्तदपि संभवति प्रथिताथ सापि बहुधा जगति ४४

किं गदसीत्यत आह नितरामिति अयि सुन्दरि नितरां गभीरे अस्मिन् संसारसमुद्रे विबुधैः सकलप्रयोजनमौलिभूतं सुखमेव रत्नं गदितं धर्म्मादि वर्गस्यापि सुखसाधनत्वात् तत्सुखमपि उभयो र्युजेः संयोगादेव संभवति नत्वेकेन सुखमनुभूयते सुखसाधनस्यान्यस्याभावात् अथ सा युजिरपि जगति उत्तम मध्यमादि भेदेन बहुधा प्रथिता ॥ ४४ ॥

युजि रात्मजस्य जनकेन च या सहजैव सोत्तमतया गदिता।
सहजेन या च सहजस्य युजिर्भुवि मध्यमा भवति कारणतः

तत्रेदानेवाह युजिरिति जनकेन पित्रा या आत्मजस्य युजिःसातु सहसा स्वाभाविकैव उत्तमतया गदिता अथ सहजस्य भ्रातुः सहजेन या युजि साकारणतः स्वप्रयोजननिबन्धनात् भुवि मध्यमा भवति ॥ ४५ ॥

अथ लोलुभे धनिनि या च कृता
क्षणभंगुरा भवति सा त्वधमा ।
सुहृदा मपि त्रिविधतास्ति युजि
र्म्मिलनं प्रसङ्गजनि नाविकयोः ॥ ४६ ॥

अथेति अथ धनिनि पुरुषे लोलुभे जने या कृता युजिः सा तु अधमा भवति कुतः क्षणभङ्गुरत्वात् यावद्धनलाभादेवतस्याः सम्भवात् अथ सुहृदां मित्राणामपि युजेः त्रिविधता अस्ति उत्तममध्यमाधमभेदेनेत्यर्थः अथ नाविकयोः नौकायां सङ्गतयो र्म्मिलनं युजिः तत् प्रसङ्गजनि कथितं तावन्मात्रप्रसङ्गादेव जायते तत्तु सदा स्थिरं भवति प्रयोजनाभावाद्वास्योत्तमत्वादिभेदोऽस्तीतिभावः द्वयानेवास्या विशेषः ॥ ४६ ॥

अथ तुल्यरूपगुणधीवयसो रतिसान्द्रहार्दसुधयार्द्रहृदो ।
इह नायिकारमणयोस्तु युजिःपरमोत्तमातिसुकृतैःप्रभवेत् ४६

अथ स्वप्रयोजनार्थं प्रसङ्गादानीतमर्थं प्रस्तुते योजयति अथेति हे सुन्दरि इह लोके नायिकारमणयो र्या मिथो युजिः सा तु पूर्वाभ्यो वैलक्षण्यात् परमोत्तमा अस्ति सा तु पूर्वजन्मनिसञ्चितैः अतिसुकृतैः पुण्यैः प्रभवेत् नान्यथेत्यर्थः कीदृशयो स्तयो स्तुल्यं रूपं गुणाः धीः वयश्च ययोः तथा अति सान्द्रं निविडं यत् हार्दं प्रेमतदेव सुधातया आर्द्रं क्लिन्नं हृत् ययोः ईदृशयोरेव युजिः अत्युत्तमानान्ययो रिति भावः इदं त्वावयो रेव दृश्यते नान्यत्रेति ध्वनितम् ४७

तव वेद्मि भाग्य मत एव परं पुरुपूर्वपुण्यनिचयैर्निचितम् ।
कथमन्यथा त्रिजगदेकपति र्वश माप्नुयामहमनाथ इव ४८ ॥

इदमेवाह तवेति हे सुन्दरि अत एव तव भाग्यं अहं परमुत्कृष्टं वेद्मि कीदृशं बहुभिः पूर्वजन्मभिः कृतैःपुण्यनिचयै र्निचितमेकीकृतं अन्यथा यदीदं न मन्यसे तदा अहं त्रिजगतामेकःपतिरपि सन् अनाथ इव तव वशं कथं आप्नुयां अत एवानुमीयते त्वया बहूनि पुण्यानि कृतानि अनुमानालङ्कारः ॥ ४८ ॥

अथ निर्जिता दश दिशा मधिपाः समरवाशिमः शतमखप्रमुखाः
अभिषेचिताः खलु निजानुचरा अपि तत्पदेषु दययैवमया ४९

अप्रभावमपि दर्शयति अथेति देवैः सहिता इंद्रादयो दशदिक्पाला अपि मया निर्जिताः अथ च तेषां पदेषु मयैव दयया प्रसादेन निजानुचराः अभिषेचिताः येषां पदाना मधिपा इन्द्रादय आसन् तेषां मम भृत्या इति स्वस्यातिमहत्वं सूचितम् ॥ ४९ ॥

स निजेच्छयैव विदधा म्यमिता सुरमर्त्यदैत्यभुजगादितनूः।
वरतो विधातु रथजातु न मे प्रलयेपि कालकलनेत्यमृषा ५०

नन्वेतावतीवाच्येव मयि शक्तिः किं त्वन्यान्तरीयापीत्याह स इति सोहं स्वेच्छयैव असंख्याताः सुरादीनां मूर्तीः स्वस्य विदधामि ननु त्वयि मृते वैधव्यं महत्कष्टं तत्राह हे सुन्दरि विधातु र्वरतः मम प्रलयेपि कदाचित् कालस्य कलना नास्ति इति अमृषा सत्यमेव जानीहीत्यर्थः ॥ ५० ॥

जहिहि स्वभाव मनवद्यतनो बहुदुःखसीम्नि समरे प्रसितम्।
अबलोचितं प्रकुरु भावमथो मयि सर्वतः परमसौख्यकरम् ५१

जहीति हे अनवद्य तनो अति सौंदर्यात् निर्दोषशरीरे बहुदुःखानां सीमरूपे समरे आसक्तं तत्स्वभावं जहि त्यज अथ अबलानां सुन्दरीणां योग्यं भावं कटाक्षभुजाक्षेपादि चेष्टामपि प्रकुरु कीदृशं सर्वतः परमसौख्यकरम् ॥ ५१ ॥

विबुधा वदन्ति यदिदं समरं विजये ऽर्थसिद्धिकृदथो यशसे।
निधने सति त्रिदिवदात् नृणां श्रुतयःप्रमाण मिहतन्नमृषा ५२

नन्विहायामुत्रनिरतिशयानन्दप्रदं युद्धयशं विहाय कथमैहिकमेव किञ्चित्सुखं श्रियै इतिचेत्सत्य मेवैतदित्याह विबुधाइति हे सुन्दरि यत् इदं समरं विजये सति नृणामर्थं सिद्धिकृत् तथा यशसे च भवति अथ निधने सति स्वर्गलोकप्रदं भवति इति यत् विबुधा वदन्ति तन्मृषानसत्यमेवेत्यर्थः कुतो यदस्मिन्नर्थे प्रमाणं श्रुतयः सन्ति ॥ ५२ ॥

स जय स्त्वया द्य जनितः समरे
विततांथ कीर्तिरपि ते जगति ।
त्रिदिवं मया थ सह भुंक्ष्व चिरं
विफलः श्रमो न हि बुधैः क्रियते ॥ ५३ ॥

इति तमत्र सत्यतां प्रतिपाद्य युक्त्या निरस्यति स इति हे सुन्दरि स ज-यस्तु त्वयाद्य मत्सैन्यवधं कृत्वा जनितः अथ च तव कीर्तिरपि जगति विस्तृता जाता अथ तया सह चिरं कालं स्वर्गमपि भुंक्ष्व अथ चेत्पुनरपि तदेव चिकीर्षसि तन्न युक्तमित्याह हि यतः कार्ये निष्पन्ने सति विफलः श्रमः बुधै-र्न क्रियते तदुक्तम् अर्के चे न्मधुविन्देत किमर्थं पर्वतं व्रजेत् इष्टस्यार्थस्य सिद्धौ कोविद्वान्यत्नमाचरे दिति अर्के गृहकोणे ॥ ५३ ॥

अथ मां हि जेतु मधुने च्छसि चे
त्पुरतो र्पितास्त्र मिह विद्धि जितम् ।
नृपधर्म्म माश्रितवते व मया
विधृता न्यमूनि न तु युद्धकृते ॥ ५४ ॥

नन्वेताञ्जित्वा मम कार्यं न निष्पन्नं किंत्वधुना त्वां जेतु मिच्छामीति चेत् तत्राह अथेति हे सुन्दरि अधुना चेन्मामेव जेतु मिच्छसि तर्हि तवाग्रे र्पितान्यस्त्राणि येन तादृशं मां जितं जानीहि इत्युक्त्वा तदग्रे शस्त्राण्यर्पय दिति स्वयं बोध्यम् नन्वीदृशश्चे त्तव निश्चय आसीत्तर्हि कस्मात्तवानसीत्यत आह मया तु नृपधर्ममात्रं माश्रितवतैवामूनि शस्त्राणि धृतानि नतु युद्धकृते युद्धं विनापि राज्ञां शस्त्रधारणस्यौचित्यात् ॥ ५४ ॥

श्रम एष चेत् सुरमुदे क्रियते
न दुनोम्यतः प्रभृति तां स्तु कदा ।
किमु वच्मि नेदृश मवाप दशां
मद्विषः पुराब्जजनुषो पि पुरः ॥ ५५ ॥

ननु सत्यमेतत् तथापि मङ्गलादेवा मत्ययातिपीडिताः सन्ति तेषां प्रीत्यर्थं एतत्करोमीति चेत्तत्राह श्रमद्दति हे सुन्दरि एष श्रमश्चेत् सुराणां मुदे क्रियते तर्हि एष मे शपथः तान् सुरान् अतः प्रभृति कदापि न दुनोमि इत्युक्त्वा स्व-स्यातिदैन्यं द्योतयति हे सुन्दरि अहं किं वच्मि असौ महिषः ईदृशीं दैन्य-दशां पूर्वं तपोंते ब्राह्मणोप्ययं न प्राप यादृशीं त्वदग्रे प्राप्त इत्यर्थः स्वस्यापि परवत्कथनं लौकिकव्यवहारेण बोध्यम् यद्वा अवापेति लिड्युत्तमपुरुषैकवचन मस्तु ईदृश मिति क्रियाविशेषणत्वान्नपुंसकलिङ्गरूपं बोध्यम् ॥ ५६ ॥

बहुभि र्वचोभि रल मेष मया
रचितों जलि र्वानुनयाय पुरः ।
शरणागतं श्रितवतो महिमा
न हि शक्यते युगशतै र्भणितुम् ॥ ५६ ॥

पुनरप्यति दैन्यं दर्शयन् स्वोक्ति मुपसंहरति बहुभिरिति हे सुंदरि बहु-भिर्वचोभिः अलंअत स्तवानुनयाय क्रोधाय नयाय एषोंजलि स्त्वदग्रे मया रचितः क्रोधं त्यज त्वां नमस्करोमीति भावः ननु त्वां श्रित्वा मम किं महत्वं तत्राह हि यतः शरणागतं जनं श्रितवतो जनस्य महिमा युगानां शतैरपि वक्तुं न शक्यते ॥ ५६ ॥

इति तं गिरा नवरतं विरतं
जगतीपति रतिपतिव्यथितम् ।
प्रतिवक्ति सा स्म जगतां जननी
प्रमिताक्षरातिरुचिरं वचनम् ॥ ५७ ॥

इतीति इत्येवं वाचा निरंतरं विरतं तं कामेन पीडितं राजानं महिषं प्रति सा जगतां जननी प्रमितैः प्रमाणनिष्पन्नै रल्पै रेवाक्षरै रतिरुचिरं वचनं वक्ति स्म अत्र प्रमिताक्षरेति वृत्तनामाप्यभिहितम् ॥ ५७ ॥

श्रुतिगोचरं कुरु ममापि वच.
श्रुतिगोचरं हित मृतं नृपते ।
त मनुत्तमं पुरुष मीश मृते
क मनुत्तमं पुरुष मन्य मियां ॥ ५८ ॥

किमित्यतश्चाह श्रुतीति हे नृपते ममापि वचः श्रुतिगोचरं कुरु शृणु कीदृशं श्रुतीनां वेदानां गोचरं विषयं वेद प्रतिपादित मित्यर्थःतथा हि तं पथ्यं ऋतं सत्यं च किमितयतश्चााह तं अनुत्तमं सर्वेभ्यो प्रा उत्कृष्टं पुरुषं परमात्मान मीशं षडैश्वर्यसंपन्नं विना अन्यं प्राकृतं अनुत्तमं नीचं कं पुरुषं जनं इयां प्राप्नुयां को हि मणिंत्यक्त्वा काचं कांक्षते इति भावः पुरुषस्त्वात्मनि नरे पुन्नागेचेतिहैमः ॥ ५ ॥

यदुदीक्षणेन हि सृजा म्यखिलं
सदनाद्यनन्त इति यं श्रुतयः ।
चकिता गृणन्ति न च वाङ्मनसोः ।
पथियः स मे पति रजादिपतिः ॥ ५९ ॥

तत्प्रभावातिशयं दर्शयति यदिति यस्य पुंसः उदीक्षणेनैव अहं मूल प्रकृतिरूपा सती इद मखिलं महदादिकं सृजामि चुंबकमणि सन्निधानेन लोह वदित्यर्थः पंचश्रुतयः सदनाद्यनंत इति चकिताः सत्यो गृणंति कुत इतयतश्चाह यश्च वाङ्मनसोः पथिविषयेनास्ति स अजो ब्रह्मा तदादीनां देवानां पति र्नियंता यथाऽजामाया तदादीनां पतिः प्रवर्तको मम पति रस्ति तस्य जग ज्जन कत्वादहं जगज्जननीति दुष्टमति र्मयि न कार्येति भावः ॥ ५९ ॥

विविधा यदा स विदधाति तनू
रसतो निहन्तु मवितुं च सतः ।
परमात्मनो स्य परमास्मि तनू
रह मेव भेव दिवसाधिपतेः ॥ ६० ॥

तदुत्तरमाह विवधा इति स ईश्वरः असतो दुष्टजनान् निहंतुं सतः सत्पुरुषांश्च अवितुं रक्षितुं सदा युगे युगे विविधा स्तनूर्मूर्तीः विदधाति इति चेत्तर्हि स एव मूर्तिभूता दुष्टान्निहंतु त्वं किमर्थं मायातेति संशय निरासाय स्वस्य तादात्म्यं दर्शयति अमय परमात्मनः परमा तनूर्मूर्तिं रहमेवास्मि तव स्थूलदृष्टे ज्ञापनार्थमेवैतावानपि भेदः प्रतिपादितः वस्तुतस्तु न कश्चिदपि भेदो स्तीति भावः अत एव दृष्टांत माह सूर्यस्य परमामूर्तिं प्रभेव यथा न भिद्यते तद्वदहमयोत्यर्थः ॥ ६० ॥

त दहं भवन्त ममरासुहृदं पतितं नृशंस मिह हन्तुमनाः ।
भवता हृताधिकृतिभिः कृतिभिः कृतये थिताविरभवंत्रिदिशैः

एतत्सामान्यत उक्ता विशेषेण लक्ष्ये योजयति तदिति तस्मात् त्वां देवानां शत्रुं पतिं तं पापिनं नृशंसं क्रूरं च इह हंतुमनाः अहं आविरभवं कीदृशी त्वया हृताधिकृतिभिः कृतिभिः सत्कर्म कुशलैर्देवैः स्वकार्यार्थं प्रार्थिता ॥ ६१॥

मृदु ते यदुक्त मसुरेश न तत् जीवितं परिहराम्यधुना ।
सखिता त्वया द्य विहिता तदधो विहरस्वकाममवहायदिवम्

अथ दीन मपि मां किं निहंसीवेत्यतआह मृद्विति हे असुरेश त्वया यद्यस्मात् मृदुकोमलं उक्तं तत्तस्मात् अह मधुना तव जीवितं न परिहरामि यत स्त्वयाच मया सह सखिता मैत्री विहिता रचिता तत्तस्मात् स्वर्गं त्यक्त्वा अधो लोकेषु यदिच्छं विहरस्व ॥ ६२ ॥

अथ कश्चनास्ति हृदि शुष्मदः श्रय पौरुषं प्रलपनै स्त दलम् ।
महिषस्य तेद्यवलि मेत्य परं परिपूर्णतां रणमखोय मियात्६३

नन्वीदृक्प्रभावः सन् कथं कातरवदभीयामीत्यतआह अथेति अथ यदि तव हृदि कश्चन शुष्मदाशौर्यस्य मदो गर्वोस्ति तर्हि पौरुषं स्वपराक्रमं श्रय प्रलपने र्व्यर्थवचने रलमस्तु अथ त्वयि पौरुषं श्रिते सति तव महिषस्य परं बलिं प्राप्य अयं युद्धरूपो यज्ञः परिपूर्णतां प्राप्नुयात् पशुभूतस्य बलेरभावात् यज्ञपरिपूर्त्यभावात् ॥ ६३ ॥

ननु रे नरेश किमसि त्वमहक्
न गताऽथवाऽपि नृतनोः पशुता।
न यदीक्षसे परमबन्धमिमामपि
शृङ्खलात्स्त्रियमिहाधिकृताम् ॥ ६४ ॥

अथ चेत्त्वमदृष्टित्वात्परमार्थतो मां जगज्जननीं न वेत्सि किन्तु प्राकृतस्त्रीव जानासि तथापि मत्परिग्रहणं न युक्तमितयाह नन्विति प्रश्ने हे नरेश किं त्वं अदृक् अन्धोसि अथवा तव नृतनोर्धृतपुरुषमूर्तेरपि सा नैसर्गिकी पशुता न गता यद्यस्मादिह लोके इमां स्त्रियमधिकृतामङ्गीकृतां शृंखलादपि परमं बन्धं न ईक्षसे तदुक्तं बद्धः कदाचिन्मुच्येत पुरुषो निगडैर्दृढैः पुत्रैर्दारैस्तु सम्बद्धो न मुच्येत कदाचनेति ॥ ६४ ॥

इति दुर्गयोक्तवचसाऽर्थमसौ
स्मरमूढधीरनवलोड्य पुनः।
अभितां बभाण किमिदं ललने
कृत आग्रहः परमकश्मलदः ॥ ६५ ॥

इतीति असौ महिषः इत्येवं दुर्गया उक्तस्य वचसः अर्थं तात्पर्यं अनवलोड्य न सम्यग्विचार्य तत्र हेतुः स्मरमूढधीरिति अथ पुनः तां प्रति बभाण हे ललने इदं किं यत्त्वया परमकश्मलदो युद्धरूपः आग्रहः कृतः तदुत्तयननुरूपेयं प्रत्युक्तिः अत एवाविचार्येत्युक्तम् ॥ ६५ ॥

अयि मालतीमृदुतनो त्वयि कः
कुसुमप्रहारमपि दातुमलम्।
अपि भासि योत्पलसमावयवै
र्मनसो पलासि किमयुक्तमिदम् ॥ ६६ ॥

ननु त्वमपि शूरोसि किं युद्धाद्बिभेषीत्यत आह अयीति मालतीव अपि कोमलकाये त्वयि कुसुमानां प्रहारमपि दातुं को निर्दयोऽलं समर्थो भवति त्वां मृद्वीं दृष्ट्वा कः प्रहारं दातुमिच्छतीत्यर्थः अथ या त्वं बहिरवयवै उत्पल-

सदा कोमला भासि सैव त्वं मनसा उपला पाषाणवत्कठिना किमसि इदमयुक्तं भातीत्यर्थः साधवो हि वहिरन्तश्च करुणा भवन्तीति ध्वनितम् ॥ ६६ ॥

भवतीं रणे जितवतो प्यथ मे
भुवि किं यशो मघवदादिजितः ।
अथ चेन्नयामि वलतो भवतीं
भविता सुखाय मम किं मदनः ॥ ६७

अथ चेदहमपि त्वद्वत्कठिनं चित्तं कृत्वा युधि त्वां जेष्यामि तथापि मम को लाभ इत्याह भवतीमिति अथ युद्धे त्वां स्त्रियं जितवतोपि मम इन्द्रादि जितो भुवि किं यशो भविष्यति यद्वा मम किमित्याक्षेपे समासःकुत्सितं यशः मत्यु त अपयशो भविष्यतीति भावः अथ चेत् त्वां वलतो नयामि तर्हि वल कृतो मदनः कामः मम किं सुखाय भविता शृङ्गाररसभङ्गात्र सुखाय भवितेत्यर्थः ॥ ६ ॥

किं त्वां नो व्यथय त्यसौ मनसिजो दृष्ट्वा दयालु र्मृदं
किं वा वारित एष हा मदरिभि र्हन्तुं भवन्तीं सुरैः ।
मय्येवा थ विसृज्य पंचविशिखान् रिक्तो स्य तूणोस्ति किं
य न्मा मर्थिन मीदृशं वरगुणं नो कांचसे चुद्रवत् ॥ ६८ ॥

अथैतां कामः किं न व्यथयतीति हृदि संशय्य तां प्रति स्पष्ट माह कि मिति असौ कामस्त्वां मृदुं दृष्ट्वा किं दयालु र्जातः अत एव शरै स्त्वां न व्यथयति यद्वा एष कामः मदरिभिः मत्कार्यविध्वंसकै र्देवै स्त्वां हन्तुं किं वारितो स्ति एषा मद्विषमनः कर्षिणी त्वया न हन्तव्येति वारित इत्यर्थः किं वा वारिभिः, ममारिभि स्त इतश्चै स्त्वां हन्त हन्तुं सुरैः । अथवा असौ मय्येव पंचसंख्याकान् स्वबाणान् विसृज्याधुनास्य तूणो निषङ्गः किं रिक्त शून्यो जातः शून्यनिषङ्गत्वादधुना त्वां हन्तुमसमर्थो जात इत्यर्थः यद्यस्मात् ईदृशं वर गुण मर्थिनं याचकं मां चुद्रवत् नो कांचस कामस्य पंचवाणास्तूक्ताः उन्माद नस्तापनश्च शोषणः स्तम्भनस्तथा संमोहनश्च कामस्य पंचवाणाः प्रकीर्तिता इति ॥ ६८ ॥

कुशल मति रसज्ञं मां विहाया द्य मोहा
त्पुन रथ शठ मन्यं कंचि देत्य स्मरार्ता ।
उदित मिद ममंदं तर्हि मन्दोदरीव स्वय
मविदुषि पश्चात्तपासि त्वं स्मरंती ॥ ६९ ॥

न केवलं मयि त्यक्ते ममैव हानिः किन्तु तवापीत्याह कुशलमिति हे अविदुषि मूढे अद्य कुशलं अतिरसज्ञं च मां मोहात् अज्ञानात् विहाय अथ पुनः कालान्तरे स्मरार्ता सती कंचिदन्यं शठं मूर्खं प्राप्य तदिदममंदं हितं मम उदितं संस्मरन्ती सती त्वं मन्दोदरीव स्वयं पश्चात्तप्स्यसि यथा मन्दोदरी काचिन्नृप पुत्री कुशलं भूपं मोहा त्यक्त्वा पुनः कामार्ता कंचिद्रूपं प्राप्य सखीनां वचः स्मरन्ती पश्चात्तापं चकार तद्वत्त्वमपि भविष्यसीत्यर्थः एतदेवोपरिष्टाद्व-र्णयिष्यते ॥ ६९ ॥

श्रीमाञ्शंभो स्वरणसदनीभूतहृ त्कम्भुनाथो
लक्ष्मीनाथं कविपरिवृढं देशकोसूत यं मां ।
तेनो क्लीते महिष निधने गीत लक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति मगमत्सर्ग एषोष्टमोपि ॥ ७० ॥

श्री मानित्यादि पूर्ववत् ॥ ६९ ॥

इतिश्रीलक्ष्मीकाव्ये भगवती महिष संवादोनामाष्टमःसर्गः ८

इति श्री लक्ष्मीकाव्यव्याख्याया मष्टमः सर्गः ॥ ८ ॥

सा सर्वगाप्युदित मस्य निशम्य सम्यक्
पप्रच्छ दैत्यरिपुपुङ्गव मत्र्य तम् ।
कस्यात्मजा कमथ भूपवरं जहौ सा
मन्दोदरि गदसि यां शठ मापकं वा ॥१॥

ॐ नमो विघ्नहर्त्रे अस्मिन्सर्गे मन्दोदरी वृत्तं वर्णयिष्यति तावदुदितं निशम्य भगवती पप्रच्छेताह सेति सा भगवती अस्य महिषस्य मन्दोदरी दृष्टान्तरूप मुदितं निशम्य सर्वगापि गमेर्ज्ञानार्थत्वेन सर्वज्ञापीत्यर्थः तं दैत्येंद्रं अपृच्छत् सम्यक् विस्तरेण पप्रच्छ किमित्याह हे महिष यां त्वं मन्दोदरीं गदसि सा कस्य आत्मजा पुत्री बभूव अथ कं भूपवरं जहौ तत्याज अथ च पुनः कामार्ता सती कं शठं मूर्खं प्राप इति वद अस्मिन्सर्गे वसन्ततिलका वृत्तम् उक्तावसन्ततिलका तभजाजगौग इति लक्षणात् ॥ १ ॥

पृच्छत्यसौ स्मितपुरस्सर मादरा न्मां
जातस्पृहा मयि तदित्य वगत्य मत्या ।
प्रत्नेतिहास मिति हाससमंचितास्य
स्तां सूचिवानुचितगुंफितचारुवर्णम् ॥ २ ॥

पृच्छतीति असौ देवी यस्मात् ईषद्धासपूर्वकं आदरात् मां पृच्छति तस्मात्मयि जाता स्पृहा यस्या स्ताहृशो ज्ञातेति मन्ये स महिषः इति बुद्धया निश्चित्य हासेन स मंचितास्यः सन् तां प्रति इति वक्ष्यमाणं पुरातन मिति हास सूचिवान् कीदृशं तद्रंजनाय उचितेषु स्थानेषु गुम्फितानि ग्रथितानि चारूणि वर्णानि यस्मिन् यद्वा वचनक्रियाविशेषण मिदम् ॥ २ ॥

आसी दसीमगुणमंडितपंडितेंद्राधिष्ण्ये
यता मुपगतो धनिनां निधानम् ।
सर्वर्तुकालफलशालिविशालशालः
ख्यातो जने जनपदः खलु सिंहलाख्यः ॥ ३ ॥

तावत्कथावतरणाय देशनाम संकीर्तयति आसीदिति हे सुन्दरि अस्मिन् लोके प्रसिद्धः कश्चित् सिंहल नामा जनपदो देश आसीत् कीदृशः असीम गुणै मंण्डितानां पण्डितेन्द्राणां अधिष्ठानता मुपगतः यत्रेदृशाः निवसन्तीत्यर्थः तथा धनिनां निधानं निधिः तथा सर्वेषु वसन्तादिषु ऋतुषु फलशालिनो विशाला वृत्ता यस्मिन् नीदृग्जनपदोदेश विषया वितप्रसरः ॥ ३ ॥

तस्मिन ररा्ज सकलावनिपालचक्र
चूडामणि र्धरणिपाल न सक्तचेताः।
जेता द्विषां सुकृतवान्यशसा वदातो
दाता र्थतो प्य धिक मर्थिषु चन्द्रसेनः॥ ४ ॥

तस्मिन्निति तस्मिन् देशे चन्द्रसेन नामा राजा रराज को० सकलाना मवनिपालानां व्रजस्य चक्रस्य चूडामणिः तथा धरण्याः पालने एव सक्तं चेतो यस्य तथा द्विषां जेता सुकृतवांश्च यशसा अवदात उज्वलः तथा अर्थिषु याचकेषु अर्थतः तैः कृतयाचनातोऽप्यधिकं दाता यथा केनचित् शतमर्थितं तस्मै सहस्रं ददौ चक्रः कोकेपुमान् क्लीबं हजे सैन्यरथांगयो रिति हैमः ॥ ४

यस्मिन् प्रशासति भुवं श्रुतिवद्वरिष्टे
न्यायेन दंडभृति सर्वगुणप्रवीणे।
कीदृग्भव त्यहह दुःख मदृष्टवत्त्का
स्त्रे षु दृष्ट मपि कल्पयतिस्म लोका॥ ५ ॥

यस्मिन्निति यस्मिन् श्रुतिविल्व, वरिष्टे न्यायेन च दंडभृति सर्वगुणेषु चन्द्रसेने भुवं लक्षणया तन्निवासिजनं प्रशासति सति लोको जनः शास्त्रेषु प्रतिपद्यमानं दृष्टमपि दुःखं अहहे त्याश्चर्ये दुःखं कीदृशं भवति इति अदृष्टवत्कल्पयति स्म यद्वा अदृष्टवत् दैववत् यथा दैवं शास्त्रेषु दृष्टमपि कीदृशं दैवं भवतीति लोकः कल्पयति तस्यराज्ये दुःखं कुत्रापि नासीदित्यर्थः ॥ ५ ॥

गोत्रं श्रितं च स सदा वद मंद वंधुः
देवा न यष्ट न पपावपि वारुणीं सः।

ना स्मिन्बभूव मृगया न रति र्न भारं
पुंसां ददौ शिरसि यज्ञततिं च तेने

अथास्य श्लेषेणाष्टदिक्पालेभ्योऽप्यधिक्यमाह गोत्रमिति स चन्द्रसेनः गोत्रं स्वकुलं सदा आवत् ररक्ष अथ इन्द्रादप्यधिको भवत् इन्द्रो हि गोत्राणांपर्वतानां नाशकत्वात् गोत्रहेति नाम्ना प्रसिद्धः तथा श्रित मान्त्रितमप्यावत् अतोऽग्ने रधिकः अग्निर्हि आश्रया शतया प्रसिद्धः तथा स अमंदा अतिभोग्या कुशला वा वंधयो यस्य तादृश आसीत् अतो यमाधिकः यमो हि मन्दस्य शनैश्चरस्य वन्धु र्भ्रातास्ति तथा सदेवान् अयष्ट पूजयामास अतो नैर्ऋताधिकः स हि देवविरोधकः अथ स पंचमहापातकेषु गणितां वारुणीं मदिरामपि न पपौ अतो वरुणाधिकः स हि वारुणीं पश्चिमदिशं ययौ पालयामास तथा ऽस्मिन् राज्ञि या जीववधरूपा मृगया तथा रतिः कामाभिलाषापि न बभूव अतो वायो रधिकः स हि मृगाणां याने वाहनेरतिः प्रीति र्यस्य तादृशोऽस्ति तथा स पुंसां शिरसि दंडरूपं भारं न ददौ अतः कुवेरादधिकः स हि नरवाहनत्वात् पुंसां शिरसि भारं ददाति अथ च स राजा यज्ञानां ततिं वितेने विस्तारितवान् अतईशादधिको भवत् स हि यज्ञध्वंसितया प्रसिद्धः गोत्रः शैले गोत्रं कुलाख्ययो रिति हैमः मंद स्तोक्ये च मूर्खे च स्वैरे चाभाग्यरोगिणोः अल्पे च चिषु पुंसि स्या हलिजाल रे शनाविति विश्वः ॥ ६ ॥

तस्या नुरूपगुणरूपवदान्यताढ्या
साध्वीगणस्य पुरतो गणनीयकीर्तिः ।
राज्ञी शुभा गुणवतीति यथार्थनाम्नी
छायेव सा भव दिनस्य सदानुकूला ॥ ७ ॥

तस्ये ति तस्य राज्ञो गुणवतीति यथार्थनाम्नी शुभाराज्ञी सूर्यच्छायेव सदानुकूला ऽभवत् सूर्यस्य हि[छायेति] नाम पत्नी अस्ति यथा तस्य स्वामिनःसा छायेवानुकूला अभवत्[कीदृशी तस्य राज्ञःअनुरूपा तुल्या गुणा मर्यादादयः रूपं सौंदर्यं वदान्यता औदार्यं च ताभिराढ्या युक्ता तथा साध्व

गणय ग्रे गणनोया कोपि ग्रंथः यदा यदा लोके पतिव्रतानां गणन मकारि तदा तदा सा ऽग्रे गणनीयासीदित्यर्थः ॥ ७ ॥

प्रत्यापगं प्रतिवनं प्रति चंद्रशालं
प्रत्यालयं प्रतिवरप्रमदावनं च।
रेमे तया बहुसमाःस्वसमानकांत्या
रत्यायथा रतिपतिः स जगत्यधीशः ॥ ८ ॥

प्रतीति स जगत्यधीशः स्वसमाना कांति र्यस्या स्तया राज्ञ्या सह आ- पगां आपगां प्रति एवं प्रतिवनं चन्द्रशाला शिरोगृहं तां प्रति च तथा प्र- त्यालयं तथा वरं यत्प्रमदावनं अन्तः पुरोचितं उपवनं तत्प्रति च बहुसमा- बहु वर्षाणि रेमे कया क इव रत्या रतिपति रिव समा इति काला ध्वनो- र्नैरंतर्ये इति द्वितीया स्यादेतदेव प्रमदावन मन्तः पुरोचित मित्यमरः ॥ ८ ॥

गर्भे थ सा प्रथमके सुषुवे कुमारीं
चंद्राननां कुमुदिनी सरसीव रम्यां।
तंतो र्विसस्य यद भू त्तनु मध्य मस्या
मंदोदरीति स नृपो कृत नाम तस्मात् ॥ ९ ॥

गर्भेइति सा गुणवती राज्ञी प्रथमके गर्भे चन्द्राननां कुमारीं सुषुवे कां केव रम्यां कुमुदिनीं सरसीव अथ यस्माद स्याः कुमार्या मध्यं विसस्य मृणालस्य तंतोरपि तनु सूक्ष्म मभूत् तस्मात्सभूयस्तस्या नाम मन्दोदरीति अकृत मल्प मुदरं यस्या इति निरुक्तिः ॥ ९ ॥

इंदोः कले व ववृधे थ दिने दिने सा
तां वीक्ष्य सिंधु रिव भूमिपति र्ननंद
कौमारयौवनजसंधि गतां वरार्हां
दृष्ट्वा थ तां स मनसा समवाप चिंतां ॥ १० ॥

इंदोरिति अथ सा मन्दोदरी सितपक्षे इन्दोः कलेव दिने दिने ववृधे अथ सः राजा तां वर्धमानां वीक्ष्य सिन्धु रिव ननंद यथा वर्धमाना मिन्दुकलां

वीक्ष्य समुद्रो मोदते तद्वदित्यर्थः अथ स राजा कौमारयौवनाख्याभ्यां वयस्था विशेषाभ्यां जातो यः सन्धि स्तस्मिन्प्राप्तां तां पुत्रीं वरयोग्यां वीक्ष्य मनसा चिन्ता मवाप ॥ १० ॥

अन्वेषणाय नृपलक्ष्मजुषो वरस्य
सत्कर्मठं निजपुरोधस मादिदेश
आज्ञा मिमां रहसि सो प्यधिगत्य राज्ञः
पश्यन्बहून्नृपसुता न्विचचार देशान् ॥ ११ ॥

अन्विति अथ द्वात्रिंशन्नृपलक्षणवतो वरस्यान्वेषणाय सत्कर्मणि कुशलं स पुरोहित मादिदेश स पुरोहितोपि इति नृपाज्ञां रहसि एकान्ते अधिगत्य तथेत्यङ्गीकृत्य बहून् तादृशलक्षणोपेतान् नृपसुतान् पश्यन्सन् बहून् देशान् विचचार सत्कर्मणि घटते इति सत्कर्मठः कर्मणि घटो ठच् ॥ ११ ॥

आगत्य सो थ नृपतिं जगदे द्विजेंद्रो
राजेंद्र हक सुखकरो जयतींद्रदेशः
तस्या धिप स्त्व मिव धर्मधनः सुधन्वा
नाम्ना विभाति धृतखड्ग निषंगधन्वा ॥ ११ ॥

आगत्येति अथ स द्विजेन्द्रो देशान् भ्रमित्वा पुनरागत्य तं नृपतिं चन्द्रसेनं जगदे हे राजेन्द्र दृशोः सुखकरः कश्चिदिन्द्रदेशः जयति सर्वोत्कर्षेण परिवर्तते तस्याधिप स्त्वमिव यथा त्वमसि तथाधर्म एव धनं यस्य तादृशः सुधन्वेति नाम्ना विभाति कीदृशो धृतः खड्गो निषङ्गो धनुश्च येन ॥ १२ ॥

तस्या त्मजो खिलकलाकुशलोस्ति
कंबुग्रीवाभिधः श्रुतिमहार्णवतीर्णपारा
द्वात्रिंशता नृपति लक्ष्मभिरीक्षणीयो
युक्त स्सते दुहितु रस्ति पति र्वरीयान् ॥ १३ ॥

तस्येति तस्य सुधन्वनः पुत्रः कंबुग्रीवेति नामास्ति कीदृशःअखिलासु कलासु कुशलः तथा श्रुतिरूपस्य महार्णवस्य तीर्णः पारो येन सर्ववेद पारगामीत्यर्थः

तथा द्वात्रिंशत् मिते नृपाणां लक्षणे रोचणीयः दर्शनीयः स एव वरीयान् तव पुत्र्या युक्तो योग्यः पतिरस्ति ॥ १३ ॥

श्रुत्वा नृपो तिमुदितो गदितं तदीयं
चख्यौ समस्त मपि वृत्त मथो महिष्यै
प्राहस्म सापि तनया मयि पुत्रि
कंबु ग्रीवाय दित्सति नृपो भवतीं वराय ॥ १४ ॥

श्रुत्वेति स नृप स्तदीयं गदितं वचः श्रुत्वा अति मुदितः सन् अथ समस्तमपि वृत्तं महिष्यै गुणवत्यै चख्यौ सा गुणवत्यपि तनयां मंदोदरीं प्राहस्म अयि पुत्रि त्वां राजा कंबुग्रीवाभिधाय वराय जामात्रे दातु मिच्छति ॥१४

आकर्ण्य से ति जगदे जननीं विरक्ता
मात र्न मे पतिपरिग्रहणे स्ति लिप्सा
स्वातंत्र्य मेव सुख मत्र वदंति मोक्षं
यत्पारतंत्र्य मतिवंध मिदं च दुःखम् ॥ १५ ॥

आकर्ण्येति सा मन्दोदरी इत्याकर्ण्य विषयेभ्यो विरक्ता सती जननीं जगदे हे मातः मम पतिपरिग्रहणे वांछा नास्ति ननु पतिं विना कथं सुखं प्राप्स्यसीत्यत आह बुधा अत्र यत् स्वातंत्र्यं स्वेच्छाविहारित्वं तदेव सुखं मोक्षं च वदन्ति यच्चात्रपारतंत्र्यं तत् अतिवंधं मत एव दुःखं वदन्ति ॥ १५ ॥

पत्या समं परिणये जननि प्रवृत्ते
वक्तव्य माज्य भुजि साक्षिणि भर्तुरग्रे
आजीवनांत मिहते स्मि सदा नुकूला
साध्वीव्रतं परिचरंत्यन्तं न चैतत् ॥ १६ ॥

ननु तत्रापि स्वातंत्र्यं किं नास्तीत्यतआह पत्येति हे जननि पत्या सह विवाहे प्रवृत्ते सति आज्यभुजि अग्नौ च साक्षिणि सति भर्तुरग्रे इदं वक्तव्यं, भवति इदं किं हे भर्तः जीवनपर्यंतं इह पतिव्रता व्रतं परिचरन्ती सती अहं

तव सदैवानुकूलास्मि एतदनृतं न सत्यमेव वच्मीत्यर्थः यतः पारतंत्र्यं प्राप्त मन्यथा प्रतिज्ञा भंगा नरकप्राप्ति रपयशश्चे ति भावः ॥ १६ ॥

याते विदेश मथ काल वशं च पत्यौ
संदह्यते ऽनवरतं विरहाग्नि नात्मा
श्वश्रूजनस्य च वचो न कदा प्युपेक्ष्यं
नाहं वृणे पति मतो दृढनिश्चयो मे ॥१७॥

न केवलमिदमेव तत्र दुःखं किं त्वन्यदपीत्याह यातइति हे मातः पत्यौ विदेशं याते सति अथवा कालवशं याते सति निरन्तरं विरहरूपेणा-ग्निना आत्मा शरीरं साध्वीभिः संदह्यते यद्वा विदेशं याते विरहेण आत्मामनः संदह्यते मृते चाग्निना आत्मा शरीरं संदह्यते इत्यनुक्रमोपि योज्यः अथ च श्वश्रूजनस्यापि वचः कदापि साध्वीभि र्न उपेक्ष्यं युक्तयुक्तं वांगीकार्यमेवे-त्यर्थः इदमपि दुःखं अत एतानि दुःखानि पश्यन्ती अहं पतिं न वृणे अयं मे दृढनिश्चयोस्ति ॥ १७ ॥

दुःखं श्रये बहु न चाल्प सुखस्य हेतोः
को वा पिबेन्मधुमुखं गरलात्त कुंभं
कौमार मेव परमं व्रतमाश्रयंती
नेष्यामि वासरगणं सुखतः स्वतंत्रा ॥ १८ ॥

ननु सुखहेतो र्दुःखमपिश्रेयतइत्यत्रत्याह दुःखमिति हे मातः अल्पसुखस्य ग्राम्यधर्मरूपस्य हेतो र्बहुदुखं पूर्वोक्तं अहं न श्रये दृष्टान्तमाह को हि बुधः किंचि न्मधुमुखे यस्य तादृशं विषपूर्णं कुंभं पिबेत् न कोपीत्यर्थः तर्हि किं-करिष्यसीत्यत्रत्याह तस्मात् कौमारमेव परमं व्रतमाश्रयन्ती स्वतन्त्रा सती सुखतो जीवतांतं दिनसमूहं नेष्यामि ॥ १८ ॥

अस्या विनिश्चय ममुं भिदुरेतरं सा
मत्वा जगाद गुणाव त्यखिलं नृपाय

कार्यं यथा भिलषतीति नृपो गदित्वा
तूष्णीं बभूव विमनस्क इवै तदग्रे ॥ १९ ॥

अस्यादिति अथ गुणवती अस्याः मन्दोदर्या अमुं पतग्रहणरूपं वि. निश्चयं भिदुरेतरं प्रतिज्ञाक्यैर्भेत्तु मशक्यं मत्वा अखिलमपि वृत्तं नृपाय जगाद स नृपोपि सा पुत्री यथाभिलषति वांच्छति तदेव कार्यमिति गदित्वा विमनस्क इव एतस्या राज्ञ्या अग्रे तूष्णीं बभूव ॥ १९ ॥

तस्या रहस्यथ जगाद नृपो वयस्याः
यूयं हि मद्दुहितरं परिबोधयध्वम्
सा बोधनापि बहुधा सुवचोभि राभि
स्तद्वन्मनागपि मनो न दधौ विवाहे ॥ २० ॥

तस्यादिति अथ नृपः एकान्ते तस्याः पुत्र्याः वयस्याः सखीः प्रति जगाद हे सख्यः मत्पुत्रीं यूयमेव विवाहार्थं परिबोधयध्वं अथैत्य माभिस्ता भिराभिः सखीभिः कत्वा सा बहुधा बोधितापि तद्वत् यथा तुमसि तथा मनागपि विवाहे मनो न दधौ ॥ २० ॥

सार्धं सखीभि रथ सो पवनं कदाचित्
स्वैरं विहर्तु मगम द्विकचद्रुमालौ ।
पद्मेषु तत्र विचरं त्यथ सा विरेजे
पद्मेव गुंजदलिपुंजसमाकुलेषु ॥ २१ ॥

सार्धमिति अथ सा कदाचित् सखीभिः सह विकचा द्रुमाणामालयः पंक्तयो यस्मिन् तस्मिन् वने स्वैरं विहर्तुं क्रीडां कर्तुं अगमत् अथ तत्रोपवने गुञ्जद्भिरलिपुंजैःसमाकुलेषु पद्मेषु अंबुजेषु विचरंती सा पद्मालक्ष्मीरिव विरेजे लक्ष्म्या हि कमलेषु निवासः प्रसिद्धः ॥ २१ ॥

तस्माज्ज मंबुजतता ववगत्य भृंगा
स्तस्या मुखाब्ज मपतन्नलिनानि हित्वा ।

सा व्याकुलीभवदधीरदृगन्यतो गात्
सख्याहृता घ कुसुमानि विचेतु मारात् ॥ २२ ॥

सम्राजमिति तत्रांबुज ततो अस्या मन्दोदर्या मुखरूप मब्जं सम्राजं चक्रवर्तिनं मत्वा तत्रत्याभृङ्गाः इतरकमलानि त्यक्त्वा तत्रैवापतन् अन्योपीतर पुरुषान् त्यक्त्वा सम्राजमेवाश्रयति अत्राधिकताद्रूप्य रूपकालङ्कारः अथ सापि तानभिपततो वीक्ष्य व्याकुली भवंत्यो अधीरे चंचले च दृशौ यस्या स्तादृशी सखीभि राहृता सती आरात्समीप एव अन्यतो ऽन्यस्यां पुष्पवाटिकादौ पुष्पानि विचेतु मगात् ॥ २२ ॥

काचि ज्जगौ कलरवा कृत लासा मन्या
पुष्पाणि हर्तु मगम न्नृप कन्ययान्या ।
द्वारे पुमांस मपरा विनिवर्तयंती
तस्थौ सखी श्रितलता त्वपरा हसंती ॥ २३ ॥

अथान्यासां सखीनामपि तत्र चेष्टामाह काचिदिति तत्र काचि त्सखी कलो मधुरा स्फुटो रवो यस्या स्तादृशी सती जगौ गीतं चकार अन्या च लास्यं नृत्य मकृत अथान्या नृपकन्यया सह पुष्पाणि हर्तु मगमत् अपरा तूपवनस्य द्वारे अपरं पुमांसं विनिवर्तयंती सती तस्थौ ध्वनौ तु मधुरा स्फुटे कल इत्यमरः ॥ २३ ॥

व्याकोश मंघ्रिहननै रकरो दशोक
मालिंगनैः कुरुवकं तिलकं विलोक्य ।
सा मालती प्रभृतिषु स्वय मालवालं
सम्य ग्व्यधत्त कृपयाथ कृपीटपूर्णम् ॥ २४ ॥

केवलं तस्या यं ष्टा माह व्याकोशमिति सा मंदोदरी अंघ्रिहननैः पादाहतिभिः अशोकवृक्षं व्याकोशं प्रफुल्ल मकरोत् तथा आलिंगनैः कुरुवकं प्रफुल्ल मकरोत् अथ तिलकं तु विलोक्यैव प्रफुल्लमकरोत् अथ सा मालती प्रभृतिषु यूथका मल्लिकादिषु स्वयमेव कृपया आलवालं सम्यग् व्यधत्त अकरोत

अथ तमालवालं कृपयैव कृपीटेन जलेन पूर्णमपि अकृत तदुक्तम् पादाहतः प्रमदयाविकसत्यशोक स्तद्वज्जहातिमुकुलो मुखसीधुसक्तः आलिंगितः कुरुवकः कुरुते विकाशमालोकित स्तिलक उत्कलितो विभातीति कृपीटमुदकं जले इतिरत्नकोशः ॥ २४ ॥

काचिल्लतां कुसुमितां सरसाधिरूढां
वीक्ष्या ब्रवीत् स्मितमुखी स्मृतभूपगो स्तां
हे राजपुत्रि वरवर्णिनि पश्य चित्रं
पत्या विनेय मिह तिष्ठति नो जडापि ॥ २५ ॥

काचिदिति काचित्सखी सरलद्रुमाधिरूढां कुसुमितां लतां वीक्ष्य स्मृता भूपस्य चन्द्रसेनस्य गोः त्वया मत्पुत्री विबोध्ये त्युपदेशो यया अत एव स्मितमुखी सती तां मंदोदरीं अब्रवीत् हे वरवर्णिनि राजपुत्रि इति चित्रं पश्य इति किं इह इयं जडापि लता पत्या सरलरूपेण स्वामिना विना न तिष्ठति अत स्त्वं विदुष्यपि सती कथं पतिं विना तिष्ठसीति भावः ॥ २५ ॥

इत्थं विहारनिरतास्वथ तासु कश्चित्
भूपो खिलांगसुभग स्तुरगैकरातिः
दूरात् द्रुमानुपवनस्य समीक्ष्य मत्वा
विश्रामभूमिरिति तत्रसमाजगाम ॥ २६ ॥

इत्थमिति अमुना प्रकारेण क्रीडा निरतासु तासु सतीषु अथ कश्चद्भूपः दूरात् तस्यो पवनस्य द्रुमान्वीक्ष्य इयं विश्रामभूमिरिति मत्वा तत्र समाजगाम कीο भूपः अखिलै रंगैः सुभगः तथा तुरग एव एकोरातिः सुहृत् यस्य एकाकीत्यर्थः राति ददाति सुख मिति रातिः कर्तरितिच ॥ २६ ॥

आरामभित्ति मधिगत्य स शाखिशोभां
द्रष्टुं प्रसारितशिरोधि रुपात्तवल्गुः ।
बालां समीक्ष्य कुसुमेषु स काकतालो-
यन्यायतः कृतममंस्त महत् स्वपुण्यम् ॥ २७ ।

आरामेति स भूपः तस्यारामस्य भित्तिं कुड्यं प्राप्य शाखिनां शोभां द्रष्टुं कुड्योपरिप्रसारिता शिरोधिग्रीवा येन तथा उपात्ता गृहीता वल्गु रश्मिर्येन तादृशः सन् तत्र कुसुमप् तां बालां मंदोदरीं वोच्य काकतालीयन्यायेन महत् स्वपुण्यं कृतं अमंस्त अत्र काका गमन मिव तालपतन मिव काकतालमितीवार्थे समासाच्च तद्विषयादिति ज्ञापका समासः उभयथोपमेयं तथा च तस्य तत्रागमनं तत्रैव च तस्या अवस्थानं तेन तस्याश्च समागमः काकतालसमागमसदृश इतिफलति ततश्च काकतालमिव काकतालीय मिति द्वितीयश्चिविवार्थे समासाच्च तद्विषयादिति सूत्रेणैवे प्रतिकृता वित्यधिकारस्थेन छप्रत्ययः तथा च पतितं तालफलं यथा काकेनोपभुक्तं तथा अनायासप्राप्ततद्दर्शनानंद स्तेनानुभूत इत्यर्थः ॥ २७ ॥

किं देवते यमखिलोपवनस्यसाक्षात्
किं वा पुलोमदुहिता किमु कामपत्नी ।
इत्थं वितर्क्य बहुधा स्वगतं समीक्ष्य
द्वाःस्था मपृच्छ दथ वेत्रवती मुपेत्य ॥ २८ ॥

तां वोच्य तर्कयति किमिति इयं किं अखिलस्योपवनस्य साक्षा देवतास्ति किं वा पुलोम्नो दुहिता इन्द्राण्यस्ति किमु कामस्य पत्नीरति रस्ति इत्थं तां बहुधा स्वगतं स्वमनः स्थितमेव वितर्क्य स भूपः अथ द्वारिस्थितां वेत्रवतीं सखीं दृष्ट्वा तत्समीपं प्राप्य प्रकटं अपृच्छत् ॥ २८ ॥

केयं शुभे वरतनू रतनुप्रियाभा
निस्सीम कस्य सुकृतं य इमा मसूत ।
येस्याः सुनाम्नि निचिताः श्रुतिशर्मदाः के
वर्णाः सुवर्णालिपसाधनलेपनीयाः ॥ २९ ॥

कि मपृच्छदित्यतआह केयमिति हे शुभे इयं वरतनुः कास्ति कीदृश अतनोः कामस्य प्रिया रति स्तद्वदाभा यस्याः अथ कस्य सुकृतं पुण्य निस्सीम अपार मस्ति य इमा मसूत जनयामास कस्येयं पुत्रीत्यर्थः अथ च ये वर्णाः अस्या सुनाम्निखचिताः सन्तः श्रुत्योः शर्मदा भवन्ति तेषाः

के सन्ति को० वर्णाः सुवर्णस्य यत् लिपिसाधनं लेखनीप्रभृतिकं तेन लेखनी-स्थाः अस्याः किं नाम स्तोत्रार्थः । २८ ।

सैरंध्र्य् पि प्रतिवचो भिदधे थ राज्ञे
स्ताव द्भवा न्गदतु मे कुलनामनीस्वे ।
तामुक्तवानिति निशम्य पति र्जगत्या
देशः शुभो स्ति कुशले भुवि कोशलाख्यः ॥ ३० ॥

सैरंध्रीति सा सैरंध्र्यपि प्रतिवचः उत्तरं अभिदधे हे राजन् तावत् भवानेव स्वे कुलनामनी मे मह्यं गदतु स राजापि इति श्रुत्वा तां सखीं ऊचिवान् हे कुशले अस्यां भुवि कोशलाख्यः कश्चित् शुभो देशोऽस्ति सैरंध्री परवेश्मस्था स्ववशाशिल्पकारिकेत्यमरः । ३० ॥

तस्या धिपोस्म्यभिधया खलु वीरसेनः
काकुत्स्थवंशजनितो जनगीतकीर्तिः
मां प्राप्त मत्र मृगयावशतो ह्यवेहि
पश्चात् स्थिता स्ति पृतना चतुरंगिणी मे ॥ ३१॥

तस्येति तस्य देशस्य अधिपः अहमस्मि नाम्ना तु वीरसेनोऽस्मि कीदृशः काकुत्स्थवंशे जनितः तथा जनेषु गीता कीर्तिर्यस्य अत्र तु मां प्राप्तं मृगया वशतो जानीहि ननु भूमिपः सर्वं काको कथ मसीत्यतआह मम चतुरंगणीसेना पश्चात् स्थितास्ति ॥ ३१ ॥

एतां ब्रवीतु भवती वचसा ममैतद्
गांधर्वतो थ विधितो महिषी मम स्यात्
नेदृक्स्वरूपगुणशीलयुते स्त्रिताय
न्नैवाधुनावधि तदस्मि गृहीतदारः ॥ ३२ ॥

अथास्याः किमर्थं नामादिकं पृच्छसीत्यत आह एतामिति हे सैरंध्रि तस्मात् भवती त्वं मम वचसा एतामेतद्वचो ब्रवीतु किमित्याह गंधर्वाख्येन गांधर्वः समयान्मिथ इति स्मृत्युक्तलक्षणेन विवाहेन वेदविहितेन वा मम

पट्टराज्ञी स्यात् ननु पूर्वमनूढोसौ त्वतआह यस्मादयादृशः अस्याः संति तादृशैः स्वरूपगुणशीलै र्युताकाप्यन्या पूर्वं मया निश्चिता न दृष्टासीत् तस्मात् अद्याऽवध्यपि अहं गृहीतदारो नास्मि इयमेव मनोनुरूपा मया दृष्टा अतोतयैव नूतनविवाहं कर्तु मिच्छामीति भावः ॥ ३२ ॥

श्रुत्वे ति सा पि सहसा महसांचितास्या
गत्वा ब्रवीच्छितनया तनयां नृपेंद्रोः
त्वद्भाग्यतः स्मरसमो रसमोहितो सौ
प्राप्तः स्वयं वितरणे तरणे स्तनूजः ॥ ३३ ॥

श्रुत्वे ति सा सैरंध्र्यपि इति श्रुत्वा हसेन हास्येन सहितं मत एवां चितमास्यं यस्या ईदृशी सती सहसा शीघ्रं गत्वा नृपेन्द्रो स्तनयां मंदोदरीं अब्रवीत् कीदृशो श्चितो नयो नीति र्ययानीतियुक्तं वचो ब्रवीत् इत्यर्थः हे नृपकन्ये त्वद्भागात एव असौ भूपः स्वयमागतः कीदृशः स्मरेण समस्तुल्य रूपः किंवांच्छतीत्यतआह रसेन तव शृङ्गारेण मोहितः त्वां धर्मपत्नीं कर्तुमिच्छतीत्यर्थः तथा वितरणे दाने तरणेः सूर्य्यस्य तनूजः पुत्रः कर्ण इवास्ति यद्वा वितरणे तत्पर इत्यध्याहार्यं तथा तरणेः सूर्य्यस्य तनूजः सूर्यवंशीय इत्यर्थः यद्वा वितेतीकारच्युतकं तथा वत खेदे रणे युद्धे तरणे स्तनूजो यम इवेत्यर्थः यद्वा वितरणे इतिसंबोधनं विगता तरिर्णौः संसारसागरे नौकावदा श्रयरूपः पति र्यस्यास्तत्संबुद्धौ हे वितरणे निराश्रये राजपुत्रि अयं तरणे स्तनूजः सूर्य्यवंशीय इत्यर्थः ॥ ३३ ॥

रूपेण भाति हिमगु र्गुरु रेष मत्या
शौर्येण शक्र इव नीरधि वद्गभीरः
ऊढामुना सुमुखि भासि न चान्यथा त्वं
रत्नं विभाति न विना क्व च कांचनेन ॥ ३४ ॥

रूपेणेति एव भूपः रूपेण चंद्रो भाति बुध्या च बृहस्पति र्भाति शौर्येण शक्र इव भाति नीरधिवद्गंभीरो भाति हे सुमुखो अमुना राज्ञा ऊढा विवा

इतैव त्वं भासि अन्यथा न नन्वोदृक् सौंदर्यवत्येवं न विभासीत्यत आह यतः कांचनेन विना क्वचिदपि सुंदरमपि रत्नं न विभाति तथा त्वमपीत्यर्थः ॥ ३४

तातोपि ते सुदति चेतसि खेदयुक्तो
नित्यं समादिशति नो रहसि त्वदर्थं ।
अंगीकरोषि यदिदं सुखिनः स्म एते
तातस्त्वमेव नृपति स्तु मयो वयं च ॥ ३५ ॥

ननु मम विवाहे न वांछास्तीत्यत आह तातइति हे सुदति तव तातोपि त्वदर्थं नितरं चेतसि खेदयुक्तोस्ति अतो निच्छंत्यपि त्वया पितृखेदहरणाया वश्यमेवैतत्कार्यमित्यर्थः ननु तया कथं सखेदयुक्तो निर्णीत इत्यत आह यतो नितरामेव एकांते त्वदर्थं अस्मान् सखीः समादिशति मत्सुतां परिबोध्येत्याज्ञा पयति एवं सति न केवलं तव पितैव सुखी भविष्यति किं त्वन्येपीत्याह यदि इदं मद्वचः अंगीकरोषि एते वयं सुखिनः स्मः के इत्याह तव पिता एव नृपति श्च तथा त्वमपि अथ वयं सख्यश्च उपलक्षणमेवैतत् मातृभ्रातादयोपीत्यर्थः अत्रास्मदउत्तरत्वा त्तदाश्रितत्वादस्ते रुत्तमपुरुषः ॥ ३५ ॥

उक्तेति सा प्रतिवचो भिदधे मृगाक्षी
किं वच्मि हे सखि वृणे न पतिं कदापि ।
कौमार मेव नितरां व्रत माश्रये हं
कामो न धर्षितु मलं हृदयं मदीयं ॥ ३८ ॥

उक्तेति सा मृगाक्षी मंदोदरी इति तयोक्ता प्रतिवचोऽभिदधे हे सखि त्वं किं वच्मि गदसि अहं तु पतिं कदापि न वृणे तर्हि किं करिष्यसीत्यत आह कौमारमेव व्रतं नितरा मह्माश्रये तर्हि कामपीडां कथं सहसे इत्यत आह मदीयं हृदयं कामो धर्षितु मलं समर्थो नास्ति विरक्तत्वादित्यर्थः ॥ ३६ ॥

भूयो पि साथ नृपजां जगदे वयस्या
मुग्धे मुधैव करगां नु सुधां जहासि।

नातः पुरा जगति को पि जिगाय कामं
पश्चात् स्मरिष्यसि हि मद्वचसः स्मरार्ता ॥ ३७ ॥

भूयइति स सखी भूयोपि तां नृपजां जगदे हे मुग्धे वृथैव करे प्राप्तां सुधां त्यजसि अथ कामो मया जित इति तद्वचो ऽपाकरोति हे नृपजे अतो पूर्वं इह जगति कोपि कामं न जिगाय न जितवान् यद्वा कोपि ब्रह्मापि न: जितवान् तस्य स्वपुत्र्या मपराभिगमनात् अयामद्वचसःकालांतरे कामार्तासति पश्चात् स्मरिष्यसि तदुक्तं प्रबोधचंद्रोदये अहिल्यायाः जारः सुरपतिरभूदात्म तनयां प्रजानाथोयासी दभजत गुरो रिंदु रबलां इतिप्रायः को नानपद मपथे कार्यंतमयाश्रमो मदाणानां क इव भुवनो न्माथ विधि ष्विति ॥ ३७ ॥

रोषा द्वयो पुन रुवाच सखीं स्थितां सा
पित्रोर्गिर स्तव किं मस्ति वचो तिरिक्तं
एनं निवारय तदेत्य नृपंयथेष्टं
देशं प्रयातु खलु नैषु तिलेषु तैलम् ॥ ३८ ॥

रोषादिति अथ सा मंदोदरी तां पुरःस्थितां सखीं पुनः रोषादुवाच हे सखि तवेदं वचः किं पित्रोः मातापित्रोः गिरः सकाशात् अतिरिक्त मधिक मस्ति तयोर्वच उल्लंघ्य तव कथमंगीकुर्यां मितार्थः तस्मादेनं नृपं निवारय यथेष्टं देशं प्रयातु कथं निवारयामीत्यत आह इति तं कथय हे नृप खलु निश्चयेन् एषु तिलेषु तैलं नास्ति अस्यां कामो नास्तीतिभावः लोकोक्ति रलंकारः ॥३८॥

सा न्यक्कृतेति त मुपेत्य नृपं बभाषे
नेयं भवंत मिह वांछति राजपुत्रि ।
निर्गंधि रित्यथ स तां कलिका मिवालि
मत्वा निराशमनसा भियया निजाशां ॥३९ ॥

सेति इत्थं तयान्यक्कृता तिरस्कृता सा सखी त नृपं प्राप्य बभाषे हे नृप इयं राज पुत्री भवंत मिह न वांछति अथ सोपि नृपः निर्गतः कामस्य गंधो

लिग्धो यस्या ईदृगोय मिति तां मत्वा निराश्रमनसा निजाशां स्वदिशं प्रतिययो कां क इव निर्गंधि रिय मिति कलिकां मत्वा भ्रमर इव अत्र निराशस्यापि स्वाशां प्रतिगमनात् विरोधाभासा लंकारः गंधो गंधक आमोदे संबंधे लेशग-र्वयो रिति हैमः ॥ ३६ ॥

तस्या भगिन्यवरजेंदुमतीति नाम्ना
योग्या वरस्य महिषीवदनेन राज्ञा।
त्वं कीदृशं वर मभीप्ससि चेति पृष्टा
साथ स्वयंवर मिदं शनकै रवोचत् ॥ ४० ॥

तस्याइति अथ तस्या मन्दोदर्याः अवरजा कनिष्टा भगिनी इन्दुमतीति नाम्ना आसीत् सा तु वरस्य योग्या यौवनोपेता यदा जाता तदा राज्ञा चन्द्र-सेनेन त्वं कीदृशं वरं कांक्षसे इति स्वराज्ञो मुखेन पृष्टा अथ सा इन्दुमती-मातु र्वचः श्रुत्वा स्वयं वरं इदमेव लज्जया शनैकै रवोचत् ननु स्वयंवर मित्य-स्याग्रे वांछामीत्याद्यपि तयोक्तं सलज्जत्वादतस्तदध्याहार्यमि त चमत्का-रातिशयः ॥ ४० ॥

आकर्ण्य भूपति रपीति वचोति हृष्टः
सर्वा न्नृपान्प्रति चरान् निजपत्रहस्तान्।
पुत्रीस्वयंवर विधेः परिपूर्तिहेतो
रानेतु मीप्सितसमस्तदिशो दिदेश ॥ ४१ ॥

आकर्ण्येति अथ भूपति रपि राज्ञी मुखात् इति वचः श्रुत्वा अतिहृष्टः सन् स्वपुत्र्याः स्वयंवरविधेः परिपूर्णतार्थं सर्वान्नृपान् प्रति निजानि पत्राणि हस्तेषु येषां तान् चरान् गूढपुरुषान् तान् नृपाना नेतुं दिदेश आज्ञप्तवान् कीदृशान् ईप्सिता दृष्टाः समस्ता दिशो यैः ॥ ४१ ॥

पश्चात्तदीयशिविरोत्तरणाय भूमीः
संस्कृत्य तत्समुचिताखिलवस्तुपूर्णाः।

आस्तीर्य पुष्पचय मध्वसु चारुगंधिं
स्वर्गस्वसार मसृज न्निजराजधानीं ॥ ४२ ॥

पथादिति तान् त्वरयित्वा सन्नृपः पश्चात् तेषां राज्ञां शिविरस्य निवेशस्य उत्तरणाय स्थित्यर्थं तेषां राज्ञां योग्यैः सर्ववस्तुभिः पूर्णाः भूमोः संस्कृत्य संशोध्य मार्गेषु सुगन्धिं पुष्पचयं आस्तीर्य निजराजधानीं स्वर्गसमानां स्वर्गतुल्या मसृजत् व्यरचयत् स्वसारोहि प्राय स्तुल्यरूपा भवन्ति भगनी स्वसेत्यमरः॥४२॥

तत्रा ययु र्युधिवुधाः विविधा युवानो राजान उज्वलधियो ज्वलदुत्प्रतापाः। सेनावृता मुकुटकुंडलमंडितांगाः शूराः शचीपतिपुरी मिव लोकपालाः ॥ ४३ ॥

तत्रेति तत्र नगरे विविधा युवानो राजानः आययुः कीदृशाः युधिवुधाः कुशलाः तथा उज्वलाधियो येषां तथा ज्वलन् उत्कृष्टः प्रतापो येषां तथा सेनाभि र्वृताः तथा मुकुटकुंडलादिभि र्मंडितांगाः तथा शूराः भटाः कां क इव शचीपति पुरी ममरावतीं लोकपाला इव ॥ ४३ ॥

केचिन्नृपा नृपतिनाथ विलिख्यहूताः श्रुत्वैव केचन परे तु दिदृक्षयैव । अन्ये स्वयंवर विधौ खलु मंडलेशाः शुश्रूषि तुं नृप मयुर्मयुनाथकल्पम् ॥ ४४ ॥

केचिदिति तत्र केचित् नृपाः नृपतिना चन्द्रसेनेन स्वयं विलिख्य हूता आकारिताः सन्तः अयुराजग्मुः केचिच्च स्वयंवरं श्रुत्वैवाजग्मु परेतु तत्कौतुकस्य द्रष्टु मिच्छयैव अन्येतु मंडलेशाः राज्ञा स्वमंडलेष्वधिकृताः भूपाः तत्र स्वयंवरविधौ नृपं चन्द्रसेनं शुश्रूषितु माजग्मुः कीं० नृपं मयूनां नाथः कुबेरस्तत्तुल्यं अयुरिति या प्रापणे इत्यस्मा ल्लिङि रूपं ॥ ४४ ॥

आतिथ्य मिष्ट मुकल्प्य नृपोथ तेषा मुत्तार्य चारु भवनेषु निवेश मेषां। नो याचत मस्तु किं मभीहतु कस्य वस्तु स्वानित्युवाच सचिवां स्तदुपासनेषु ॥ ४५ ॥

आतिथ्यमिति अथ नृपचन्द्रमेन सर्वेषां राज्ञां इष्टं योग्य मातिथ्य मुपकल्प्य रचयित्वा एषां च चारुषु भवनेषु निवास मुक्तार्यं अथ तेषां उपासनेषु परिचर्यासु स्वान्सचिवान् इत्थं उवाच इति किं हे सचिवाः अत्र कस्यापि राज्ञो भृत्यस्य वा किमपि स्वाभिप्सं वस्तु शय्यामनादि याच्यं तास्तु यद्यत् याच्यं तत्तदये एव तत्र देयमित्यर्थः क्रमादातिथ्यातिथेयावतिथ्यर्थेऽत्र साधुनी त्यमरः ॥ ४५ ॥

> अन्येद्यु रुद्यदुशनस्य भितो नवद्यो
> सिंहासनेषु विनिवेश्य स भूपसिंहान् ।
> पुष्पस्रजं भ्रमरिणीं दधतीं स्वपुत्रीं
> तत्रानिनाय लतिका मिव शाखिमध्ये ॥ ४६ ॥

अन्येद्यु रिति उद्यत् उशनाः शुक्रो यत्र एवं सर्वतोऽन्यग्रहचर्चादिभि रप्यनवद्ये निर्दोषे अन्यस्मिन् दिने स चन्द्रमनःभूपतिसिंहान्सिंहासनेषु विनिवेश्य भ्रमरयुक्तो पुष्पमालां करे दधतीं स्वपुत्री मिन्दुमतीं तत्र आनिनाय कस्मिन् कामिव शाखिनां मध्ये भ्रमरयुतपुष्पमालां दधतीं लतिका मिव अन्येद्यु रिति पदत्वरा रीत्यादिना निपातनादव्ययम् ॥ ४६ ॥

मूर्तेव तां प्रति मति र्जगती तु काचि द्राज्ञां क्रमा द्विषयनाम गुणान्ववायान् । संकीर्तयन्त्यथ वलंव्य सुवर्णयष्टिं बभ्राम तत्र शनकै र्विदिताखिलार्था ॥ ४७ ॥

मूर्तेति अथ तया सह तत्र काचित् प्रतिहारा सुवर्णयष्टि मवलंव्य शनके र्बभ्राम कादृशी मूर्ति धारिणीमति रिव प्रतिबुद्धिमतीत्यर्थः तथा ता मिन्दुमतीं प्रति तत्र स्थितानां राज्ञां क्रमात् विषयो देशः नाम च गुणश्च अन्ववायो वंशश्चैतान् संकीर्तयन्ती अय मेतद्देशीयो राजा इद मस्य नाम एतत् गुणोपेता एतद्वंशीयश्चेति तां प्रति कथयन्तीत्यर्थः कुतः सर्वेषां देशादिकसूचनवतीत्यत आह विदिता अखिला अर्था भावा यस्याः अति चतुरा सर्वज्ञेत्यर्थः ॥ ४७ ॥

सा श्री रिवेश भवने विंजहौ तु यं यं निःश्रीकतां स स बभार हृदा तिदूनः । यं यं तु पार्वणसुधांशुमुखी प्रपेदे तेषां बभु र्विकसितानि मुखांबुजानि ॥ ४८ ॥

सेति सा इन्दुमती श्रीरिव य यं भूपं नामादिकं श्रुत्वा तत्याज सः भूप हृदयेनातिदुःखितः सन् निःश्रीकतां बभार ॥ श्रिया त्यक्तो हि जनोगत श्री र्भवति अथ क्रमा त्सा पूर्णचन्द्रानना यं यं तु प्रपेदे प्राप्तवती तेषां मुखरूपाण्यम्बुजानि प्रफुल्लानि सन्ति बभुः इयमस्मानेव प्राप्स्यतीति मोदेनेत्यर्थः ॥४८॥

कश्चि न्नृपो वरगुणः सुमनः प्रकाशः श्रीमा न्महोज्वल उरुद्रविणानुगालिः । तत्रं नया तदनुरूपिकया थ वव्रे मंजुस्रजा सदसि पश्यति राजवृन्दे ॥ ४९ ॥

कश्चिदिति अथ तयेन्दुमत्या तेषां मध्ये कश्चिन्नृपः तदनुरूपिकया तद्योग्यया मंजुस्रजा कृत्वा वव्रे वृतः क सति सभायां राजसमूहे पश्यति सति को० नृपः श्रेष्ठा गुणा यस्य यद्वा वराणां जामातॄणां यावन्तो गुणा मृग्यन्ते तावन्तस्सन्त्यस्मिन् तथा सुमनसो देवा स्तद्वत्प्रकाशो यस्य यद्वा सुष्टु शोभनः मनसः प्रकाशो यस्य उदारमना इत्यर्थः तथा श्रीमान् शोभावान् लक्ष्मीवान्वा तथा महान् उज्वलो दीप्तः महानुज्वलः शृङ्गारोस्येति वा महेन उत्सवेनोज्वल इति वा महसा तेजसा ज्वलतीति वा तथा उरु बहुलं द्रविणं धनं विद्यते यस्य ईदृशी अनुरागानां किंकराणामालिः पंक्ति र्यस्य किंकरा अपि धनाढ्याः सन्तीत्यर्थः यद्वा उरु द्रविणं बलं यस्य ईदृशी अनुगालिर्यस्य यद्वाऽनुरूपिकया तस्य भूपस्य तुल्यगुणविशिष्टया स्रजेति कृत्वा तस्या मध्ये तानि विशेषणानि प्रयोक्तव्यानि तथा हि वरो गुणः सूत्रं यस्यां तथा सुमनोभिःपुष्पैःप्रकाशो यस्याः तथा श्रीः शोभा तद्वती तथा महोज्वला महा विशदा तथा उरु बहुद्रविणं धनं मूल्य मिति यावत् यस्याः तथा अनुगाः पश्चाद्गामनो ऽलयो यस्याः यद्वा अनु पश्चाद्गायन्ति भ्रमरा यस्याः यद्वा उरुद्रविणाःमदेत बहुबलवन्तःअनुगाश्च अलयो यस्याः यद्वा तदनुरूपिकयेति इन्दुमती पक्षेपि योज्यम् । तत्रापि नृप वद्विशेषणानि योज्यानि द्रविणं कांचने धने पराक्रमे बलेपि स्यादिति हेमचन्द्रः ॥ ४९ ॥

तां चापभां स्रज मथो नृपतिः स विभ्र न्मौर्वीभवद्भ्रमरसंहति मात्तकण्ठाम् । कस्य भ्रमं न सुमनो धनुषो वितेने सा सूय मीक्षितवत स्तु विना क्षितीशान् ॥ ५० ॥

तामिति अथ तां स्रजं विभ्रत् स भूपः सेर्ष्यं दृष्टवतो ऽन्यभूपा न्विना कस्य जनस्य अयं काम इति भ्रमं न वितेने सर्वोपि तं काम मेव जानाति स्मेत्यर्थः कुत इत्यत आह को०स्रजं चापभां धनु स्सदृशीं तथा मौर्वी भवती भ्रमरसंहति यस्यां तथा आत्तो गृहीतः कण्ठो यया कामस्य हि पुष्पमयं धनुः भ्रमरमयी मौर्वी चास्ति ॥ ५० ॥

सार्द्धं सखीभि रथ सापि गवाक्षमध्ये मंदोदरी निखिलराजक मीक्षमाणा । मद्राधिपं क मपि भूप मुदीक्ष्य दैवा त्पंचेषुलूनहृदया समभूत्तदानीं ॥ ५१ ॥

सार्धमिति अथ सा मंदोदर्यपि स खीभिः सह गवाक्षस्य वातायनस्य मध्ये निखिलमपि राजकं राजसमूहं ईक्षमाणा तेषां मध्ये कमपि मद्रदेशाधिपं भूप मुदीक्ष्य दैवा दुर्भाग्यात् तदानीं पंचेषुना कामेन लूनं छिन्नं हृदयं यस्या ईदृशो अभूत् या विरक्तासा सैव कामवशे यातीत्यर्थः अथ राजकं राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमादिति त्यमरः ॥ ५१ ॥

ऊचे प्रसूं कुरु ममाप्य धुना विवाहं मद्राधिपेन नृपतिं परिबोधयित्वा । श्रुत्वे ति साति मुदिता स्वपतिं वभाषे राजन्सुता परिणिनीषति ते परापि ॥ ५२ ॥

ऊचेइति अथ सा मंदोदरी स्वमातर मूचे हे मातः नृपति चंद्रसेनं बोधयित्वा अमुना मद्राधिपेन भूपेन सह अधुना ममापि विवाहं कुरु सा गुणवत्यपि इति पुत्र्या वचः श्रुत्वा अति मुदिता सती स्वपतिं वभाषे हे राजन् अपरापि तव सुता मंदोदरी अधुना परिणयं कर्तुं वांच्छति ॥ ५२ ॥

आकर्ण्य सोपि मुदितो मुमुदे नितांतं चक्रे परेद्यु रनयो

विंधिना विवाहं । ताभ्या मदादथ तदा बहुपारिवर्हं माणि-
क्यहेमवसनेभ तुरंगमादि ॥ ५३ ॥

आकर्णेति स राजापि इति श्रुत्वा पूर्वमिन्दुमतो स्वयंवरे मुदितोपि पुन र्नितांतं निरंतरं मुमुदे अथ परेद्यु: परदिने अनयो रिंदुमतो मंदोदर्यो: सुतयो विंधिना सह विवाहं चक्रे अथ तदेव ताभ्यां मणिसुवर्णवस्त्रगजाश्वा दिकं बहुलं पारिवर्हं दाजेति भाषया प्रसिद्धं ददौ ॥ ५३ ॥

दासीजनं च बहुलं परिभूषितांगं शुश्रूषणाय सुतयोस्तु स कूकुदो दात् । माता प्यजस्र मथ संस्रवदस्रुभि स्ते संस्नाप्यमूर्ध्नि पुरुहार्दयुतालिलिंग ॥ ५४ ॥

दासीति सत्कृत्यालंकृतां कन्या यो ददाति स कूकुद इत्येवं विध: स राजा तयो: शुश्रूषणाय परिभूषितांगं बहुलं दासीजनं च अदात् अथ तयो र्मात गुणवत्यपि अजस्रं स्रवद्भिरस्रुभिस्ते सुते मूर्ध्नि संस्नाप्य बहुप्रेमयुता सती आलिलिंग ॥ ५४ ॥

इत्थं विसृज्य जगतीपति रात्मजेते अन्यानपि क्षितिभृतो वसुभि: प्रतोष्य । दत्वा धनानि बहुलानि धरासुरेभ्य: स्वात्मा ममाद्य कृतकृत्यइहेत्यमंस्त ॥ ५५ ॥

इत्थमिति एवं स: चंद्रसेन: ते आत्मजे विसृज्य अथान्यानपि भूपान् वसुभि धनै: प्रतोष्य धरासुरेभ्यो विप्रेभ्यश्च बहुलानि धनानि दत्वा अद्य मम स्वात्मा इह कृतकृत्यो जात इत्यमंस्त ॥ ५५ ॥

मंदोदरी तु विधिना परिवञ्चिता सा यस्मं पतिं पतित माप सुरूपलुब्धा । हित्वा स ता मपि सती मपरत्र रेमे कौबेर्या-सीव करट: सरसीं विहाय ॥ ५६ ॥

इदानीं प्रस्तुतं मंदोदरी वर्णन मेवाह मंदोदरीति सा मंदोदरी तु विधिना दुर्दैवेन परिवंचिता जाता कुत इत्याह यस्मात् सुरूपेण लुब्धा सती तं पापिनं मद्राधिपं प्राप तस्य पापित्व मेवाह सहितां मंदोदरीं सतीमपि तत्रत्या

अपरञ्च कलत्रे रेमे कां हित्वा कस्मिन् क इव सत्वीं हित्वा कौभि अर्णसि जले करटः काक इव काकमत्र हि प्रकृति यत् पूर्णामपि सरसीं त्यक्त्वा भ्रष्टो करपात्र कुंभजलं पिवति ॥ ५६ ॥

दृष्ट्वा कदाचि गणिका मथ लालयंतं तं काप्युदीरितवती व्रत चांद्रसेनीम्। दूनेति सा हृदि निशम्य वहिः स्मितास्या भूपं बभाण रहसीति पते किमेतत् ॥ ५७ ॥

दृष्टेति अथ तं भूपं काचित्सखी कदाचित् गणिकां लालयंतं दृष्ट्वा चन्द्रसनपुत्रीं मंदोदरीं ऊचिवती तव पतिं वेश्यां लालयतीत्युवाच सापीति श्रुत्वा हृदि दुःखिता जाता वहिश्च हठेन स्मितास्या सती तं भूपं बभाण हे पते एतत्किं यत् ईदृशं निंद्यं कर्म करोषीत्यर्थः ॥ ५७ ॥

इत्थं तयाथ परिभाषित उक्तवांस्तां धूर्तेन केनचिदलीक मिहोदितासि। भूयो व्यदर्शयत तया स्वय मेष दास्या कुर्वन्रहो निधुवनं भवने कदाचित् ॥

इत्थमिति एवं तया परिभाषितः स निंद मुपालब्धः स भूयस्तां मुक्तवान् ऊचितवान् हे मंदोदरि केनचित् धूर्तेन वंचकेन इह अलीकं असत्यमेवोक्तासि अथ कदाचित् तया मंदोदर्या एष भूपो दास्या सह एकांते स्वभुवने एव निधुवनं मैथुनं कुर्वत् स्वयमेव व्यदर्शि दृष्टः व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रत मित्यमरः ॥ ५८ ॥

एवं पतिं पतित मेत्य पतिव्रता सा पश्यंत्युरूणि दुरितानि नितांत मस्य। इत्थं स्वकीय मनिशं परिगर्हयंती हृद्येव कश्मलमलीमस एतदूचे ॥ ५९ ॥

एवमिति सा पतिव्रता तं पतितं पतिं प्राप्य अथ चास्य बहूनि पापकर्माणि नितांतं पश्यंती सती अथ स्वकीयमेव कृतं मनिशं निंदयंती कश्मलेन मलीमसे मलिने हृदि एव एतद्वक्ष्यमाण मूचे ॥ ५९ ॥

दयां नु दोष मिह कस्य यतोह मंधा वंधेत्र चारु दृगपि स्वय मत्र मग्ना। किं मेधियो भव दमा वुपलस्थिरापि ह्रादेयतंतु रिव हा त्रुटिता क्षणेन॥ ६० ॥

कि मुचेदतयाह दयामिति इह कार्ये अहं कस्यान्यस्य दोषं दद्यां यतो यस्मादहं चारु दृक् सुलोचनापि अंधेव अत्र अन्धो दुःखरूपकूपे स्वयमेव मग्ना अहो मम बुद्धेः कि मभवत् यदियं पूर्वं पाषाणवत् स्थिरापि अधुना क्षणेनैव ह्रादियस्य कमलस्य तंतु रिव त्रुटिता हा इति खेदे॥ ६० ॥

मन्ये भिमानकृति रस्त्यखिलापि चैषा ना ग्राहि येन गदितं बहुधापि पित्रो:। नो वाहिता दभिहिता वत गीःसखीनां प्राप्तं फलं हि तदवद्यज मेतदद्य॥ ६१ ॥

स्वयमेवात्र हेतुं निश्चिनोति मन्ये इति इयं मखिलापि कृतिः अहं कामं जेषामोतत्रभिमानकृतास्तीति मन्ये येनाभिमानेन बहुधापि मातापित्रो र्गदितं नैवाग्राहि तथाहिताद्दुक्ता सखीनामपि गो र्नाग्राहि अद्य हि तदव द्यजं तद्दोषजन्यं फलं ममैतत्प्राप्तं॥ ६१ ॥

याम्यद्य चेत्पितृगृहं प्रतिचात्र दूना नूनं हसिष्यति जनो निखिलोपि तत्र। भुक्त्वा विषादि यदि वा मृति माश्रयेहं नास्त्युद्धृति र्नरकनीरनिधेः स्वहंतुः॥ ६२ ॥

यामीति अत्र दुःखिता सती अद्य चेत् पितृगृहं प्रतियामि तर्हि तत्र निखिलोपि जनो मां नूनं हसिष्यति अहो अनयास्मद्वचो नाग्राहि तत्फलमद्य प्राप्त मितिहास्यं करिष्यति, यदि वा विषादिकं भुक्त्वा मृति माश्रये तर्हि स्व हंतु रात्मघातिनो जनस्य नरकार्णवा दुद्धृति र्नास्ति कदाचिदपि नरकान्न मुक्तो भवतीत्यर्थः॥ ६२ ॥

तस्मादिहैव वयसो दिवसानि नेष्ये ध्याय त्वनंत मज मच्युत मेश चित्ते। इत्थं विसृश्य विषयेषु विहाय हार्दं निर्वेद माप पर मोत्तर माश्रिता सा॥ ६३ ॥

तस्मादिति तस्मादेतो रिहैव पति मन्दिरे एव वयस: आयुषो ऽवशिष्टानि दिनानि नेष्ये नन्वत्र पुन दुःख मिति चेत्तत्राह किं कुर्वती अनन्त मज मच्यु-तमेव चित्ते ध्यायन्ती ननु दुःख बहुलानन्यकामानितरार्थः कथा मुपसंहरति हे देवि इत्य ममुना प्रकारेण विमृश्य सा मन्दोदरी विषयेषु हार्दं विहाय ईश्वरमेवाश्रिता सती परं निर्वेदं वैराग्यं प्राप ॥ ६३ ॥

अत एव शुभे शुभंयु त वचनं चारु मुहु र्मयाच्यते । न तथा भ-वति विहाय मामनुतापं प्रभजेत सा यथा ॥ ६४ ॥

दृष्टान्त मुक्त्वा दार्ष्टान्तिकं योजयति अतइति हे शुभे देवि अतएव हेतोः इदं शुभान्वितं चारुवचनं मया तुभ्यं मुहु रुच्यते कुत इत्यतआह यथा सा मन्दोदरी पूर्वं नृपं विहाय पश्चात्पापिनं प्राप्य पश्चातापं चक्रे तथा भवत्यपि मां त्रिलोकोशं विहाय पश्चात्तापं न प्रभजेत तदितार्थेव मया पुनः पुनरुच्यते नैव स्वार्थ मिति भावः ॥ ६४ ॥

निर्वंधं तदमुं च मुंच ननु भो रंभोरु नांभोरुह प्रख्यां स्ते वय वां शरे रतिवरे ऽस्तु तु हंतोत्सहे । चंचच्चन्द्रमरीचिशीतल तलेष्वारामहर्म्यादिषु प्रोद्यत्प्रेमपरीहृतौ कुरु तथा रंसराव आवां यथा ॥ ६५ ॥

निर्वंधमिति हे रंभोरु तत्तस्मात् अमुं निर्वंधं युद्धमेव करोमीत्यापहं प्रमुं च ननु त्वं किं न युध्यसे इत्यतआह अहं तु कोमलत्वेन कमलतुल्यानि तवांगानि अतितीक्ष्णैः शरैर्हंतुं न उत्सहे न वांछामि तर्हि किमभिलषसीत्य तआह चंचच्चन्द्रमरीचिभिः शीतलतलेषु चारामहर्म्यादिषु प्रोद्यता प्रेम्णा परि-हृता संतो आवां त्वमहं यथा रंसरावः तथा कुरु ॥ ६५ ॥

प्रबंधं तत्सद्यामुं घटित मतियत्ना जिषणाया च्चयात् च्चीर्णं चक्रे स्वनि रथ गिरा मेकवचसा । अयं ते दृष्टांतः फलतुन्नृपते प्राकृत ०.ने परा चाहं मूलप्रकृति रविचिंत्योरुमहिमा ॥ ६६ ॥

प्रबन्धमिति तस्य महिषस्य अमुं प्रबन्धं मन्दोदरीवर्णनरूपं कथा संग्रहं-तेन महिषेण बुद्ध्या अतिपक्वात् घटितमपि अथ सा गिरां खनिः वाग्जननी तद्वाचा माकररूपा भगवती एकेनैव वचसा क्षणात् क्षोणं चक्रे निःस्तवती कथं निरस्तवतीत्यत आह हे नृपते अयं मन्दोदरी वर्णनात्मकः तव दृष्टान्तः प्राकृते प्रकृतिवशगे जने फलतु सफलं भवतु अथ तु न प्राकृतासीत्यत आह अहं तु परात्परमेव परा मूलप्रकृति रस्मि यद्वशगता जनाः प्राकृता इति गीयन्ते तर्हि प्राकृतवत्कथं भाषीत्यत आह कोऽप्यो अविचिन्त्य उरु र्म-हाव महिमा महत्वं यस्याः अतो नात्र तव तर्को युक्त इत्यर्थः तदुक्तं अतर्क्यो खलु ये भावा नतां स्तर्केण योजयेदिति ॥ ६६ ॥

पुंस्त्रीदेवादिरूपैः प्रतियुग मवितुं साधुवृत्तीं जनूंषि प्राज्यानि प्राददेहं निखिलखलजनं हंतुमात्मेच्छयैव। भ्रांति श्चेदत्र काचि त्प्रकट मिथ महं निश्चयं प्राप्नुहि त्वं कृत्वा युद्धं मयोच्चै र्यदि स दधिगतं याहि पाताल मद्य ॥ ६७ ॥

प्राकृतवद्भाने ऽन्यदपि कारणमाह पुंस्त्रीति हे महिष अहं युगंयुगं प्रति साधु वृत्तोन्सज्जनान् रक्षितुं निखिलं खलजनंच हंतुं आत्मेच्छयैव पुंस्त्रीदे वादिरूपैः कृत्वा प्राज्यानि बहूनि जनूंषि जन्मानि प्राददे स्वीकरोमि अत्रार्थे यदि तव मिथ्येयं वदतीति भ्रांति श्चेत्तर्हि जाता इय महं प्रकटं स्थितास्मि मया सह उच्चै युद्धं कृत्वा निश्चयं प्राप्नुहि अथ चेत्सत्यमियं वक्तीति त्वया निश्चितं तदद्यपातालं याहि ॥ ६७ ॥

इति दितिजपतिः स्वसौंदर्यचाटूक्तिजालांतरे नागतां सम्य गा लोच्यतां। परमथ समरा जितं नाभ्यमंस्ता खिलोपायसं घे गते सर्वथा मोघतां अधिगतपरमाभिषंगो निषंगा त्समुद्धृत्य चिक्षेप बाणां शितां स्तत्क्षणा दभिसुरजननीं यथा मेरुशृंगो परिष्टा द्घन खंड दृष्टिप्रपातोल्वणान् ॥ ६८ ॥

इतीति स दिति जपति र्महिषः इत्येवं स्वसौंदर्यं च चाटूक्तिस्ते एव बंधनहेतुत्वा ज्जाले तयोरंतरे मध्ये अनागतां देवीं सम्यक् आलोच्य निश्चत्य

अथ समरा त्वरंगात्मनो हितं नाभ्यमंस्त युद्धमेवाधुना हितं नान्यदित्यर्थः क लति अखिलेप्युपायसंघे सामादिरूपे सर्वथापि मोघतां निष्फलतां गते सति अथेति निश्चितः अधिगतः परमोभिषंगः पराभवो यस्य जाततिरस्कार इत्यर्थः निषंगान् शितान् बाणान् समुद्धृत्य तत्क्षणादेवतां सुरजननीं प्रति चिक्षेप तथाप्यस्मान् कश्चित्क्षोभो भूदिति दर्शयितुं दृष्टान्तमाह यथा घनो मेघो मेरुशृङ्गोपरिष्टात् चंडवृष्टिं प्रपातादुत्थितकणान् क्षिपति तथा सति न तस्य कश्चित् क्षोभो भवति तद्वत्तस्या अपीत्यर्थः अभिषंगः पराभव इत्यमरः अत्र चंडवृष्टिप्रपातेति दंडकनामाप्यभिहितं तदुक्तं वृत्तरत्नाकरे यदि हनयुगलं ततः सप्तरेफा स्यादाचंडवृष्टि प्रयातो भवेद्दंडक इति चिलघुरूपनगण इयमध्यलघुरूपरगणसप्तकोपेतः सप्तविंशत्यक्षरपाद श्चंडवृष्टिप्रयाताख्यो दंडक इत्यर्थः ॥ ६८ ॥

श्रीमान्शंभोः स्वरगसदनोभूतहृक्कुम्भनाथो
लक्ष्मीनाथं कविपरिवृढं दीक्षितो सूतयं मां ।
तेनो क्लीते महिष निधने गीतलक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति सगमत्सर्ग एषोपि षष्ठः ॥ ७० ॥

श्री मानित्यादि पूर्ववत् ॥ ६८ ॥

इति श्रीलक्ष्मीकाव्ये महिषमंत्रिमंत्रचिन्तनं नाम षष्ठः सर्गः ६

इति श्री लक्ष्मीकाव्यव्याख्यायां षष्ठः सर्गः ॥ ६ ॥

ॐ नमो विघ्नहर्त्रे तत स्यापि तं लीलयाबाणजालं लुलापेन मुक्तं लुलावक्षणेन। तया सापि तेनाशु मुक्ताः पृषत्काः स्तयो रित्थमासीन्मिथो युज्जिगीष्वाः॥ १॥

ॐ नमो विघ्नहर्त्रे अस्मिन् सर्गे महिषयुद्धं वर्णयिष्यति ततइति तदनन्तरं सा देव्यपि तेन महिषेण मुक्तं तं बाणजालं लीलयैव क्षणेन लुलाव चिच्छेद महिषोपि तया देव्या मुक्तान् बाणान् शीघ्रं विभेद इत्थं हननप्रतिहननैः स्तयो र्मिथः जिगीषवः जेतुकामयोः युत् युद्ध माभोत् अस्मिन्सर्गे भुजङ्गप्रयातछन्दस्म् भुजङ्गप्रयातं भवेद्यै श्चतुर्भि रिति लक्षणात्॥ १॥

निषंगान्नता वुद्धरंतौ न चापे समारोपयंतौ न चाभिक्षिपंतौ तदा लक्षिपाता मुभौ तत्र बाणान् धनुष्टंकृतिः शुश्रुवेश्रान्त मेका॥ २॥

निषंगादिति तदा उभावपि देवी महिषौ अतिहस्तलाघवात् निषंगा द्बाणादुद्धरन्तावपि नालक्षिषातां तत स्थापि बाणान् समारोपयंतावपि नाल-क्षिषातां ततश्च अन्योन्य मभिक्षिपन्ताव प नालक्षिपातां परन्तु एका धनु ष्टंकृतिरेव अश्रांतं निरन्तरं शुश्रुवे॥ २॥

निषंगात्समुद्धृत्यनेहस्यथैकं गुणारोपणे ऽथोशतं बाणजालं। समाकर्षणे भूत्सहस्रं तयो स्तत्समुत्क्षेपितं खे तु लक्षंव्यलक्षि

अन्यदप्याश्चर्यमाह निषंगादिति अथतयो स्तद्बाणजालं निषंगात् समु-द्धरणकाले एक मेवाभूत् अथ गुणारोपणकाले शतमभूत् ततः समाकर्षण काले सहस्र मभूत् अथ खे समुत्क्षेपितं सत् लक्षमितं व्यलक्षि ज्ञातम्॥ ३॥

जलास्त्रं स सा ज्वालनं सोथमेघं शिवाथा निलं सोथशैलं पविं सा। मुमोचोरगं दैत्यराट् गारुडं सा वभूवे त्थ मस्त्रोत्तरा स्त्रै स्तया र्युत्॥ ४॥

जलास्त्रमिति स महिषः जलास्त्रं मुमोच सा तु तत्प्रतीकारय ज्वालन माग्नेयास्त्रं मुमोच पुनः स मेघास्त्रं सा तु आनिलं वायव्यं सोथ शैल पर्वतास्त्रं

सा तु पविं वज्रास्त्रं स च औरगं सर्पास्त्रं सा तु गारुडास्त्रं मुमोच इत्थं तयो अस्त्रप्रत्यस्त्रैर्युद्धं बभूव ॥ ४ ॥

अथो भर्तु रीप्सन्हितं युद्धमध्ये समागत्य रोषात् सुमनै र्विषा क्तैः। द्रुतं दुर्धरश्छादयामास देवीं जगर्जोच्चकै र्मारितासी ति भूयः ॥ ५ ॥

अथोद्गति अथ तयोर्युद्धमध्ये भर्तुर्महिषस्य हित मीप्सन् सन् दुर्धरो नाम मन्त्री समागत्यरोषात् विषलिप्तैः शरै स्तां देवीं शीघ्रं च्छादयामास भूयश्च त्वं मारितासीत्युच्चं र्जगर्ज ॥ ५ ॥

अथा जर्जरीकृत्य तद्बाणजालं शिवा कर्णकृष्टाशुगानां स्वजा लम्। शरीरा दधो पातय त्तस्य भालं धरायां धरस्येव शृंगं वि शालं ॥ ६ ॥

अथोद्गति सा शिवापि आकर्णकृष्टानां बाणानां मालया तस्य बाणजालं जर्जरीकृत्य धराया मधिकरणे धरस्य शैलस्य विशालं शृङ्गमिव तस्य भालं शरीरात् अधोपातयत् ॥ ६ ॥

मृतं दुर्धरं वीक्ष्य विक्षिप्तचेता स्त्रिनेत्रोऽथ जैत्रो द्विषां सैन्य नेता। शरैः सप्तभि स्सप्तसप्तिप्रकाशै र्जघाना शुता मीश्वरीं नश्वरात्मा ॥ ७ ॥

मृतमिति अथ तं दुर्धरं मृतं वीक्ष्य विक्षिप्तं चेतोऽस्य तथाद्विषां जयनशीलः सैन्यस्य नेता सत्रिनेत्रनामा मंत्री तामीश्वरीं नश्वरात्मा सन् रविप्रकाशैः सप्तभिः शरै शीघ्रं जघान ॥ ७ ॥

अथानागतानेव तानुग्रधारानभांक्षी द्दभीक्ष्णं रुषा लोहि- ताक्षी। त्रिशूलेन वीतं विधाय त्रिनेत्रं ततस्त्वकरीतिप्रवीता- सु मंवा ॥ ८ ॥

तथति सापि रोषेण निरंतरं रक्तलोचना देवी अनागतानेव तान् उग्र- धारान् शरान् अभांक्षीत् आमर्दितवती ततश्च तं त्रिनेत्रं त्रिशूलेन वीतं प्रोतं कृत्वा वीतासुं गतप्राणंचकरोति वा अतिशयेन करोतिस्मेत्यर्थः ॥ ८ ॥

तथा तं समीच्यां धकोपा,ज्झितासं, निरातंक एवां तकामो भ्यगात्तां। गदां तूर्णं मुत्तोल्य दंभोलितुल्या मथा पातय त्सिंह भाले विशाले ॥ ९

तथेति अथ तं त्रिनेत्रं गतप्राणं वीक्ष्य अंधकनामापि नायकः तथैव निर्भय एव अंतक वत् ताम भ्यगात् अथ शीघ्रं वज्रतुल्यां गदा मुत्तोल्य विशाले सिंहस्य भाले अपातयत् ॥ ९ ॥

विषह्याथ सिंहोपि तस्याः प्रहारं नखै स्तस्य चो त्पाट्य वक्षः कपाटं। चखादामिषं खंडखंडी कृतं द्रागजगर्जा तिसौहित्य मेतप्रोच्चकैः सः ॥ १० ॥

विषह्ये ति सिंहोपि तस्याः गदायाः प्रहारं विषह्य नखैस्तस्यांधकस्य वक्षोरूपं कपाटं उत्पाट्य अथ खंडखंडीकृतं तस्य मांसं शीघ्रं चखाद ततश्च अतिशयेन सौहित्यं तृप्तिं प्राप्य उच्चै र्जगर्ज। १०।

ततश्चामरश्चा मरारि स्समुराट् द्विषां वारणोवारणारूढ एत्य। महाशक्तिमान् शक्ति मादाय हस्ते तदास्या स्तदा स्यं प्रति प्राणहर्त्रीम् ॥ ११ ॥

ततइति तदनन्तरं अमराणामरिः चामरनामा सेनाधिपः द्विषां च वारणः गजोपर्यारूढः सन् प्राप्य अथ महाशक्तिमान् महापराक्रमः प्राणहर्त्रीं शक्तिं हस्तेन गृहीत्वा तदा तस्या आस्यं प्रतिआस्यस्य् क्षिप्तवान् क्षितो वैरिणां वारणोवारणाद्दे इति पाठेतु वारणोद्दे गजश्रेष्ठ इत्यर्थः मतल्लिकामचर्चिका प्रकांड मुद्धतल्लजौ प्रशस्तवाचकान्यमूनो त्यमरः ॥ ११ ॥

ततस्सापि हुंकारमात्रा त्परास्तां शिवा तामभांक्षी द्द्रुतं निष्प्रभावाम्। स चिक्षेप शूलं ततो जातरोषः शरैस्सिच्छिदेत च्चरंभे व देव्या ॥ १२ ॥

ततइति सा शिवापि हुंकारमात्रेणैव परास्तां अत एव निष्प्रभावां तां शक्तिं शीघ्रमभांक्षीत् ततः सापि जातरोषः सन् शूलं चिक्षेप तच्च शूलं देव्या रंभा कदलीव चिच्छिदे ॥ १२ ॥

अथोत्प्लुत्य सिंहेन तत्कुंभिकुंभांतरे कुर्वता तेन भीमं नियुद्धं । समाक्रांत उच्चैः सुरारि र्विरेजे नगारूढ ग्रावीषदावावलीढः ॥ १३ ॥

अथेति अथ तस्य चामरस्य यः कुम्भोगज स्तस्य यौ कुम्भौ तयो रन्तरे उत्प्लुत्य तेन चामरेण सह भयानकं नियुद्धं बाहुयुद्धं कुर्वतासिंहेन उच्चैःसमाक्रान्तः स सुरारि र्विरेजे क इव दावानलेन अवलीढः शैलोपर्यारूढो वृक्ष इव अत्र शैलरूपो गजस्तदारूढवृक्षरूप चामरः तदवलेह कदावाग्निरूपः सिंहः नियुद्धं बाहुयुद्धे इत्यमरः ॥ १३ ॥

ततो युध्यमाना वुभौ तत्र तस्मा द्गजा त्पेततु र्भूमि भागेति वेगात् ॥ नखानख्यथासौ तलातल्यनल्पं तयोस्तत्र युद्धं रदारद्यभीत्याम् ॥ १४ ॥

ततइति तदनन्तरं तत्र गजकुम्भे युध्यमानौ ता वुभावपि अतिवेगात् गजात् विस्तीर्णावधि भूमिभागे पेततुः तत्रापि तयोः नखैश्च नखैश्च प्रवृत्त मिति नखानखि एवं तलातलि रदारदि दन्तादन्ति अनल्पं युद्धं सन्तत मासीत्१४

स वै चामर स्तन्नखोत्कीर्णकायस्रवद्रक्तधाराविचित्रीकृतांगः । बभौ केसरी वामुना युध्यमानो महत्वाय नूनंमहद्भी रणोपि ॥१५

सइति अथ तस्य सिंहस्य नखै रुत्कीर्णात्कायात् स्रवन्तीभि रक्तधाराभि र्विचित्री कृतानि किर्मीरितान्यङ्गानि यस्य तादृशः स चामरः अमुना केसरिणा युध्यमानः केसरीव बभौ सिंहस्य हि कृष्णरक्तवर्णा न्यङ्गानि भवन्ति हि यतः महद्भिः सह रणोपि महत्त्वाय भवति किं पुनः सामेति भावः ॥ १५ ॥

अथो त्पत्य सिंहो जिघांसु रिपुं खे निपत्यो परिष्टा त्त तस्या तिवेगात् । अकार्षीत्तमा मुत्तमांगं तदीयं पृथक्कायतो नुत्तमाभं करेण ॥ १६ ॥

अथेति अथ तं रिपुं हन्तु मिच्छुः स सिंहः तावत् खे उत्पत्यततश्च अतिवेगात् तस्योपरिष्टात् निपत्य अनुत्तमा आभा यस्य तादृशं तस्य शिरः करेण कायात् पृथक् आकार्षीत् तमां अतिशयेन कृतवानित्यर्थः ॥ १६ ॥

अथो दग्र मग्रसा मग्रास्त्रशस्त्रैःकरालोग्रवीर्योद्धतादीँश्च युद्धे।
क्षणादेवनिर्मलयामासदत्रोयथातूल ।शीन्हुताशःसमिद्धः॥१७

अथेति अथ उग्रं उग्रास्यं करालं उग्रवीर्यं उद्धतं आदिना महाहन्वादींश्च सा देवी उग्रे रस्त्रे शस्त्रैश्च क्षणादेव निर्मलयामास नाशयामास कथं यथा समिद्धः प्रज्वलितः हुताशोऽग्निः तूलराशीन्नाशयति ॥ १७ ॥

ततो देवताः पुष्कलां पुष्कलस्थाः सदापुष्पितां पुष्प वृष्टिं किरंतः। समं चारणैः सिद्धगंधर्व संघै र्जयेति प्रमोदा ज्जगु र्वाच मुच्चैः ॥ १८ ॥

ततइति तदनन्तरं पुष्कलां बहुलां सदैव पुष्पितां च पुष्पवृष्टिं किरन्तः पुष्करस्था आकाशस्था देवताः चारणैः सिद्धगन्धर्वसंघैश्च सह प्रमोदात् जयेति वा चमुच्चै र्जगुश्च देवता शब्दस्य स्त्रीत्वा त्तद्विशेषणस्यापि स्त्रीत्वं व्योम पुष्कर मम्बर मित्यमरः ॥ १८ ॥

अथेत्थं च मूनायका न्वीच्य सर्वा न्सु पर्वेश्वरेश्चा हतानर्वशत्रुः। ससाखर्वगर्व कलंबानदभ्रा न्धृतालीढपादो मुमोचाभिदेवीं ॥

अथेति अथ अर्वशत्रु र्महिषः इत्थं सर्वान् नायकान् सुपर्वणां देवना मीश्वरा ब्रह्मादय स्तै रेषामपोश्यहतान् वीक्ष्य अखर्वः अनल्पो यो गर्व स्तेन सहितं यथा स्यात्तथा बहून् बाणान् देवीं प्रति मुमोच को० महिषः धृतः स्थापितः आलीढेन न्यासविशेषेण पादो येन प्रत्यालीढं समपादो विशाखो मण्डलं चेति धन्विनां पंचपदस्थानानि तत्राद्यं सव्यवामपादप्रसादे दक्षिणपाद संकोचे प्रत्यालीढं तता विपर्यये आलीढं पादयो स्तुल्यरूपतया धारणं समपादः वितस्त्यन्तरेण स्थितं पाददूये विशाखः मण्डलाकृत्या पाददूयधारणं मण्डल मरात् प्रत्यालीढ मालीढ मित्यादिस्थानपंचक मित्यमरः ॥ १९ ॥

विधाय द्विधा तान् क्रुधा तिग्मधारान् सुधाभोजिसूनैकधा तेन मुक्तान्। गदायाः प्रहारेण मोघेतराया रथा त्पातयामास मूर्छाल मेनं ॥ २० ॥

विधायेति अथ सुधा भोजिनां देवानां मूर्च्छितापि तेन महिषेण नैकधा मुक्तान् तीक्ष्ण धारान् तान् बाणान् क्रोधेन द्विधा कृत्वा मातृतराया: सफलाया गदाया: प्रहारेण एनं महिषं मूर्त्ताल मूर्च्छितं कृत्वा रथात्पातयामास भूमौ वितिग्रष: ॥ २० ॥

स गाढप्रहारेण विक्षिप्तचेता त्रुटच्चारुकोटीरकोटि र्गतश्री: । असृक्पंकिलासग्रीरजोधूसरात्मा प्रकीर्णैः कचैः कौ रराजेव रंकः ॥ २१ ॥

सइति महिष स्तमया गदाया गाढप्रहारेण विक्षिप्तचेता: सन् कौ पृथिव्यां प्रकीर्णैः कचै रुपलक्षितः रंकः दरिद्र एव रराज कीदृशः रथा त्पतनात् त्रुटिता चारुकोटी यस्य मुकटस्य कोटिर्यस्य तथा रजसा धूसर आत्मा शरीरं यस्य ॥ २१ ॥

सहित्वा मुहूर्ता न्महामूर्ततां द्रागवितंद्रो भिदुद्राव तां दानवेंद्रः । अभद्रं विनर्दन्गदायाः प्रहारं मृगेंद्रस्य भाले ऽतिरौद्राननो दात् ॥ २२ ॥

सइति अथ सदैत्येंद्रः मुहूर्तमात्रात् महामूर्च्छितत्वं विहाय शीघ्रं वितंद्रा निरलसः सन् प्रति दुद्राव अथ अभद्र मशुभं शब्दं कुर्वन् सन् अति रौद्राननो भूत्वा सिंहस्य भाले गदायाः प्रहार मदात् ॥ २२ ॥

स सिंहो पि तं रंहसा युद्धरंगे सुतीक्ष्णैः कराग्रै रुदग्रप्रभावः । परं लोहितीभूतकायं समंताच्चकारांशुमालीव कीलालवाहम् ॥

सइति उदग्रो ऽधिकप्रभावो यस्य सः सिंहोपि तं परं शत्रुं रंहसा वेगेन युद्धरंगे अतितीक्ष्णैः कराग्रैर्नखैः कीलालं रक्तं वहतीति तं अत एव लोहितीभूतो रक्तो भूतः कायो यस्येति तादृशं समंतात् चकार कः क इव अति तीक्ष्णैः कराग्रैः किरणाना मग्रैः कीलालवाहं एवं अधिक प्रभावः अंशुमाली सूर्यो यथा रक्तो करोति कीलालं रुधिरजलं वहति ऽम्भः ॥ २३ ॥

स हित्वा थ त त्पौरुषं पौरुषाढ्यः च्छ्रणेनो ज्झित स्तत्क्षणेनै व मायी। शरीरं हरे र्हर्यराति: प्रपेदे विरुद्धा हि चेष्टास्ति दु ष्टस्य चेष्टा ॥ २४ ॥

सइति अथ पौरुषेण पराक्रमेण आढ्यः स महिषः पुरुषस्येदं पौरुषं वपु स्त्य-क्त्वा तथा क्षणेन उत्सवेन त्यक्तः सन् तत्क्षणेनैव मायावान् हरे र्मत्स्येंद्रस्य प्रति भटत्वात्सिंहस्य वा अराति: शत्रु: हरे: सिंहस्य शरीरं प्रपेदे पुरुषरूपं त्यक्त्वा सिंहरूपो भूदित्यर्थः कुतएवं विधो भूदतआह हि यत: दुष्टाणां विरुद्धा एव चेष्टा सदैवेष्टा भवन्ति प्रतिभटं सिंहं दृष्ट्वा स्वयमपि,विरोधितया सिंहो भूदितिभाव: यद्वा पौरुषाढ्यत्वे पि पौरुषत्यागात् तथा क्षणोज्झितत्वे पि तत् क्षणोपहितक्रियोपेतत्वात् तथा हरिशत्रुत्वे पि हरिशरीरग्रहणा द्विरुद्धचेष्ट-त्वं श्लेषेण व्यज्यते ॥ २४ ॥

स विस्फालय न्वालधिं क्ष्मा वरालं विधुन्वन्सटाः प्रोत्कटाः खे कडाराः सधूत्कार माराव मुच्चैः प्रकुर्वन् द्रुतं व्याजसिंहो भि दुद्राव सिंहम् ॥ २५ ॥

तथ छमाह सइति स व्याजेन छलेन धृतसिंहरूपो महिषः श्रोत्रं तं सिंहं प्रतिदुद्राव किं कुर्वन् वरालं कुटिलं वालधिं पुच्छं क्ष्मा पृथिव्यां विस्फा लयन् ताडय न्सन् तथा प्रोत्कटाः कडाराः कपिलाः दृषणविह्रितुल्यवर्णा इति यावत् सटाः खेविधुन्वन् कंपयन् सन् तथा धूत्कारैः सहित माराव शब्दमुच्चै प्रकुर्व न्सन् कडार स्तृणवन्हिवदिति शब्दार्णवः ॥२५॥

स तं धोरणं चंडिकाया निकाय श्छलानांगिरिप्रख्यकायः करा ग्रैः। रुषा दारय न्नीशदारानथो चे हतं सिंह मद्या त्मना विद्धि सार्धम् ॥ २६ ॥

स इति स छलानां निकायो गृहरूपः गिरिप्रख्यकायश्च तं चंडिकाया धो-रणं वाहनं सिंहं रोषेण नखै र्दारयन्सन् अथ ईशस्य परमात्मनो दारान् पत्नी

भगवती मृचे हेदेवि अद्य आत्मना सह अमुंसिंहं हतं जानीहि यद्वा हे देवि सा त्वं आत्मना कृत्वा मांमिंहरूपं अंध खंडीभूतं हतं जानीहि ।२६॥

अथे ति ब्रुवाणाय तस्मै सगर्वं निजं वाहनं कुर्वते दीर्णदेहं। अतिभ्रूकुटीभ्रूद्वयीभंगभीमीभवद्भालभागाभवानीचुकोप। २७

तथेति इत्येवं स गर्वं ब्रुवाणाय तथा निजं वाहनं सिंहं दीर्णं देहं कुर्वते तस्मै व्याजसिंहाय सा भवानी चुकोप कीदृशी अति भ्रूकुट्या जनितेन भ्रूद्वयी भंगेन भीमी भवन् भालभागो यस्याः ॥ २७ ॥

ततः शूकतिग्माग्रकै र्दंदशूकातिरौद्रैः शरैः प्राणसंहृत्यनूकैः। अमर्त्यारि भूपं धृतैणेंद्ररूपं शिवान्हाय विव्याध तंव्याध वत्सा॥

ततइति ततः कोपानन्तरं सा शिवा तं धृतसिंहरूपं दैत्यराजं शरैः व्याधो मृगयुस्तद्वत् अह्नाय शीघ्रं विव्याध की० शरैः शूकायवादीना मति तीक्ष्णाग्रस्तद्वत् तिग्मो ऽग्रभागो येषां तथा दंदशूकः सर्पस्तद्वदति रौद्रैः अत एव प्राणानां संहृतिः संहार एव अनूकं शीलं येषां तैः शूको स्त्री श्लक्ष्ण तीक्ष्णाग्रे इत्यमरः अनूकं तु कुले शीले इतिहैमः ॥ २८ ॥

स सैंहीं विहाय क्षणा देव मूर्तिं शिवावाण विद्धा मथ छद्मसद्म महाकौंजरी मग्रहीदंजनाद्रिं रुजातर्जयंतीं तनू मूर्जसोग्राम्

सइति अथ सः छद्मनां छलानां सद्मगृहरूपो महिषः शिवा या वाणै विंद्धां तां सैंहीं मूर्तिं क्षणादेव विहाय महाकौंजरीं तनूं अग्रहीत् सिंहरूपं त्यक्त्वा गजरूपो ऽभूदित्यर्थः कीदृशीं रुचा अंजनाद्रिमपि तर्जयंतीं भर्त्सयंतीं अतिकृष्णवर्णा मित्यर्थः तथा ऊर्जसा उग्रां ॥ २९ ॥

विभिद्यत् स्वगंडस्रवद्दानवारिर्गभीराणिकुर्वन्महागर्जितानि। विषाणद्वयीछद्मना काव्ह पंक्तीद्ववोच्चै र्दधानः सरेजे घनाभः ॥ ३० ॥

विभिद्यदिति स व्याजगजः घनाभो मेघ वत् रेजे अतिकृष्णवर्णत्वात् कीदृशो मदेनविभिन्नात् यतः स्वगंडस्थलात् स्रवत्दानस्य मदस्य वारिजलं

यस्य तथा गंभीराणि महागर्जितानि कुर्वन् तथा दंतद्वयं कलेन उच्चैर्वकांक्षी इव दधानः मेघापीद्दग्णुर्वाविशिष्टो भवति वकः कव्हः इत्यमरः ॥ ३० ॥

स उत्पाट्य कूटं महा क्षाय मद्रेः करेण प्रचिक्षेप तां प्रत्य थो च्चैः। चकार तां गुणशः सा त मायांत मारा त्करै र्वज्रकल्पैः क्ष णादेव देवी ॥ ३१

सइति अथ सः करेण शुंडादंडेन महोच्छ्रायं अद्रेः शृंगमुत्पाट्य तां प्रति उच्चै र्चिक्षेप सा देव्यपि तं गिरि शृंगं आयांतं आरात् दूरादेव वज्रकल्पैः शरैः क्षणादेव चूर्णश्च चकार वज्रेण हि गिरि नाशो भवति ॥ ३१ ॥

कराग्रैः करींद्रं मृगेंद्रोऽपि कुंभदय ग्रासवत्स्पृहस्तं ददार चकर्षाशु तं सो पि कार्त्तस्वराद्रिं यथा कज्जलाद्रिः करेणा ति रोषात् । ३२ ॥

कराग्रैरिति स सिंहोपि तं करींद्रं नखै ददार कोदृशः तस्य कुंभद्वयग्रासे यस्य स्पृहा येन स करींद्रापि तं अतिरोषात् करेण शीघ्रं चकर्ष कथं यथा कार्त्तस्वराद्रिं स्वर्मेरुं कज्जलाद्रि कर्षेत् ॥ ३२ ॥

दृढं कर्षतः सिंह मस्यो ग्रशुंडां चकर्ताथ खड्गेन रंभा मिवां बा ततो रक्त प्रवाहं वहन्सो ग रेजे स्वरु च्छिन्नसानु र्यथा गैरिकाद्रिः ॥ ३३ ॥

दृढमिति अथाम्बापि दृढं यथा स्या त्तथा सिंहं कर्षत स्तस्य करिणः उग्रं शुंडां रंभा मिव खड्गेन चकर्त अथ सः करो ततः कृत्त शुंडातो रुधिरप्रवाहं वहन्सन्रेजे कथं यथा स्वरुणा वज्रेण छिन्नः सानुरस्य तादृशो गैरिकाद्रिः राजेत् ॥ ३३ ॥

अथो चिंतयामास चित्ते मुमूर्षु र्जिहासन्वपुः कौंजरं लून शुंडम्। शरीरं श्रये कस्य सिंहातिरिक्तं यदु द्वीक्षणेनैव देवी विभीयात् ॥ ३४ ॥

यथोइति अथ मम्मूर्ध मेरणामभो महिषः लनाक्रिया अंडायस्य ताहृ यं तत्काजरं त्र त्यक्त निक्ष्र चित्त चिंतयामास किमि त्यतभाह अधुनाहं कत्र शरीरभयी यच्छतो संहादानिग्ति अधिकं भवत् यस्य च दर्शनेनैवदेवी वभीयात् भयं प्राप्नुयात् ॥ २४ ।

विचिंत्येति सो भूदष्टापदो द्वा ग्भुजिर्यस्य शार्दूल सिंहादि पायाः। तदास्य गिरेः कंदराभं हरीणां शतं निर्गिरे दुजिरे त्तेषु नैकम् ॥ २५ ॥

विचिंत्येति यथेति विचिंत्य सः शीघ्रं अष्टापद नामा पक्षि विशेषो ऽभूत् तत्प्रभावं दर्शयति यस्याष्टा पदस्य शार्दूल सिंह द्विपाद्या एव भुक्ति भोजन मस्ति तस्य च गिरेः कंदरतुल्यं सुखं सिंहानां शतमपि निर्गिरेत् भक्षयेत् तेषु सिंहेषु च एक मपि सिंहं नोज्झिरेत् नोद्वमेत् अष्टापदः शरभः तत् स्वरूपं तु कालिका पुराणे ततः शरभरूपं तं महादेव मुमापतिं ददर्श यत्र पोषो च स्पृशंत शिरसा विधुं सुदीर्घ नासा न स्वरं लग्नांगार समप्रभं दीर्घं वक्त्रं महाकाय मष्टदंष्ट्रा समन्वितं विभ्रतं स कटिं पुच्छं दीर्घं कर्णं भयानकं चतुरः पृष्ठतः पादानधरं चतुरस्तथा कुर्वंतं घोरमाराव मुच्चैः तं पुनः पुनरिति शरभ वराहयो युद्धे प्रोक्तं ॥ २५ ॥

स कुर्वन्महाभैरवाराव मुच्चै रभीयाय पंचाननं प्सातुकामः तथो वीक्ष्य सा सिंहरक्षां विधित्सु र्बबंधो द्यमं तद्वधायाश्च वंध्यम् ॥ २६ ॥

सइति सो ऽष्टापदः महाभैरव माराव मुच्चैः कुर्वन् पंचाननं सिंहं प्सातुं भक्षितुं कामो यस्य ताहशः सन् अभीयाय प्रत्याययौ सा देव्यपि तथा भूतं वीक्ष्य सिंहस्य रक्षां विधातु कामा अवंध्यं सफलं उद्यमं तस्य वधाय प्रोत्रं बबंध ॥ २६ ॥

प्रचिच्छेद खड्गेन तस्यो त्तमांगं क्षा व्याकुलीभूतनेत्रत्रयी सा बहु नीत्य मासाद्य रूपाणि मायी मुहु र्माहिषीं मुर्तिं माश्रिष्ट दुष्टः ॥ ३७ ॥

अथ सुगमं ववंधेत्यतआह प्रचिच्छेदेति सा देवी तस्य हापदस्य खड्गेन शिरः प्रचिच्छेद कोदृशो रुषाव्याकुलो भूतानेत्राणां त्रयी यस्य अथेत्थं स मायी महिषः बहून्यपि रूपाणि आसाद्य पुनः पुनः प्राप्य पुनः स दुष्टः महिषोऽपि सहजां स्वमूर्तिं आश्रिष्ट प्राप अपि गतो धातुः ॥ ३७ ॥

निदाघार्कदुर्दर्शचक्षुःप्रतापो दृषत्कर्कशात्मा तमःपुंजरोचिः ॥ बभौ तर्कसंपर्कशून्योग्रवीर्यो रयोद्रेकतो मंथरीकृत्य वायुम् ॥

निदाघेति स महिषः रयस्य वेगस्य उद्रेकेन आधिक्यात् वायुमपि मंथरी कृत्य मंदगामिनं कृत्वा बभौ कोदृशः निदाघ कालीनार्कवत् दुर्दर्श चक्षुषः प्रतापोयस्य तथा दृषत् शिला तद्वत् कर्कश आत्मा यस्य तथा तमः पुंजव द्रोचि र्यस्य तथा तर्कस्य विचारस्य संपर्केन संगेन शून्यं रहित सुग्रं वीर्यं यस्य अचिंत्य पराक्रम इत्यर्थः ॥ ३८ ॥

स लांगूलविस्फालनेनांबुराशिं समुच्छा ल्य विप्लावयामास शैलान् । खुरक्षोदितक्ष्मातलोद्धूतधूलीचये रंधय न्रोदसी चा खिलाशाः ॥ ३९ ॥

सइति स महिषः लांगूलस्य पुच्छस्य विस्फालनेन अंबुराशिं समुच्छा-ल्य शैलान् विप्लावयामास किंकुर्वन् खुरैः क्षोदितात् पिष्टतात् क्ष्मातलात् उद्धूते धूलीचयैः कृत्वा रोदसी द्यावाभूमी अखिलाश्च आशा दिशः अंधी कुर्वन् ॥ ३९ ॥

उरुश्वासवातै स्तदीयै र्महांतैः ख उत्क्षेपिताः पर्वताः पेतु रु-र्व्याम् । यथा कल्पकालानिलै रीर्यमाणाः कुलक्ष्माभृतोऽनात्म निघ्नं भ्रमंतः ॥४० ॥

उर्वीति तस्य महिषस्य उच्छ्वासजन्यै र्वातैः महांतः पर्वताः खे उत्क्षिपिताः संतः पुन रुर्व्यां पेतुः कथं यथा कल्पकालीने रनिलै र्वायुभि रितस्ततः प्रेर्यमाणाः कुलाचलाः अनात्मनिघ्नं अस्वाधीनं भ्रमन्तः संतः पुन रुर्व्यां पतन्ति तद्वदित्यर्थः ॥ ४० ॥

तदुच्छृंखलोद्धृतशृंगप्रभिन्ना ययुः खंडखंडं महावारिवाहाः।
दिशोनेडमूकीकृता स्तेन रावै र्महाहृत्तकारावधिक्कारकृद्भिः।

तदिति तस्य च उच्छृंखलमयं त्रणं स्वच्छन्द मिति यावत् उद्धृतैः शृङ्गै प्रभिन्ना महांतो मेघाः खंडस्यापि खंडंयथा भवति तथा ययुः तेन महिषेण च महावर्तकाः प्रलयकालमेघा स्तेषा मथ्यारावाणाधिक्कारं कुर्वन्तीति तद्वधैः रावैः सर्वा अपि दिशि अनेड मूकीकृत्वाः वधिरा मूकाश्च कृता इत्यर्थः त्रिलिङ्गोनेड मूकः स्या च्छठे वाक्श्रुति वर्जिते इति रभसः ॥ ४१ ॥

ममर्दाथ देव्या गणा स्ता नगण्या न्चरप्राकृतीनां खुराणां प्रहारैः। विषाणाग्रकोटाथ कांश्चिद्दिरावे र्जवेनापरान् कांश्चि दुच्छ्वासवातैः ॥ ४२ ॥

ममर्देति अथ स महिषः तान् निश्वासजन्यान् अगण्यान् देव्यागणान् चरप्राकाणां खुराणां प्रहारैर्ममर्द कांश्चित्तु शृङ्गयो रग्रेणाग्रभागेन अथ कांश्चित् रावैरेव अपरांश्च भ्रमणवेगेन कांश्चित्तु उच्छ्वासवातै र्ममर्द ॥ ४२ ॥

स त त्वामथं यूथ मित्थं प्रथीयः प्रमथ्य प्रमाथी युयुंथाथ पृथ्वीम्। अथो वाच तां चंडिके त्वा मिदानीं हनिष्यामि सार्धं सुरै स्तुत्सहायैः ॥ ४३ ॥

सइति स प्रमाथी क्षोभकमहिषः अतिशयेन पृथु बहुलं तत् प्रमथानां देव्याः परिषदानां यूथं प्रमथ्य ततः पृथ्वीमपि युयुंथ जघान युध्यादीनां हिंसार्थे मनार्यंता अथ च तां देवी मुवाच हे चण्डिके त्वत्सहायैःसुरैः सह इदानी मेव त्वां हनिष्यामि यदा हे चण्डिके त्वं सहाया येषां तैः सुरैः इदानीं त्वां

मपं हनिष्यामि तव सायुज्यं प्राप्स्यामि हन हिंसागत्योः अयमर्थः यां पदवीं तव भक्ताः सुरा यास्यन्ति तामहमपि त्वदस्तात्प्राणां स्त्यक्त्वा यास्यामि ॥४३॥

न याव द्रुषं त्वय्यकार्षं पुराहं कृपाकृमहृत्ते सवस्ताव दासन्। इदानीं तु मे क्रुध्यतः स्थातु मग्रे न कालोपालं काव-लिप्तवला त्वम् ॥ ४ ४॥

ननु पूर्वं कस्मान्न हतवानसीत्यत आह नेति पुरात्वहं कृपया कृमं हृत् यस्य तादृशः सन् त्वयि विषये यावत् रुषं क्रोधं नाकार्षं न कृतवान् तावत् कालमेव तव असवः प्राणा आसन् कृपयैव न हतासीत्यर्थः इदानीं तु त्वत्का क्रुध्यतो ममाग्रे असौ कालोपि स्थातु मलं समर्थो नास्ति तर्हि हे अवलिप्ते गर्ववति नामत एव या ऽवलासि सा का समर्थासि न कापीत्यर्थः यद्वा मयि कृपाकृमहृत् दयापूर्णहृदये यावत्तु अहं रुषं योत्तु क्रोधं नाकार्षं तावदेव पूर्वं ते मदीया असवः आसन् हे महालक्ष्मि इदानीं तु अतो मत्क्रोधात् हेतो तव क्रुधि क्रोधे सति तवाग्रे स्थातुं कालोपि न समर्थः तर्ह्यहं कुतः अत्र हेतुः हे कावलिप्ते कं ब्रह्माण मवति मधुकैटभ्यां रक्षतीति कावो विष्णु स्तेन सह लिप्तं मिलित्वा त्वम्मिलिते यत स्वमवलासि नास्ति वलसमोऽन्यो यस्या इति तादृश्यसि ॥ ४४ ॥

उदीर्ये ति साक्षेप मुत्पाट्य शैला न्विषाणोग्रकोट्या प्रचिक्षेप नैकान्। रजस्सात्कृता स्तच्छरै स्ते थ रेजु र्यथा पंचभूताणवः खे क्षयांते ॥ ४५ ॥

उदीर्येति स इत्येवं साक्षेपं सतिरस्कार[मुक्त्वा शृङ्ग्यो रग्रेणाग्रभागेन अनेकान् शैलान् उत्पाट्य तां प्रति चिक्षेप अथ तस्या देव्याःशरैः रजस्सात्कृता स्ते शैला रेजुः कथं यथा क्षयांते महाप्रलये पंचानां भूतानां पृथिव्यादीनां परमाणवः। खे राजन्ते [चिरं खे खेलन्ति प्रचुरपरमाणुप्रततय इति कणाद मतोक्तेः॥ ४५ ॥

स भूयो पि गर्जं स्तथा वादिरोषादरे गर्ज गर्ज चणं मूढ यावत् पिवाम्यासवं तावदे वासव स्ते मुहु र्वैसवो गर्जितासौ सवार्गैः ॥ ४६ ॥

सइति अथ भूयोपि गर्जन् स महिषः तया देव्या रोषात् भवादि कथितः हे मूढ त्वं चणमात्रं गर्ज गर्ज यावदह मासवं मद्य पिवामि तावदेव हि असवः प्राणाः सन्ति मुहुस्त्वयि हते सति असौ वासव इन्द्रः सवार्गै र्देवैः सह गर्जिता गर्जगर्जति संभ्रमात्पुनरुक्तिः ॥ ४६ ॥

गदित्वे त्यथादाय तत्कालधौतं सुराभाजनं राजराजार्पितं-यत्। पपौ वारुणीं तां मुहु र्मंत्रपूतां सुधा मप्य नादृत्य याखादनीया ॥ ४७॥

गदित्वे ति अथेति गदित्वा सा भगवती कुवेरेण यदर्पितं सौवर्णं सुराभाजनं तत् गृहीत्वा मधु त्रे हंसःचिषदित्यादिभि रार्द्र ज्योतिरित्यादिभिश्च पूतां तां वारुणीं मुहुर्मुहुः पपौ तां कां या वारुणी सुधामपि अनादृतत्र आस्वादनीया सुधातोप्यधिकत्वादु रितार्थः ॥ ४७ ॥

महानंदसंदोहकंदैकरूपां पशुत्वोग्रपाशच्छिदाकोविदां सा। वभासे सुरां तां पिवंती सुरेशी समोदं मदाघूर्णिता रक्तनेत्रा ॥ ४८ ॥

महेति सा सुरेशी तां सुरां पिवन्ती वभासे कोदृशी समोद यथा स्यात्तथा मदेनाघूर्णितानि अतएव रक्तानि नेत्राणि यस्याः सुरां महानन्दसंदोहस्य कन्दः कारणमेवैकं रूपं यस्याः आनन्दं ब्रह्मणो रूपो तच्च देहे व्यवस्थितं तस्याभिव्यञ्जकं देवि कुलद्रव्यं प्रकीर्तित मिति पार्वतीं प्रति शिव वाक्यं तथा पशु त्वमज्ञानि त्वमेवोग्रः पाश स्तस्य छिदायां छेदने कोविदां निपुणां तदुक्तं इदं पवित्रममलं पिवामि भवभेषजं पशुपाश समुच्छेदकारणं भैरवोनदिमिति दमिति द्रव्यम् विशेषस्त्वागमादवसेयः अतिगोप्यत्वान्नेह प्रकाशितः ॥ ४८ ॥

सुराभाजनीभूत वक्त्रारविंदा परिभ्रामितोत्फुल्ललीलारविं-दा। मुदो ऽदत्त वंदारुवृंदारकाणां सुवृंदाय मातेव सा दारकाणाम् ॥ ४९ ॥

सुरेति तदानीं सा देवी वन्दारूणा मभिवादनशीलानां वृन्दारकाणां देवानां वृन्दाय मुदः प्रदत्त केषां केव दारकाणां वृन्दाय मातेव कीदृशी सुराया भाजनीभूतं वक्त्रारविन्दं यस्याः मुहुर्मुहुः पानात् तथा परितो भ्रामितं लीलारविन्दं यया ॥ ४९ ॥

अथा मुष्य दंभैकरूपस्य रांभेः सुधाभोजिबाधानिबद्धैकबुद्धेः। अबंध्यं बबंधो द्यमं सा वधार्थं त्रिलोकीमनःशल्य मुद्धर्त्तुकामा

अथेति अथ सा देवी अमुष्यदंभैकरूपस्य देवानां बाधायां निबद्धैकबुद्धे श्च रांभे र्महिषस्य वधार्थं अबंध्य सुद्यमं बबन्ध कीदृशी त्रिलोक्या मनसः शल्य मुद्धर्त्तुकामा ॥ ५० ॥

ततोलक्ष्य मुत्पत्य दम्भोलिपातं यथाता द्रितुल्यस्य तस्यो परिष्ठात्। पदा क्रम्य गाढं त्रिशूलेनकण्ठे शिलाकर्कशे तं जघानाघहंत्री ॥ ५१ ॥

किं विध मुद्यमं बबंधेत्यत आह ततइति तदनन्तरं सा देवी अतिलाघवात् अलक्ष्यमेव उत्पत्य तस्याद्रि तुल्यस्य महिषस्य चोपरिष्टात् दंभोलि र्वज्रं तद्दत्पातो यस्यां क्रियायां तथा पपात अथ तं गाढं पादेनाक्रम्य शिलावत्कर्कशे कंठे त्रिशूले तं जघान को० सा अघहंत्री तं घ्नन्ती स्वपादस्पर्शेन तस्य रिपोरपि पापमपि जघाने त्यर्थः तदुक्तं लोकान् प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मति र्भवति तेष्वपि तेति साध्वीति ॥५१ ॥

तया क्रान्त इत्थंत्रिणा सौ दुरात्मा मुखा त्पुंस्वरूपेण निस्सर्त्तु-मैच्छत्। स निष्क्रांतपूर्वार्ध एवा वतस्थे समाक्रांतपश्चार्धभागो-महेश्या ॥ ५२ ॥

तथेति इत्येवं पादेन तया आक्रांतो ऽसौ दुरात्मा महिषः मुखा त्वंसरूकण निस्सर्तुं ऐच्छत् अथ सः निक्रांतःपूर्वार्धो यस्य तादृश एव अवतस्थे ननु पश्चार्धभागः कस्मान्ननिष्क्रान्त इत्याह को॰ सः महेश्या समाक्रान्तः पश्चार्धभागो यस्य अपरस्तास्य वर्धस्येति पश्चार्धः अपरस्यार्धंपद्य भावो वक्तव्यः अवतस्थ इत्यत्र समवप्रविभ्यः स्थ इत्यात्मम् ॥ ५२ ॥

विनिष्क्रांतपूर्वार्द्ध एवैष देव्या समं मायिसम्राडयुयुत्सांबभूव । जहासांबिका सा थ साकूत मुच्चै स्तदीव्या द्भुतं कर्म तस्य त्यपूर्वम् ॥ ५३ ॥

विनिष्क्रान्त इति एष मायिषु सम्राट् महिषः विनिष्क्रांत पूर्वार्धं एव देव्या सह युयुत्सु बभूव अथ सा अंबिका ऽपि इति तस्याद्भुत मपूर्वं कर्म उदीक्ष्य साकूतं साश्चर्यं मुच्चै र्जहास ॥ ५३ ॥

अथो कालदत्तेन खड्गेन भालं करालेन संवृश्च्य तस्या तिभीमम् । त्रणं वृश्चतिस्मा स्य कालस्य देवी तदीया न्महासू न्द्रुतं तस्य दत्वा ॥ ५४ ॥

अथोइति अथ सा देवीकालदत्तेन करालेन खड्गेन अतिभीमं तस्य महिषस्य भालं संवृश्च्य छित्वा अस्य खड्गदातुः कालस्य त्रणं वृश्चति स्म अच्छैत्सीत् किंकृत्वा तस्य महिषस्य मस्वाप्राणान् शीघ्रं तस्य कालस्य दत्वा तेन तस्यै खड्गो दत्त स्तयाच तस्मै महिषस्य प्राणा दत्ता इति ऋणच्छेद स्तयाकृतः अन्योपि कस्माच्चि त्सुवर्णादिकं गृहीत्वा कालान्तरे तत्प्रति निधित्वे नान्यद्वस्तु ददाति ॥ ५४ ॥

पपाता स्य भूमिं विधुन्व च्छिर स्त द्यथा वज्रभिन्नं महाशृंग मद्रेः । तत स्तस्थुषो तस्य न्त्यत्कबंधे रराज क्षणं सा क्षणाभेव मेघे ॥ ५५ ॥

पपातेति अथ तस्य महिषस्य तत् खड्गच्छिन्नं शिरो भूमिंविधुन्वत् कंपयत् सन् पपात कथं यथा वज्रेण भिन्नमद्रेर्महाशृङ्गं पतति तत्पातानन्तरं

तस्य नृत्यति कबंधे क्षणमात्रं तस्थुषी सा देवी मेघे क्षणाभा तडिदिव विरेजे तत्कबंधस्य कृष्णवर्णत्वा न्मेघतुल्यता ॥ ५५ ॥

अथोत्प्लुत्य तस्मा त्समाश्वास्य सिंहं द्रुतं सा रुरुह त्सुप्रसादैक पात्रम् मुदोच्चैः । स चुक्रोश देव्याऽभिषिक्तः कटाक्षै रनुक्रोश पीयूषपूर्णैः ॥ ५६ ॥

अथेति अथ सा क्षणं स्थित्वा तस्मात्कबंधात् उत्प्लुत्य ततश्च स्वप्रसादस्यै कंपात्रं आधारं तं सिंहं समाश्वास्य हस्ते नेतिशेषः द्रुतं प्रारुहत् ससिंहोपि करुणामृतपूर्णैः कटाक्षैर्देव्या अभिषिक्तः मुदाउच्चै चुक्रोश कृपादया नुकंपास्या दनुक्रोशोपी त्यमरः ॥ ५६ ॥

ततः कंधरारंध्रतो रौधिरीं स स्रवं स्तस्य नीरंध्रधारां कबं-ध: । पपातावनीकं पवित्रस्तकाष्टेभ चीत्कारमिश्रो कृतायात-रावः ॥ ५७ ॥

तत इति ततो देव्यवतारानंतरं सञ्छिन्न शिरा स्तस्य भहिषस्य कबंधः कंधराया ग्रीवाया रंध्रतच्छिद्रात् रुधिरसंबंधिनीं नीरंध्रा मनवच्छिन्नांधारां स्रवन्सन् पपात भूमाविति शेषः कीदृशः अवनीकंपेन वित्रस्ताये काष्टे भादिगाजास्तेषां चीत्कारे र्मिश्रीकृतः ससहायो कृतः आपात रावो येन अतिशयोक्ति रियम् ॥ ५७ ॥

अथो तस्य हाहेति कृत्वा परासो श्चमूर्न्यस्तशस्त्रा पलायांबभूव जघानाघिनीं रंहसा तां तु सिंहः स सद्यः स्रवत्कोष्णरक्तं पि पासुः ॥ ५८ ॥

अथोइति अथ तस्य गतासो र्महिषस्य चमूः सेना तत्रैव न्यस्त शस्त्रा सतो हाहेति कृत्वा पलायां बभूव तां तु पलायमानां पापिनीं सेनां स सिंहः वेगेन जघान ननु तादृशी किमर्थं जघानेत्यत आह कीदृशः तच्छरीरे-भ्यः स्रवत् अतएव कोष्णं ईषदुष्णं रक्तं पातु मिच्छुः ॥ ५८ ॥

अथो ये वशिष्टा स्ततो दंदशूका भया दंतकाभस्य नागांतक स्य । पलाय्याथ पातालमुद्दिश्य हित्वा कुनाकाविलायाविली ना विलेषु ॥ ५९ ॥

अथोइति अथ ततो मरणात् येत्ववशिष्टा दंदशूकाः राक्षसाः ते तु यम- तुल्यस्य नागानां गजाना मंतं नाशं करोतीति तस्य सिंहस्य भयात् पलाय्य अथ च पाताल मुदिश्य कुनाकौ भूमिं दिवं च हित्वा इलाया भूम्या विलेष विलीना आसन् यथा नागांतकस्य गरुडस्य भयात् दंदशूकाः सर्पाः पलाय्य पातालं चोदिश्य भूमिविलेषु विलीना भवन्ति तद्वदित्यर्थः दंदशूकस्तु पुल्लिंगो राक्षसे च सरीसृपे इति हेमः नागो मतंगजे सर्पे पुन्नागे नागकेसरे इति च ॥ ५९ ॥

अथो तालवेतालभूतादिसंघाः करालानना पाणिराजत्कपा लाः ललल्लंबजिव्हानिपीतास्रधारा वहंतो द्वया सृक्किणो स्त च चेरुः ॥ ६० ॥

अथेति तदनन्तरं उर्ध्वैः कृता स्तालाः करस्फाला ये स्तादृशा वेताला भूताश्च तदादीनां कूष्मांडादीनां संघाः तत्र युद्धभूमौ चेरुः कीदृशाः करालान्याननानि येषां तथा पाणिषु राजन्तः कपाला येषां तथा ललंतीभि र्लंब- जिह्वाभि र्निपीतारुधिरधाराःकर्म सृक्किण्योः ओष्टप्रांतयोर्द्वयास् वहंतः तालः करतलेंगुष्टमध्यमाभ्यां च संमिते गीतकालक्रियामाने करस्फालेद्रुमांतरे इति हेमः प्रांते चोष्टस्य सृक्किणी इत्यमरः ॥ ६० ॥

वभु स्तत्र योधा मृता युद्धमध्ये शरै रोमशीभूतकायाः क्षतांगाः असृक्पूरकल्लोलकांदोलमाना महांतीव काष्टानि पयो धि- मध्ये ॥ ६१ ॥

वभूरिति तत्रच युद्धमध्ये मृता वहवो योधाः वभुः कीदृशः शरैः रोमशी भूताः काया येषां अत एव क्षतांगाः तथा असृक्पूररूपैः कल्लोलैःआंदोलमाना इतस्ततः प्रेर्यमाणाः तत्र दृष्टान्तः पाथोधिमध्ये महांतिकाष्टानीव ॥ ६१ ॥

असंख्यातैः शंखै र्भटमुकुटकोर्णोरुमणिभि र्नगाभै र्नागेंद्रैः पतिततुरगैस्त्वें दुसदृशैः। परिस्फीते चक्रैः स्मिकतिलतटे चूर्णितरथै रराजै का लक्ष्मी र्हरि र पि च तत्रा सृगुदधौ॥ ६२॥

असंख्यातै रिति तत्रासृगुदधौ एका सा ऽवशिष्टा लक्ष्मीर्हरिः सिंहश्च रराज यथा प्रलयाब्धौ लक्ष्मी र्हरि र्नारायणश्च राजति तद्वदित्यर्थः कीदृशे असंख्यातैः शंखैः कंबुभि रिव शंखैः मृतानां भाला स्थिभिः तथा भटानां मुकुटेभ्यः कीर्णैरुरुभिर्मणिभिः तथाशैलाभै र्गजेंद्रैः इन्दुसदृशैः श्वेतैश्च पतितै स्तुरगैः यद्वा इन्दुसदृशै श्चक्रैश्च परिस्फीते भतिदृढे युक्ते इत्यर्थः तथाचूर्णी भूतैरथैः सिकतिलंसिकतावत् तलं यस्य उदधिरपि शंखादियुक्तो भवति इति तयोः सादृश्यं शंखः कंबौ नयोषित्वा भालास्थि निधिभिश्चखे इति हैमः॥ ६२॥

इत स्ततो नैकमहासुराणां भमंतिशीर्षाणि बभु र्महांति तितीर्षुभिस्तत्र कृतांतभृत्यै स्तुंबीफला नीव समाहृतानि॥ ६३॥

इतश्चति तत्र अनेकेषां महता मसुराणां महांतिशीर्षाणि इतस्ततो भ्रमंतिसंतिबभुः कानीव तत्रासृगुदधौतितीर्षु भिर्यमकिंकरैः समाहृतानि तुंबीफलानीव॥ ६३॥

केचि च्छूलमुखाः परे क्षुरमुखाः सूचीमुखास्त्वेतरे
चंद्रार्धाकृतिवक्त्रका स्तदितरे केचित् त्रिशूलाननाः।
दिग्धास्या अपरे विषै रसुहरै रन्ये तु दंभोलिभा
रेजु स्तत्र तरंत आशुगचया क्रूरा इवाशीविषाः॥ ६४॥

केचिदिति तत्र आशुगानां च यास्तरंतः संतः क्रूरा आशीविषाः सर्पा इव रेजुः तेषु च केचिद्वाणाः शूलमुखा आसन् परेतु क्षुरमुखाः इतरेच सूची मुखाः तदितरे च चन्द्रार्धाकृति वक्त्रकाः केचिच्चत्रिशूलाननाः अपरेतु प्राणहरै विषै र्दिग्धास्या लिप्तमुखाः अन्ये तु दभोलिभावज्र तुल्या॥ ६४॥

ववौ मंदं मंदं सुरभिरनिलः स्पर्शसुखदः स्फुटं जज्वालाग्निः
खमपि रहितं पांसुपटलैः प्रसेदुर्दिग्भागा मिहिरहिमगू-
मंजुमहसावभूतां भूतानि प्रममदुरपासौ सुररिपौ ॥ ६५ ॥

एवं युद्धभूमिं वर्णयित्वा जगत्स्वास्थ्यमाह ववाविति सुराणां रिपौ महिषे अपासौ मृते सति सुरभिः स्पर्शसुखदश्च वायुर्मंदं मंदं ववौ तथा अग्निः स्फुटं विधूमं जज्वाल तथा खमपि पांसूनां पटलैः रहितमासीत् तथा दिग्भागाः प्रसेदुः प्रसन्ना जाताः तथा मिहिरहिमगू सूर्य्यचन्द्रौ मंजुमहसौ रुचिरतेजसावभूतां तथा भूतानि जीवाः प्रममदुः मदोत्कर्षं धातुः ॥ ६५ ॥

इत्थं तद्देवकार्यं त्रिजगदकहरं श्रीमहापूर्वलक्ष्मीः कृत्वा तर्क्यं
तरं सा श्रमजलपृषतैर्मौक्तिकाभैर्वरास्या हित्वा तं ग्लानिहेतुं
रणधरणिमगाद्भूभृतोऽभ्रंलिहाग्रं शृंगं निश्चित्य तत्राजिग-
मिषुममरस्तोममास्तोतुकामम् ॥ ६६ ॥

इत्थमिति सा श्रीमहापूर्वालक्ष्मीः श्रीमहालक्ष्मीरित्यर्थः इत्थं तर्क्यं तरं अतर्क्यं त्रिजगतामकं दुःखं हरतीति तादृशं देवकार्यं महिषवधरूपं कृत्वा कीदृशी मौक्तिकाभैः श्रमजन्यैर्जलबिन्दुभिर्वरं सुंदरमास्यं यस्याः अथ तां ग्लानिहेतुं रणधरणिं हित्वा अभ्रंलिहमग्रं यस्य तादृशस्य कस्यचिद्भूभृतः शैलस्य शृंगमगात् किं कृत्वा तत्र तान्यास्तोतुकामं अमराणां स्तोमं वृन्दमाजिगमिषुं निश्चित्य अत्र युद्धभूमौ देवानां स्तोतुमागमिष्यन्ति अतोनात्र स्थातव्यं ग्लानिहेतुत्वादिति भावः अभ्रंलिह इति खश् स्तोमौघनिकरव्रातवारसंघातसंचयाइत्यमरः ॥ ६६ ॥

श्रीमाञ्छंभो स्वरगसदनीभूतहृत्कम्भुनाथो
लक्ष्मीनाथं कविपरिवृढं देशकोऽसूत यं मां ।
तेनो क्लृप्ते महिष निधने गीत लक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति मगमत्सर्ग एषोऽष्टमोऽपि ॥ ७० ॥

श्रो मानित्याादि पूर्ववत् ॥ ६८ ॥

इतिश्रीलक्ष्मीकाव्ये भगवती महिष संवादोनामाष्टमःसर्गः ८

इति श्री लक्ष्मीकाव्यव्याख्याया अष्टमः सर्गः ॥ ८ ॥

ओंनमोभगवत्यै । तदनु नभसि देवाऽवग्रहे स्मिन्विनष्टे घनकुसुमसुवृष्टिं चक्रिरे सर्वतस्ताम् । जगुरथधृतलास्या मंजुघोषा सुकेशीप्रभृतय उरुमोदात्षट्पदीभिस्तदानीम् ॥ १ ॥

ओंनमोविघ्नकर्त्रे निहतं सहसोन्नमांगकं सुरगारैः सुरतापकारिणः दुहिणेंद्रमुखाभिवादितं चरणांभोज मुपास्महे श्रियः अस्मिन्सर्गे देवस्तुतिं वर्णयिष्यति तावत्तस्या आगमननिबंधनं निरतिशयानन्दोद्भवमाह तदन्विति तदनन्तरं अस्मिन् अवग्रहवृष्टिकारणीभूतयज्ञध्वंसकत्वात् वृष्टिप्रतिबन्धरूपे सन्निवेषे विनष्टे सति नभसि आकाशे स्थितादेवाङ्गनानिविडां पुष्पाणां सुवृष्टिं सर्वतस्तां भगवतीं चक्रिरे अथ मंजुघोषा सुकेशी प्रभृतयः स्वर्वेश्या धृतंलास्यं नृत्यं याभिस्ताहृश्या षट्पदीभिर्गीतादिच्छन्दोविशेषैः उरुमोदात् तदानीं जगुः प्रभृति शब्देनात्रघृतनरंभामेनकाघृताच्युर्वशी तिलोत्तमादीनां ग्रहणम् अथाप्रस्तुतार्थः तदनु अस्मिन्नवग्रहे वृष्टिविघाते विनष्टे सति देवा मेघा नभसि श्रावणमासि घनकुसुमानां मेघपुष्पाणां जलानामितियावत् सुवृष्टिं सर्वतस्तां पृथ्वीं चक्रिरे अथ तदानीं वर्षाकाले प्रवृत्ते मंजुर्घोषोयस्याः सा कोकिला तत्प्रभृतयः उरुमोदात् षट्पदीभिर्भ्रमरीभिः सह जगुः तथा शोभनाः केशा यस्याः सा मयूरी तत्प्रभृतयश्च धृतनृत्या आसन् तामिति सर्वतो योगेविहितीया नभोव्योम्नि नभामाधे श्रावणे च पतद्ग्रहे घ्राणे मृणालसूत्रे च वर्षासु च नभाः स्मृतमितिविश्वः देवः सुरे घने राज्ञीति च अस्मिन्सर्गे मालिनी वृत्तम् ननमययुतेयं मालिनी भोगिलोकैरिति लक्षणात् अष्टभिः सप्तभिश्चयतिरित्यर्थः ॥ १ ॥

अथ तरलतराभिः किन्नरैरंगुलीभिर्वरलय मनुतालं ताडिता वारुगीतैः । अमृतरसनदीशा रोदसी व्याप्य नेदुः परममधुरमंद्राराववृद्या मृदङ्गाः ॥ २ ॥

अथेति अथ तत्र अमृतरसरूपस्य नदीशा समुद्रेण रोदसी द्यावाभूमी व्याप्य मृदङ्गामुरजानेदुः कीदृशाः तरलतराभिरङ्गुलीभिः कृत्वा चारुभिर्गीतैः

सह तालं तालं प्रति वरलयं यथा भवत्तथा किन्नरैस्ताडिताः पुनः को० पर-मसमधुरार्थे मंद्रा गम्भीरा आरावा स्ते हृद्याः मनोरमाः तालः कालक्रियामानं लयः साम्य मित्यमरः गीतवाद्यपदादिन्यासानां क्रियाकालयोः साम्यं लयः कालस्य क्रियया आवाप निष्क्रमादिकमानं परिच्छेदनं ताल इत्यर्थः ॥२॥

इति नभसि समुत्थे चारुतौर्यत्रिकेऽस्मिन्भुवि निखिलतिरश्चां श्रेणयोऽपि श्रवोभिः विगलदितरवेद्यास्त त्पिबंत्यः सुधावत्प्रसृतनिजदृशः खे चित्रलिप्ता इवासन् ॥ ३ ॥

इतीति इत्येवं नभसि अस्मिन् चारुणि तौर्यत्रिके श्रवोभिः सुधावत् पिबन्त्यः अतएव विगलत् नष्टं भवत् इतरत् पानाशनादिकं वेद्यं येषां यथा खे गत प्रसृता निजदृशो येषां अरसज्ञानामपि मृगादीनां यत्रेदृशी गति जाता किमु तत्र रसज्ञाना मितरजनानां वाच्य मिति भावः तौर्यत्रिकं नृत्यगीतवाद्यं नाट्य मिदं त्रय मित्यमरः ॥ ३ ॥

शतमखमुखलेखाः खात्समुत्तीर्य वेगात् जयतु जयतु देवीत्युच्चकैर्गायमानाः । सह मुनिहयवक्त्रस्वर्गवेश्यादिवर्गैस्त मचल मथ पादैरञ्चितं चारु चक्रुः ॥ ४ ॥

शतमखेति अथ इन्द्रादयो देवाःवेगात् खात् समुत्तीर्य मुनिभि र्हयवक्त्रैः किन्नरैः स्वर्गवेश्यादीनां च वर्गैः सह देवी जयतु इत्युच्चैर्गायमानाः तं देव्याधिष्ठितं अचलं स्वपादैश्चारु यथा भवति तथा अंकितं चक्रुः तत्राजग्मुरित्यर्थः ॥ ४ ॥

अथ सुरललनानां भूषणैः पूषरुग्भिः कनकितनिखिलांगो देवतैरुच्यमानः खचितशिखरदेशो रत्नजालैः शिवायाः स्फुट मवनिधरो सा वन्वकार्षीत्सुमेरुम् ॥ ५ ॥

अथेति अथैवं सति असाववनिधरः शैलः स्फुटं प्रकटमेव सुमेरुं अन्वकार्षीत् तुलितवान् मेरुतुल्यो भाति स्मेत्यर्थः कुत इत्याह कीदृशः सूर्यसदृशतेजोभिरप्सरसां भूषणैःकनकीभूतानि निखिलान्यङ्गानि यस्य तथा देवतैरुच्य-

माणो ऽधिष्ठितः तथा शिवायाः श्रीमहालक्ष्म्या रत्नजालैः खचितः शिखर देशो यस्य सुमेरुरपि कनकमयः देवानां च निवासस्थानं तस्य शिखरे च रत्नानि सन्ति तुल्यता ॥ ५ ॥

अपि कमलदलेभ्यः कोमलौ मातु रंघ्री कठिनमुकुटकूटै र्मा-व्यथा मांहिषातामिति हि तदुपपादं शंकया ते विशंकं युगप दभिपतंतो धित्यकायां विरेजुः ॥ ६ ॥

अपीति कमलदलेभ्योपि कोमलावस्यामातुरंघ्री अस्माकं कठिनै र्मुकुटानां कूटैःशृङ्गै र्व्यथां मा आंहिषातां न प्राप्नुवतां इतिशंकया ते देवाः तस्याः देव्या उपपादं पादयोः समीप मेव विशंकं यथा स्यात्तथा अधित्यकायां शैलोर्ध्वभूमिकायां युगपत् अभिपतन्तो विरेजुः ॥ ६ ॥

अधिगततदनुज्ञा स्ते समुत्तिष्ठते ति प्रणयनतशिरोभिः क्षिप्रमुत्थाय देवाः । अथ सरसपदाभि वर्णमालाभि रेवां नुतिभिरभिनुवंतिस्मोन्मुदो मालिनीभिः ॥७॥

अधिगतेति अथ ते देवाः समुत्तिष्ठत इति अधिगता प्राप्ता तस्याअनुज्ञा येषां तादृशाः सन्तः प्रणयेन नतैः शिरोभिः क्षिप्रमुत्थाय अथ उत्कृष्टा मुदो येषां ते ता मम्बां नुतिभि रभिनुवन्ति स्म कीदृशीभिः सरसानि यासु ताभि वर्णाना मकारादीन मनुक्रमेण निर्गच्छता मालाभि रिव मालाभिः कृता मालिनीभि र्मालावतीभिः अत्र स्तुतीनां स्त्रीरूपतापि व्यज्यते तथाहि रसाः षट्पदा येषां तै र्भ्रमरै सहिताभिः नाना वर्णमालाभिः कृता मालावतीभिः यद्वा वर्णाना मकारादीनां माला यस्यां तादृशीभिःसरसपदाभिर्मालिनीभि श्छन्दो विशेषै स्तां स्तुवन्ति स्म वर्णमालाभि रिति बहुत्वं बहुदेवापेक्षया अत स्त्वेकैव वर्णमालास्ति ॥ ७ ॥

अरुणजलजकांतं मंगलं चातिसौम्यं गुरुसुकविभि रिडा-हंसवन्मन्दचारि । प्रणतजनतमोनुद्दे वि चक्रांगकेतुप्रभृतिभि र भिवाद्यं ते श्रियुग्मं श्रिताः स्म ॥ ८ ॥

तावदकारस्यादित्वात्सदादिना स्तुवन्ति अरुणेति हे देवि ते तव अंघ्रिय-ग्मं वयं श्रिताः कीदृशं अरुणजलजवत् कांतं मनोरमं तथा भक्तानां अशुभ-नाशकत्वा मङ्गलरूपं तथा अतिशयेन सौम्यं सुन्दरं तथा गुरुभि र्महद्भिः सु-कविभि राढ्यं स्तुत्यं तथा हंसवन्मन्दं चरितुं शीलमस्य तथा प्रणतानां जनानां तमो नुदति नाशयतीति तत् तथा चक्राङ्गो हंसः केतौ यस्य सः ब्रह्मा तत्प्रभृतिभि रभिवाद्यं नमस्करणीयं क्रोडीकृतनवग्रहं चेदं पद्यं तथा हि अरुणेत्यनेन सूर्यः जलजेति चन्द्रः मंगलेति भौमः सौम्योबुधः गुरु र्बृहस्प-तिः कविः शुक्रः मंदः शनिः तमो राहुः केतुः शिखीति रत्नावल्यलंकारोयम् ॥

इह हरिहरमुख्यै र्वाङ्मनोगम्यभूमि र्न च कतिविधकीर्त्ति-र्ज्ञायसे कीर्त्यसेव। मुखरयति हि मात र्भक्ति रेषा तथा स्मा-न्क्षमय स्खलु न शोभा मेति रोषाः सुतेषु ॥ ८ ॥

अथ स्तुति र्नामगुणकथनं तच्च गुणज्ञानाधीनं अज्ञातस्य कथनायोग्य-त्वात् तथा च निर्गुणमगुणरूपाया भगवत्या गुणाना मभावादानंत्याच्च ज्ञातु मशक्यत्वंकथं तत्कथनरूपा स्तुति रनुरूपा भवेदित्याशंक्य तदपनोदनव्याजेन स्वस्यानौद्धत्यं दर्शयन्तो भगवती पादश्रवणानन्तरं शक्तिशक्तिमतोरभेदं पश्यन्तो ब्रह्मरूपेण तांस्तोतु मारभंते इहेति हे मातः इह जगति हरिहरमुख्यै रपी-श्वरै स्त्वं न ज्ञायसे न ज्ञान विषयो भवसि तथा कीर्त्यसेन अज्ञेयत्वे अकीर्त्त नीयत्वे च हेतु द्वयं क्रमेणाहुः को० त्वं वाङ्मनसो रगम्य भूमिः अगम्यस्थानं निर्धर्मकत्वात् अतोगेयत्वा संभवः यतो वाचो निवर्त्तंते अप्राप्य मनसा सहे-ति श्रुतेः तथा कतिविधाः अनेकप्रकाराः कीर्त्तयो जगत्सृष्ट्यादिभक्तानुग्रह-दुर्जननिग्रहादिरूपा यस्याः सा अतः कीर्तनीयत्वा संभवः गुणानामानंत्यादि-त्यर्थः तर्हि भवद्भिः कथं कीर्त्याविष्करण रूपा स्तुतिरारभ्यते इत्याहु हे मातः अस्मांस्तु एषा तव भक्तिरेव मुखरयति बलात्कारेण वाचालो करोति अतो नास्मासु कश्चि स्वमतृदोषोस्तीत्यर्थः अथोचेत्तथापि क्षमय यतः सुतेषु रोषो मातु रिति शेषः शोभां नैति न प्राप्नोति कुपुत्राजायन्ते क्वचिदपि कुमाता न भवतीत्युक्ति प्रसिद्धेः ॥ ८ ॥

**उरुतरवरकीर्त्ते लब्धु मंतं तदा मी दशशतकरचन्द्रमौलयो-
ना त्व मासन् त्वयि तु विनयभावा ल्लेभिरे त्वत्पदाब्जा द्युतिल
व मपि वज्रं शीर्षधार्य्यां च धूलिम्॥ १० ॥**

अथ कीर्तेरामन्त्यं प्रतिपादयितु मन्वयव्यतिरेकाभ्यां कारणतां च दृढ-
यितुं भगवत्यनुवृत्ति व्यतिरेकेण फलव्यतिरेकमाह; उरुतरेति उरुतरा अनंता
वराश्रेयः साधनीभूता च कीर्त्ति र्यस्या स्तस्य संबुद्धौ हे उरुतरवरकीर्त्ते भगवति
अमी दशशतकरचन्द्र मौलयः दशशत सहस्रसंख्याकाः कराः किरणा यस्य स
सूर्यः तन्मितानि वक्त्राणि यस्य सः इन्द्रः तन्मिता मौलयो यस्य सः शेषः एते
विमलप्रभावाः तव सगुणाया गुणाना मंतं लब्धु मियत्तया ऽवधारितुं अलं
समर्था न आसन् अयं भावः सूर्येणाभिमतं जनोऽहाभ्यामपिकराभ्यां दूर-
स्थित मप्यर्थं गृह्णाति अहं तु सहस्रकरोऽस्मातो भगवत्या अंतं किं न
लप्स्यामि तथेन्द्रेण त्वभिमतं मम सहस्रं चक्षूंषि सति अत स्तदंतं किं न
द्रक्ष्यामि तथा शेषेणाभिमतं मम सहस्रमिता मौलयः संति प्रतिमौलि च
द्वे द्वे जिह्वे अत स्तस्या गुणकीर्त्तनेको समात्यायामास्ति त्वभिमानेन कि-
मपि तदंतं न प्रापुः त्वदनुवृत्तिं विना प्रसिद्धप्रभावानामपि सूर्येन्द्रशेषाणां
दुर्विज्ञेयत्वेका वार्त्ता न्येषा मिति व्यतिरेक मुक्ता ऽन्वयमाह; अथाभिमा-
नेन तदंतमलब्ध्वा त्वा मनुवर्त्तमाना स्त एव सूर्येन्द्रशेषा स्त्वयि विषये विनय-
भावात् स्वौद्धत्यपरित्यागात् साद्यः सूर्यः त्वत्पदाब्जात् तत्रस्थिताया द्युतेः
प्रभाया लवं लेशं लेभे येन जगदंतर्वर्त्ति निखिल ध्वान्तध्वंसं करोति अन्य
इन्द्रः त्वत्पदाब्जस्थितवज्रचिह्नात् वज्रं लेभे येन वृत्रप्रभृतीन् दैत्यान् नाशयति
अपरः शेषस्तु त्वत्पादाब्जलग्ना या धूलि स्तां लेभे यामयाविधिशिरसा वहति
अतः पूर्वं वालिशतया निवृत्तावपि पश्चात्तवानुवृत्तेः फलं स्फुटमेवात्र दृष्ट
मित्यन्वयउक्तः ॥ १० ॥

**ऋत मसि तमस स्त्वं सर्वथा स्मा त्परस्मा तव लव मनवाप्य-
स्मा त्स इशो प्य नीशः। स्फुटतर मिति दृष्टं यत्पुराप्यच्युता-
द्या न वय ममु मनु त्वां हन्तु मीशा अभूम ॥ ११ ॥**

इदानीं ब्रह्मणा सह तादात्म्यं प्रतिपादयितुं भगवत्याः सदादिरूपता-माहुः ऋतामिति हे मातः त्वं ऋतं सत्यमसि सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः तथा ऽस्मात् तमसो ऽज्ञानात् सर्वथापि परस्तादसि प्रकाशात्मकत्वात् एवं तादात्म्यं प्रतिपाद्य भगवत्या आधिक्य द्योतनाय ततः किंचिद्विशेषमाहुः एवं तादात्म्ये सत्यपि हे मातः स ईशः कर्तुं मकर्तुं मन्यथा कर्तुं शक्तोपि परमानंद समुल्लास निर्भर परमात्मात बलं सिसृक्षा रूपलेशं अनवाप्य अप्राप्य स्रष्टा दा वनीशः स्यात् युवयो रैक्ये सत्यपि एता वान्विशेषोस्ति स ईश्वरस्त्वां विना न किंचित्कर्तुं शक्तः त्वं तु तं विनापि शक्तासि शक्तित्वात् अत्रैव प्रत्यक्षप्रमाणमाहुः हे ईशि इतीदं तु तवाधिक्यं स्फुटतरं प्रत्यक्षमेवेदानी मस्माभिर्दृष्टं यस्मात्पुरामहिषयुद्धे अच्युताया अपि वयं अनुतां तुष्टीनाः सन्तः अमुं महिषं हंतुं ईशान अभूम त्वं तुच्युताद्यै र्महिना पर मसमनाया-सेनैव हतवतीत्यतस्तवै वाधिक्य मिति ध्वनिः नच्यवति स्वरूपादित्यच्युत शब्दे नात्रपरमात्मैवलक्ष्यते एतदुक्तं सकलजननी स्तवे कणा स्त्वद्दीप्तीनां रविशशिकृशानुप्रभृतयः परंब्रह्म क्षुद्रं तव नियत मानन्द कणिकेति हीनैर्वांत्य ऽनुपात्त्वादिति स्वामिति द्वितीया अथवा ऽकारादीनां संध्यक्षराणां चा नुपादानंच्छन्दोनुरोधेन मालिन्यां हि तावत् षट् लघवः सन्ति ॥ ११ ॥

कतिचि दमरवंद्ये व्याहरंतीति विद्यां सदसदिति तथा न्ये-
केप्य स त्वा सदन्ये अपर इह हि विश्वं विश्वमात र्जगु स्त्वां-
वय मिह करुणाब्धिं मन्महे त्वा मतर्क्याम् ॥ १२ ॥

अथ सर्वेषां मतमनूद्य स्वभक्तिमतं मुख्यं प्रतिपादयन्तः स्तुवन्ति कति-चिदिति हे अमरै र्देवै र्वंद्ये यद्वा अमरेण परमात्मनापि वंद्ये अखिलवंद्ये इति वा पाठः कतिचित् स्वसंप्रदायानुरोधिन स्त्वद्रहस्यज्ञाः त्वांविद्यां चैतन्य-रूपा मिति व्याहरंति अथैवं चैतन्यरूपत्वे सिद्धे अपरेएत न्मताविरोधिनोऽ द्वैतविदः हे विश्वमात स्त्वांविश्वं सकलजगद्रूपांजगुः सर्वमिदं यदयमात्मा आत्मैवेदं ब्रह्मैवेदं सर्वं पुरुषएवेदं विश्वं सर्वंखल्विदं ब्रह्मेत्यादिश्रुतिभिः अथैवं विश्वरूपत्वे सिद्धे त्वां विश्वरूपां अन्ये सांख्य मतानुसारिणः सदिति अव्यनि

धनरहितां जगुः नह्यसत उत्पत्तिः संभवति नवा सतोविनाशइत्युत्पत्ति विना शयशब्दाभ्यां माविर्भावतिरोभाव मात्रमभिलप्यते तेन सदेवसर्व मित्याहुः अथ केपि सुगतमतानुसारिणः असत् क्षणिकमिति वदंति नहि सतः स्थिरत्वं संभवति अर्थक्रियाकारित्व मेवहि सत्वं तच्च समर्थस्य क्षयायोगेनाविलंबेन उपपद्यते इतो कस्मिन्नेव क्षणे सर्वार्थक्रियादिसमाप्ते उत्तरक्षणे ऽसत्वमेव तथा चेश्वरस्यापि क्षणिकविज्ञानसंतानरूपत्वादसावसत उत्पत्ते रीष्टे न तु सतः स्थिरत्वायेत्यसदेवाहुः अथ तदुभयपक्षासहिष्णवो ऽन्ये तार्किकाः सदसदितयुभय रूपतां वदंति आकाशकालदिगात्ममनः पृथिव्यादिपरमाणवो नित्याः कार्य द्रव्याणि वानित्यानि तेनसदसदिदमित्याहुः इतिपक्षत्रयमनूद्यनचिरासायस्वम तमाहुः वयं तु तुइत्यन्यमतानभिज्ञाः त्वां करुणाया अब्धिरूपामिव मन्महे को हशीं त्वां अतर्क्यातर्कविषयां चिन्मयेतेषु पक्षेषु देतांगीकारादद्वितीयसमुद्ररू पायाः स्तव स्वर्गोपि नास्त्यतो मियस्तर्कैर्व्याहतत्वादेतन्मतानुसारिण स्तत्त्वम लभमानाः प्रत्युतक्लिश्यंते भक्तिपक्षस्य तु केनापि हंतु मशक्यत्वात् स्वरूपत अतः परमपदप्राप्तये भक्तिरेव याह्या न तु मिथो विरुद्धानेकशास्त्रगर्तेषु पतन यमिति भवः अत्र देव्यां परकविमतिविकासोत्प्रेक्षितविद्यात्वादिधर्मनिह्नवस्य करुणाब्धित्वारोपार्थं निरूपणात् शुद्धापन्हुति रलंकारः अपन्हवस्तुपरपक्षत्वेप न्यासादर्थसिद्धः ॥ १२ ॥

त्वमय मिद मशेषं प्रागभू न्निर्विकल्पं तदनु तव कलायाः।
कल्पितानेकजल्पम् अपृथगिति भवत्या स्तद्गृणंति प्रवीणा न-
हि खलु वलयादौ स्कांचनार्थी जहाति ॥ १३ ॥

एव मेतानि मतानि निरस्य संप्रति स्वाभिमतां तस्या विश्वरूपतां निरूपयन्ति त्वमय मिति हे भगवति इदम शेषं नाम रूपात्मकं जगत् प्राक् सृष्ट्यादौ निर्विकल्पं नाम जात्यादि विकल्प रहित मासीत् अत एव त्वमयं शून्यप्रायं शुद्धसंविद्रूपं ब्रह्ममयं वासीत् सदेव सौम्येद मग्रआसीत् एक मेवाद्वितीयं ऐतदात्म्य मिदं सर्वमित्यादि श्रुतेः तदनुसृष्ट्यारंभेच्छायां तव कला-

या चंद्ररूपायामायाया: इदमेव निर्विकल्पं कल्पितो ऽनेकविधोजल्पो नाम जातरादि यस्मिन् याहश मासीत् तत्तस्मात् प्रवीणा: प्रेक्षावन्त: इति जगत् भवतया अपृथक्तु रूपमेव गृणन्ति अद्वितीयत्व प्रतिपादनाय दृष्टान्त माहु: हि यत: कांचनार्थी जन: वलयादीन् न जहाति अथ सतापि नामादिविकारिवलयकुंडलकेयूरादिकं वस्तुत: स्वर्णमेव तथा नामाद्युपाधित्यागेनेदं विश्व तुद्रूपमेवेतरर्थ: यथाच्छांन्दोग षष्टे प्रपाठके सौम्ये केन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारं भणं विकारो नामधेयं मृत्तिकेत्येव सत्य मिति खंख: संविदि व्योमनोंद्रये शून्ये विन्दौ मुखे खस्तु सूर्य्ये इति हैम: ॥ १३ ॥

गगन मनिलवन्हो जीवनं मेदिनो च विकृति मपि महांतं संसृजंतीं गुणेभ्य: जलजदल मिवा हि निर्विलेपं पुमांसं भगवति रमयंतीं त्वां हि मूलं गृणन्ति ॥ १४ ॥

संप्रतिजगजननकारणतां द्रढयितुं मूलप्रकृतिरूपत्वं तस्या: सांख्यमतेन-दर्शयन्त: स्तुवन्ति गगनमिति हे भगवति त्वामेव चिच्छक्तिं सांख्य विद: मूलं विश्वस्य कार्यसंघातस्य मूलत्वा मूलप्रकृतिं गृणन्ति नतुस्या मूलांतरमस्ति अनवस्थाप्रसंगात् कीदृशींत्वा अद्भिर्जलैर्जलजदलमिव निर्विलेपं नि:संगमपि पुमांसं पुरुषं रमयन्तीं रमणक्रियायां प्रयोजकव्यापारेण प्रेरयन्तीं एवं च सति तावत् स्वस्वरूपेभ्यो गुणेभ्य: सत्वरजस्तमोभ्य: महांतं महत्तत्वं संसृजन्तीं अपिशब्देनाहंकारं ततस विकृतिं दशेंद्रियाणि पंचतन्मात्राणि चेतिषोडशसंख्याकं विकारंसृजन्तीं ततश्च पंचतन्मात्रेभ्य: गगनादीनि पंच महाभूतानि सृजन्तीं तत्रशब्दतन्मात्रादाकाशं शब्दगुणणं शब्दस्य तन्मात्रसहितात् स्पर्शतन्मात्राद्वायु: शब्दस्पर्शगुण: शब्दस्पर्शरूपरसतन्मात्रसहिता द्रूपतन्मात्रात्तेज: शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादाप: शब्दस्पर्शरूपरसगुणा: शब्दस्पर्शरूपरसतन्मात्रसहितागन्धतन्मात्रा त्भू-म्योमशब्दस्पर्शरूपरसगन्धगुणा जायते इति सर्गक्रमात् व्युत्क्रमेणश्लोकव्याख्याता तदुक्तं सांख्ये प्रकृते र्महांस्ततोऽहंकार स्तस्माद्गणश्च षोडशक: तस्मादपि षोडशकात्पंचभ्य: पंचभूतानीति ॥ १४ ॥

घृणय इव दिनेशे वर्हिषीव स्फुलिंगा स्ततय इव पयोधौ लो-
लकल्लोलकानाम्। समुदय मधिगत्यानेकवारं जगंति त्वयि धृत
नटलीले लीलया यान्ति शान्तिम् ॥ १५ ॥

एवमध्यारोपमुक्त्वा सांप्रतमपवादं स दृष्टान्त माह: घृणय इति हे धृत-
नटलीले भगवति अमूनि जगन्ति इत्थं त्वत्त एव समुदय मुत्पत्तिं अनेकवार
मधिगत्य तुभ्यं वलीलयाशान्ति उपरमं यान्ति तुभ्ये वलीनानिभवंतीत्यर्थ: अत्र
दृष्टान्तमाहु: कस्मिन्क इव दिनेशे सूर्ये घृणय: किरणा इव तथा वर्हिषि अग्नौ-
स्फुलिंगा अग्निकणा इव तथा लोलानां कल्लोलकानां महोर्मीणां ततय:
पयोधाविव प्रत्यक्षो यमपवाद स्तस्य चक्रम: स्मर्यते जगत्प्रतिष्टादिवर्षे पृथिव्य
प्सु प्रलीयते ज्योतिष्वाप: प्रलीलन्ते ज्योति र्वायौ प्रलीयते वायु: प्रलीयते
व्योम्नितच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मणिष्कले सुप्रलीयत इति ॥ १५

चकितहरिणनेत्रे त्वं मना गेव नेत्रे सदय मलिकनेत्रे मन्मथस्य
च जेत्रे। वितरसि यदि सद्यो विष्णुजिष्ण्वादिवंद्यो भवति स
भवकर्त्ता देवि भर्त्ता च हर्त्ता ॥ १६ ॥

इत्थं वं जगज्जननादिकारणत्वं प्रतिपाद्य भक्तिपथं स्वीकृतं भगवत्या
करुणा रसोद्रेकं दर्शयंति चकितेति चकित स्त्रस्तो यो हरिण स्तद्वदतिचंच
ले नेत्रे यस्या स्तत्संबुद्धौ तथा हे भगवति यदि त्वं अलिके ललाटे नेत्रं यस्य
तस्मिन् शिवे सदयं यथास्यात्तथा स्वकीये नेत्रे मनाक् ईषदपि वितरसि प्रेरय
सि को॰ शिवे मन्मथस्य जेत्रं शरीरं जेतृं शीलमस्य ताहृशे तदैव स शिव:-
सद्य: विष्णुशक्रादिभिर्वंद्यो भवति न केवलमीदृक्प्रभाव एव जायते किंतु भव
स्य संसारस्य कर्ता तथा भर्ता पालयता हर्ता च प्रभवति ईदृक् प्रभावस्तव
करुणा कटाक्षोक्ति ईश्वरोपि यं स्वल्पमपिप्राप्येव स्वष्यादौ शक्तो भवति तर्हि
का वार्ता ऽन्येषा मिति भाव: जेत्रं शरीरे केदारे सिद्धस्यानेकलनयोरि
त्यविश्व: ॥ १६ ॥

छलयसि छल मुच्चै विश्वयोनिं तनोषि शिवयसि शिव मीशि त्वं विभुं संविभर्षि कलयसि किल कालं भासय स्युषाभासं-रू पपि नगकन्ये मन्महे त्वां गुरूणां ॥ १७ ॥

भगवत्याः प्रभावातिशयं दर्शयंति छलयन्मसोति हे ईशि यमाश्रित्य कलिनो लोकं छलयंति तं छलमपि उच्चै स्त्वं छलयसि तथा निखिल विश्वस्य योनिं कारणमपि ब्रह्माणं तनोषि उत्पादयसि तथा सकलविश्व शिव प्रदातारमपि शर्वंशिवयसि तथा निखिलभुवनभर्तारमपि विभुं विष्णु सम्यक् विभर्षि पालयसि अथ सकलनैकशीलमपिकालं कलयसि किं च निखिलार्थभासकमपि उषाभासं सूर्यं भासयसि हे नयकन्ये पार्वति तद्वत् त्वां गुरूणामपि गुरुं वयं मन्महे तेषा मप्यारा ध्यत्वात्यद्वा एतेषां छलादोनां गुरुणां महतामपित्वां गुरुं महतीं मन्महे सर्वभ्योपयत्र त्कृष्टा त्वमेवा सीत्यर्थः ॥ १७ ॥

जयति तव च पूज्ये मंजुलं पादकंजं जनवृजिनरुजो यद्रेणुचूर्णं क्षणोति जलजजनुरजादीन् भक्तिनम्रा न्यदीय स्समुपदिशति गुंज न्मंजुमंजीरभृंगः ॥ १८ ॥

अथ भगवति पादांबुजमहात्म्यं वर्णयंति जयतीति हे पूज्ये मंजुलं तव तत् पादकं जंजयति सर्वोत्कर्षेण वर्त्तते तत्किं यस्यपादकं जस्यरेणुः परागः स एव चूर्णं तल्ललाटेषु लग्न सत् जनानां स्वभक्तानां वृजिनान्यनेक जन्मार्जितानि पापान्येवरुजोरोगा स्तान् क्षणोति नाशयति अन्यच्चूर्णं चिरंभक्षणेन रोगं न नाशयति इदंतु वहिलग्नमपि सद्योनेकरोगान्नाशयतोत्याधिक्यमपि ध्वनितम् एवं सर्वजनानां तत् फलाफलमुक्त्वा महता मपराहुः परोयः यत्पादकंजं मंजुः सुंदरो मंजोरो नूपुर एव मुखरतयाभृंगा सः जलजात् जनु यस्य सब्रह्माजो विष्णुस्तदादोनपोश्वरान् भक्तावनम्रान्वोक्ष्य गुंजन समुपदिशतीवेत्युत्प्रेक्षायद्वा समुपदिशतीति पाठः तत्र शंकल्याण मित्यर्थः य त्तवपादकंजंनत्वैव ब्रह्मादयोपि कल्याणं लभंते तत्र कान्येषां वार्त्तेति भावः भजो हरो हरे च्छयागी हतिहैमः ॥ १८ ॥

झटिति कपटघाटीजुष्टमोहावटेनो वटुतट मभि मग्ना न्दृष्टि दाम्नो हर त्वं त्वदपर इह को वा हंति यो स्मद्विपत्तिं महिषव धत एत त्सर्व मेवा नुमेयम् ॥ १९ ॥

स्वमोहनाशाय तां प्रार्थयंति-झटितीति। हे भगवति कपटरूपाभि घांटी भिर्जुष्टे सेविते मोहरूपे ऽवटे महागर्त्ते वटुतटं कंठाग्रभाग मभिव्याप्यमग्ना नन: अस्मान् तु करुणा रसार्द्रदृष्टि रूपेण दाम्ना रज्वा झटिति शीघ्रं उद्धरनु- मोहनाशक तया प्रसिद्धा विष्ण्वादयोपि संति तान्विहाय कस्मात् भे प्रार्थना क्रियतइत्यत आहु: हे जननी त्वत्तो ऽपर: इह को वर्तते योऽस्माकं विपत्ति हंति ननु किमत्र प्रमाण मित्यत आहु: एतत्सर्वमपि विपत्तिनाश परमानंद दानादिकं महिषस्य वधत एव दृष्टांतादनुमातुं योग्यं यथा सकल विश्वस्य प्रदाता महिषस्त्वयैवहत स्तथा महामोहस्यापि हननंत्वयैवकार्यं नान्येनेतिसं भावनीयमिति भाव: अवटु घांटा कृकाटिके त्यमर: ॥ १९ ॥

ज्ञपिटभि रिति नेके र्निर्मितं किं तु नां कि हिमगिरिशकले । वा किं तु जाड्यापहारि ।तव वपु रिति तर्कै श्चिंतयंतो हि- मात निंदधत इह पादं मूर्द्ध्नि तैः सत्कवीनाम् ॥ २० ॥

इदानीं भगवतो शुभ्रध्यान फलो द्रेकमाहु: तव चकारादि शब्दस्या प्रसिद्धत्वात्सं जकार मिश्रितत्वेमव रचयंति ज्ञपिटभिरिति हे मात: शुभ्र सन्नोपे तत्वादशदं तव वपु: इतितर्कैर विशदहष्टांताधिक्य प्रति पादकै रूहै श्चिंतयंतो ध्यान विषयी कुर्वंतो भक्ता: सत्कवीनामपि मूर्ध्नि पादं निधत्त स्थापयंति म हाकवयो भवंतीत्यर्थ: इतिकै स्तर्कैरित्यत आहु: इतोदं भगवत्या वपु: किं चने कै श्च स्य बुधस्य पिटभि श्चंद्रे निर्मितं किंतु चंकि कलंकसहितं नास्ति यदि चंद्रे निर्मितंस्या त्तर्हि कलंकि स्यातद स्तथा विधं नास्तीत्यर्थ: अथ पक्षांतरे मभू साहश्यं परं तु हिमगिरे: शकले निर्मितं स्यात् किंतु इदं वपु ध्यायतां जाड्यं मौर्ख्यं मपहरतीति तच्छोमस्तु हिमाचलस्तु प्रत्युतजाड्यं शैत्यं करोति तस्मात स्तथाविधमपि नास्ति किं तु भ्यां विलक्षणमेव किमपि निरतिशयने

मल्योपेत मस्तीतार्थः सर्वोपमेयस्य भगवति वपुषो ऽनेकचंद्रहिमगिरिशकला भ्या मुपमानाभ्यां निष्कलंकत्वा ज्जाड्यापहारित्वधर्माभ्या माधिक्य-वर्णना दतिरेकः सात्त्विकध्यानस्थत्वात्तस्य कवित्व रूपं फलमुक्तं श्रीशंकराचार्यैः शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटांवरत्रासत्राणस्फटिकगुटिकापुस्तकधरां सकृन्नत्वानत्वा कथमपि सतां संति दधते मधुक्षीर द्राक्षा मधुरिमधुरीणा भणितय इति ॥ २० ॥

टुणुठुणुढुणुरावै र्नर्त्तनोत्थे स्व भावे स्त्वयि सममगरीणां वाद्यंत्यां स्त्रीणाम् । भजति हि जडजातं चेतनत्वं तदानीं सचिदपि च जडत्वं देवि चित्रं तदेतत् ॥ २१ ॥

एवं सच्चिदानंदात्मकत्वेन सकलविश्वरूपेण च स्तुत्वा विशेषा न्महासरस्वत्यादिरूपेणस्तुवन्ति तत्र टठढाणामेकेन पद्येन रचनामाहुः टुणेति हे देवि सरस्वतीरूपे अमरीणां देवस्त्रीणां नर्त्तना दुत्थितैः टुणु ठुणुइति मंजीर रावैः तथा तासां तदुत्थिते भावे भ्रुजाक्षेपादिचेष्टाभिः सह त्वयि स्त्रीणां वादयंतयां सत्यां तदानीं परमरसोद्रेकात् जडजातं अचेतनं पाषाणादिकं चेतनस्य चलनादिकं भजति अथ सचित् सचेतनं स्त्रीपुरुषादिकं जडस्य धर्मं निश्चेष्टत्वादिकं भजति तदे तन्महच्चित्र मस्ति अचेतनसचेतनयो र्मिथो धर्मविनिमयात् ॥ २१ ॥

डयत इह हि वीनां खं यथाशक्ति पंक्ति र्निजभुजबलतुल्यं नीरनाथं तरन्ति । निजमतिपरिणामं वक्ति तद्द द्भवंतीं नुनुविषु रिह सर्वः कोपिनै ति त्वदंतम् ॥ २२ ॥

स्तुत्यविषयतां दृष्टांतेन दर्शयंत स्तत्प्रवृत्तो स्वनिर्दोषतां दर्शयन्ति डयतइति हे भगवति इह हि वीनां पक्षिणां पंक्तिः खं प्रति यथा शक्ति स्वशक्ति मनतिक्रम्यैव डयते नतु तदन्तं प्राप्नोति तथा तितीर्षवो निज भुजबलतुल्यमेव नीरनाथं समुद्रं तरन्ति नतु तत्पारं लभंते एवं दृष्टान्त मुक्त्वा दार्ष्टान्तिके योजयन्ति हे भगवति तद्वदिह सर्वोपि नुनुविषुः स्तोतु कामो जननि जगति

परिणामं यावत् स्वबुद्धा विषयो कृतं तावदेव भवन्तीं लक्षणया त्वद्गुणा नि-त्यर्थः वक्ति त्वदन्तं त्वद्गुणानां पारन्तु कोपि जनो ब्रह्मापि वा न प्राप्नोति त्वयि विषये सर्वज्ञानामपि ब्रह्मादीनां स्तुते रननुरूपत्वादस्माक मल्पज्ञानां स्तुते रनुनुरूपत्वं नोपालं भनीयं अननुरूपत्वस्योभयत्रापि तुल्यत्वात् किं तु मशः पतंत्यात्म समं पतत्रिण इत्याद्युक्तन्यायेन स्वस्वबुद्ध्यनुसारेण स्तुवतां न कश्चिद्दोषोस्ति प्रत्युतयोग्यमेवेतिभावः डयतइति डीङ् विहाय सा गतौ यातु नगौ को वाजिविकिर विविष्करपतत्रय इत्यमरः ॥ २२ ॥

तव तनुम्टदुताया मालती यं पुरस्ता द्भजति खलु दृषत्त्वं सांप्रत लोक मातः तव हि युधितु तन्वाद्दष्टमीदृग्दृढत्वं दृषदपि हि यदग्रे मालतीत्वं वभार ॥२३ ॥

तवेति हे लोकमातः तव तनो र्मृदुतायाः कोमलत्वस्य पुरस्ता दग्रं इयं मालत्यपि सांप्रत मधुना दृषत्त्वं शिलाया धर्मं काठिन्य रूपं भजति अयं भावः अधुना तु तव शरीरस्य कोमलत्वमीदृशं भाति यदग्रे महाकोमला-पि मालती शिला वत्कठिना भाति किमन्य त्तव कोमलातातिशयं ब्रूमः अ-थवा यस्या एवातिकोमलाया स्तव तन्वाः शरीरस्य युधि युद्धसमये तु ईदृश दृढत्वं काठिन्यं अस्माभि र्दृष्टं यस्य काठिन्यस्याग्रे दृषदपि अति कठिना शिलापि मालती वदती कोमला भाति स्म परं किं काठिन्यातिशयं तव वपु-षो ब्रूम इति भावः अतिकाठिन्यं तुत्र नाना विधातितीक्ष्णशस्त्रास्त्रै रक्षतत्वा दक्षतत्वाच्च बोध्यम् तदुक्तं मार्कंडेये चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपीति अत्रैकस्मिन्वपुषि विरुद्धयो र्मृदुत्वकाठिन्य यो र्निरूपणा दाधेय पर्यायालंकारः तयो रग्रे मालती दृषदोरपि दृषत्वमाल-तीत्वधर्मोपहितत्व वर्णनादतिशयोक्तिः अनयोश्चात्र संसृष्टिः ॥ २३ ॥

स्थविर विरचनेश त्यक्तदंभोसि शंभो दिनकर तिमिरारे दैत्य जिष्णो च विष्णो । स्त्वय परिहृ रेदंभासय त्राहि सर्वं सदय मि ति तवोक्ती राजते मात रेषु ॥ २४ ॥

अथ थकारादेरप्रसिद्धत्वा त्सकारा संप्रकत्वेन तदादिं रचयंति स्थविरेति हे मात: एषु ब्रह्मादिषु कार्येषु प्रयोजितत्वादितीयं सदयं तव क्रमादुक्ति: राजते इति का हे स्थविर ब्रह्मन् यत स्त्वं विरचने ईश: समर्थोसि अत: इदं सर्वं जगत् रचय इति ब्रह्माण मुक्त्वा पुन: शंभु मभिमुखीकृत्य गदसि हे शंभो यत स्त्वं तरसादंभोसि अत इदं परिहर प्रलये स्वस्मिन् लीनं कुर्वित्यर्थ: सदंभोसि चोरवत्परिहरन् पुन र्न सृजति त्वं तु तरस दंभस्त्वात् परिहृत्यापीदं पुन: सृष्ट्यादौ सत्त्वसोनात स्त्वमेवास्मिन् कर्मणि योग्योसीति भाव: इति शिव मुक्त्वा सूर्यं गदसि हे दिनकर त्वं तिमिरस्य अरि र्ध्वंसकोसयत इदं भासय अथ हे विष्णो त्वं दैत्यानां जिष्णुर्जयनशीलो।ऽस्यत इदं त्राहि यत्त दैत्या हि लोकबाधां कुर्वंति तान् नानावतारै र्निहत्य त्वमेव विश्वपालने योग्योसीति भाव: प्रभुर्हि यथायोग्यमेव तत्तत्कर्मणि स्वभृत्यान्यो जयति अने-नेव च तत्कापि भृत्येषु सूचिता भवती त्यतो भगवत्या: सर्वेषां प्रभुत्वं द-र्शितं अत्रैकैकया रचनादिक्रियया एकैकस्य स्थविरादिपदस्य समन्वया यथा-संख्यालंकार: अमुमेव क्रमिकालंकारं केचिद्वदन्ति ॥ २४ ॥

द्यु सरि दसि पुनाना मोहवृक्षं धुनाना हरसि निजजनानां-पापतापां श्च नाना।सुचिदमृतनदीनं ज्ञानरत्नं न दीनं पिहि-तविकृतिमीनं देवि या स्वात्मनीनम्॥ २५॥

द्यु सरदिति हे देवि त्वं पुनाना त्रिलोकी पवित्री कुर्वाणा द्यु सरित् गंगा रूपासि कीदृशी मोहो।ऽज्ञानं तदेवावरकत्वात् वृक्षस्तं धुनाना कंपयन्ति नदीं हि तीरस्थं तरुं कंपयति तथा त्वं निजजनानां स्वभक्तानां कायिकमानसि कादिभेदेन नानाविधान् पापान् तथा अध्यात्मकादिभेदेन नानाविधान् तापान् हरसिगंगापीदृशी भाति अथात्वं सुष्टु शोभनचिदमृतात्मकं नदीनामिनं स्वामिनं समुद्रं सच्चिदानन्दात्मक ममृतसमुद्ररूपं परं ब्रह्मणासि तच्छक्तित्वेन प्राप्नोषि तस्य समुद्ररूपतां दर्शयन्ति कीदृशं ज्ञानरूपं रत्नं यस्मिन् अतएव दीनं क्षुद्रं न किंतु परिपूर्ण मित्यर्थ: तथा पिहिता अन्त स्तिरोहिता विकृतय: षोडश उप-

लक्षण मेतत् तेन प्रकृतेरपि ग्रहणं तद्रूपा मीना यस्मिन् अन्ते हि भगवाक्ष-हदादिकं स प्रकृतिक मन्तर्निवेश्य शेते तथा आत्मने स्वस्मै उचितं आत्मनीन आत्मन्विश्वजन भोगोत्तरपदात् खः ॥ २५ ॥

धरणिधरतनूजे देवतानां पितॄणां क्रतुषु च पितृदाने त्वं हि सौहित्यहेतुः। इति भगवति नोचेस्त्वा मुदस्या पितानां सा, रपि फलभुजः स्वाहस्वधारूपिणी ते॥ २६॥

धरणिधरेति हे धरणिधरस्य हिमालस्य तनूजे पार्वति क्रतुषु अश्व-मेधादिषु देवतानां पितृदाने श्राद्धादौच पितॄणां सौहित्यस्य तृप्ते हेतु स्वयमे-वासि अमु मेवागमसिद्धमर्थं व्यतिरेकेण द्रढयन्ति हे भगवति इति चेत् न स्यात् यदि त्वं हेतु र्न स्या इत्यर्थः तर्हित्वां स्वाहा स्वधारूपिणींउदस्य त्यक्त्वापि तदुच्चारण मकृत्वापीत्यर्थः क्रतुषु श्राद्धे ष च अर्पितानां पुरोडाशादीनां क-व्यानां च फलभुज स्ते देवाः पितरश्च स्यु र्भवेयुः न भवन्तीत्यस्त्वमेव मु-ख्यतया हेतु रसीत्यर्थः तदुक्तं मार्कंडेये यस्या समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि वैपितृगणस्य च तृप्तिहेतु रुच्चा-र्यसे त्वमत एव जनैः स्वधा चेति अनुमानालंकारः अत्र धरणिधरतनूजे इति संबोधनमपि न केवलं त्वं यज्ञादि भुजामेव तृप्तौ हेतुरसि किंतु यष्टुरपि फल सिद्धौ त्वां त्यक्त्वा सोपि न फलसिद्धिं लभते इति सूचकं तथाहि पुराहिता मनादृत्य यज्ञमारभमाणस्य दक्षस्य यज्ञध्वंसो ऽभूत् अतस्तं सदोषं मत्वा तज्जनितं शरीरं तत्रैव हुत्वा पुन र्हिमालयस्य पुत्री जातासीति ॥ २६ ॥

न च निजकृतयज्ञा स्तत्समाप्तौ फलंति प्रभवति फलशाली दावदग्धो न शाखी। फलभु गिह मखानां त्वद्गवत्यैव जंतु र्निहितनिज वसूनां साक्षिणे वोत्तमर्णः ॥ २७॥

इति गूढ मुद्रा संप्रति स्पष्टमाश्रयात्तु परमेश्वरनिरपेक्षया कर्मजनिता पूर्वादेव शुभाशुभप्राप्तिं मन्यमानानां मीमांसकानां मतं निराकुर्वंतः स्तुवन्ति नचेति हे भगवति निजेन यजमानेन कृता यज्ञा स्तेषां यज्ञकर्तृक्रिया द्रव्या-

णां भाशुतरविनाशित्वा त्समाप्तौ विनाशे सति स्वयं न फलन्ति न हि प्रध्वस्तं कर्म क्वापि फलितं दृष्ट मिति दर्शयितुं दृष्टान्त माहुः यतो दावाग्निना दग्धः शाखी वृक्षः फलशाली न भवति यदि दाव दग्धो वृक्षः फलवान् भवेत् तदा प्रध्वस्तं कर्मापि स्वयं फलेत् अकारणकार्योत्पत्ते रुभयत्रापि तुल्यत्वादिति भावः तर्हि कोन्यः फलदातेत्याहुः तत्तस्मा त्कर्मणां स्वयं फलितु मनीशत्वात् इह यज्ञेषु भगवत्य्रेश्वररूपया यजमानो मखानां फलभु ग्भवति अत्र दृष्टान्त माहुः निहितानां स्थापितानां निजवसूनां धनानां उत्तमर्णः धनप्रयोक्ता साक्षिणा यथा फलभुग्भवति अयमर्थः यथा कश्चिदुत्तमर्णः प्रमाणनिश्चितदीर्घं कालावस्थानं स्वधनार्पणसमर्थं कंचित् साक्षिणं निरूप्य अधमर्णे पलायितेपि एतस्मादेव धनाढ्या त्साक्षिणः सकाशा द्धनं प्राप्स्यामी त्यभिप्रायेण यस्मै कस्मैचिदधमर्णाय ऋणं प्रयच्छति तद्वदधमर्णस्थानीये कर्मणि प्रलीनेपि त्वत्त एव साक्षिस्थानीया या एतत् फलं प्राप्स्यामीत्यभिप्रायेणोत्तमर्णस्थानीयो यजमानो निःशंकमेव कर्मानुत्तिष्ठतीति भावः उत्तमर्णाधमर्णौ द्वौप्रयोक्तृग्राहकौ क्रमादित्यमरः ॥ २७ ॥

पवनगतिनिरोधा च्चेतसो देशबंधा दितरविषयशून्यां वृत्तिमापादयंतः। दशशतदलपद्मे ज्योतिरंब त्वदीयं किमपि यमिन आनंदाश्रु ता वीक्षयंति॥ २८॥

एवं भगवती प्रसादेन यागफलप्राप्ति मुक्त्वा विहितानां शुभफलजनकत्वानुपपत्त्याधर्माख्य मपूर्वं कल्पनीय मिति पक्षो निराकृतःसंप्रति नित्यज्ञानेच्छा प्रयत्नवानीश्वरो न मुख्य इति तार्किकाणां क्लेशकर्मविपाकाशयैरसंसृष्ट पुरुषविशेष ईश्वरश्चितिरूपो न मुख्यो च नाप्यद्वितीय इति पातंजलानां मत निरस्यंत स्त्वमतेनैवाद्वितीयपरमानन्दरूपत्वे विद्वदनुभवरूपं प्रत्यक्षं प्रमाणं वदन्तः स्तुवन्ति। पवनेति हे अम्ब जननि यमिनः यम नियमादिसाधनसंपन्ना योगिनः दशशतदलपद्मे ब्रह्मरंध्रीयसहस्रारकमले किमपीदं तया वक्तु मशक्यं सत्यज्ञानानन्दात्मकं त्वदीयं त्वद्रूप मित्यर्थः सम्बन्धस्तत्र राहोः शिर इति वदुपपन्नः ज्योतिः स्वयं प्रकाशात्मकं रूपं वीक्षयन्ति वेदान्तवाक्यजन्ययाखंडा-

कारहत्याऽपरोक्षी-कुर्वन्ति तत्रानन्दस्य निरतिशयतां दर्शयन्ति की॰ यस्मिन् आनन्दमये समुद्रे आप्लुताः स्नाताः यस्य हि लेशमात्रमपि स्पृष्ट्वा सकलतापोशमेन सुखिता भवति किमु वक्तव्यं तस्य स्नानरूपसर्वांगयोगेनेति कारणातिशयात् कार्य्यातिशयः सूचितः एतादृशब्रह्मानन्दानुभवस्य साधारण कारणमाहुः किं कुर्वंतः पश्यन्ति पवनानां प्राणादीनाङ्गते र्बहिः निस्सरणस्य निरोधात् शास्त्रोपदिष्टमार्गेण कृतप्राणायामत्वादित्यर्थः तल्लक्षणं सूत्रं पातंजले तस्मिन्सति श्वासप्रश्वासयो र्गते र्विच्छेदः प्राणायाम इति ततश्च चेतसो वशी करणार्थं देशे मूलाधारादिषट्चक्राणा मन्यतमस्थानेवं धादवस्थापनात् अनेन धारणोक्ता तदुक्तं तत्रैव देशबन्धश्चित्तस्य धारणेति ततश्च इतरविषयेभ्यो बाह्य विषयेभ्यः शून्यां रहितां चित्तस्य वृत्ति मापादयन्तः साधयन्तः अनेन योग उक्तः तदुक्तं तत्रैवयोगश्चित्तवृत्तिनिरोध इति चित्तस्य निर्मलसत्त्वपरिणाम रूपस्य या वृत्तय स्तद्रूपा स्तासां निरोधो बहि र्मुखतया पातं परिणति विच्छेदादन्त र्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग इत्यर्थः अत्र पंचमद्यावानन्तर्यार्थं वृत्तिनिरोध हेतो वा बोधयन्तीति स्वार्थे णिच् ॥ २८ ।

फणिन मधिशयानो धातु राधार एष प्रभु रपि गत आधेय त्वं मेषोपि शेषः । परिलुठति पयोधौ तस्य चाधारभूता त्वमसि तलविहीनस्या प्य त स्त्वां श्रिताः स्मः ॥ २९ ॥

एवं योगिगम्या मुक्ता सांप्रतमाधारभूता जगतस्त्वमेकेति प्रतिपादयितु माधेयापेक्षया आधारस्य महत्त्वादाधाराणामप्याधारभूतां भगवतीं प्रतिपादयन्तः स्तुवन्ति फणिनमिति हे भगवति एष प्रभु र्विष्णुर्धातु र्ब्रह्मण आधारो स्ति तन्नाभिपद्मं श्रितवतो ब्रह्मण आधेयत्वादतो विष्णु र्महानाधारत्वादिति भावः अथैव विष्णुरपि फणिनमधिशयानः फणो शेषे आधारे शयानः आधेयत्वं गतः अतः शेषो महान् अथैव शेषोपि पयोधौ परिलुठति अतः शेषाधारत्वात्पयोधि र्महान् अथ तस्य पयोधेराधारभूता तु त्वमेवासि ननु तस्याधार मन्यत्तलं कल्पयाम इत्याशंक्याह कीदृशस्य तलविहीनस्य अपि शब्दोऽवधा-

रणं तलविहीनस्यैवेत्यर्थः तेनाधारभूततल्लस्याभावे स्थिते रभावात्तस्याधार स्त्वमवश्यं कल्पनीया अथ कल्पितेप्यन्यस्मिन्नाधारे तस्याप्याधारान्तरं स्यादि त्यनवस्था प्रसङ्गः अत स्त्वामेव सर्वथा माधारभूतां वयमपि श्रिताः विष्णादी नां त्वाश्रयत्वा त्तदाश्रयणं नातिवर मितीतरश्रयणनिवृत्तिः सूचिता अधि शीङ् स्थासामाधारः कर्मेति फणिन मिति द्वितीया अत्रोत्तरोत्तरोत्कर्षात्सा-रालङ्कारः॥ २९॥

वटकिसलयतल्प कल्पकाले शयालुं कि मिति किमु निदानं मे च सिंधौ स्थितिः क्व। इति मुखधृतपादांगुष्ठ माचिंतयंतं हरि मवहरिडिंभं चक्रिथ प्राप्ततत्त्वम्॥ ३०॥

ननु विष्णुरपि भक्तानां माश्रयोस्तीत्याशंकापनुत्तयेसोपि त्वत्तएव किंचि त्तत्वज्ञानं लब्ध्वा भक्तानां माश्रयो जात इत्याचक्षाणाः स्तुवन्ति वटेति हे अव हरि दुरितनाशिके स्वभक्तस्याज्ञानरूपे दोषनाशिके वायुराकल्पकाले प्रलयान्ते वटस्य किसलयं पत्रं तदेव तल्पं तस्मिन् शयालुं तं डिंभं शिशुरूपं हरिं विष्णो त्वमेव प्राप्ततत्त्वज्ञानं चक्रिथ कृतवती कीदृशं अज्ञानोपहितत्वात् आसमन्तात् चिंतयन्तं इति किं इतीदं दृश्यमानं मम शरीरं वटो वा किमस्ति अथ मम निदानं कारणं वा किमस्ति कुतोहं जात इत्यर्थः अथच अवसिन्धौ प्रलयाब्धौ मम स्थितिर्क्वेति कुतो जाता पुनः कीदृशं बालप्रकृतित्वात् स्तनाश्रद्धया मुखे धृतः पादस्याङ्गुष्ठो येन पूर्वं हि प्रलयाब्धौ चिंत्यभूतं हरिं प्रति भगवती प्रादुर्भू येत्याह हे वत्स त्वमस्य जगतः स्रष्टाद्यर्थं मयोत्पादितोसि इदं हि सर्वमन्म यमित्यादितत्त्वमादिष्टवतीति सेति हासं देवीभागवतादवगन्तव्यम्॥ ३०॥

भजति हिमगु मेणो निर्जित स्ते सुदृग्भि र्हिमगु रपि गिरी शं त्वन्मुखश्रीहृतश्रीः। प्रणमति गिरिशोपि त्वां सती मूर्ध्नि धृत्वा ऽनुनय मिव विधातुं त्वां विना ह्याश्रयः कः॥ ३१॥

एवं विष्णो राश्रय मुक्त्वा सम्प्रति सर्वथा माश्रयभूतत्वेन भगवतीं लोकोत्तरो रीत्या स्तुवन्ति भजतीति हे भगवति तव शोभनाभि र्दृग्भि र्निर्जितः एणो

मृगः हिमगुं चन्द्रं भजतीति अन्योपि केनचिन्निर्जितः स्वरक्षायै महान्तं श्रयति अथ स चन्द्रोपि तव मुखस्य श्रिया शोभया हृता दूरीभूता श्री र्यस्य तादृशः सन् गिरिशं शिवं भजति अथ स गिरिशोपि तौ श्रिया जितौ मृगचन्द्रौ मूर्ध्नि धृत्वा आत्मानं त्वद्विपक्षाश्रयणादपराधिनं मन्यमानः तव अनुनयं क्रोधापनय मिव विधातुं साम्प्रतं त्वां प्रणमति ननु मृगचन्द्रवत् शिवोप्यन्यं किं श्रित इत्याहुः हि यतः त्वां विना कः अपर आश्रयोस्ति श्रितेप्यन्यस्मिन् पुनरपि त्वदितराश्रयाभावात्प्रथममेव त्वदाश्रयणं युक्तमिति भावः अन्योपि महाबलस्तु- स्तं यं कंचिचिदपि परिरक्षन् स्वयमपि भीतस्तमग्रे कृत्वा क्रोधाप नयनाय प्र- णमति ॥ ३१ ॥

महति फणिनि विष्णो र्निद्रया घूर्णितस्य श्रुतिमलजनितौ- तौ दानवा वत्तु कामौ । इति विधि रपि दृष्ट्वा यां तुतोषासि काली दशपदमुखि हंत्री त्वं मधोः कैटभस्य ॥ ३२ ॥

न केवल मधुनैव महिषं हत्वा त्वया वयं रक्षिताः किंतु पुरापीति दर्श- यितुं महाकालीरूपेणस्तुवन्ति महतीनि पूर्वं जगत्ये कार्णवीभूते सति महति फणिनि शेषनागे निद्रया निद्रारूपिण्या भगवत्या आघूर्णि तस्य विष्णो र्वाम हस्तकनिष्टिकाघर्षणजातात् श्रुतोः कर्णयो र्मलात् जनितौ तौ मधुकैटभ नाम दानवौ ब्रह्माणमत्तु कामौ भक्षितु मुद्यतौ जातौ अथ विधि ब्रह्मापि इत्थं वं विधौ दृष्ट्वा विष्णो र्नाभिकमले स्थितः सन् यां एकाग्रमनसा स्वरक्षाय तुतोष सा कालीरूपा त्वमेवासि अस्या ध्यानमाहुः दशमिताः पदा मुखानि च यस्या स्तत्संबुद्धि स्तथा उपलक्षणमेतत् तेन भुजा अपि दशमिता बोध्याः मध्यमपदलोपित्वाद्वा भुजपदलोपः अस्याः ध्यानमाहुः तस्या तु कामस्य मधो कैटभस्यापि हंत्री विष्णो रङ्गानि त्यक्त्वा बहिःस्थिता सती तयो र्बुद्धिमोहयित्वा विष्णु च योध यित्वा तौ हतवतीत्यर्थः अस्याः सायुधं ध्यानं तूणं खङ्गं चक्र गदेषु चापपरिघान् शूलं भुसुण्डीं शिरः शंखं संदधतीं करे स्त्रिनयनां सर्वाङ्ग भूषावृतां यामस्तौत् सुपिते हरौ कमलजो हन्तुं मधुकैटभं नीलाश्मद्युति मास्यपाददशकां सेवे महाकालिकामिति ॥ ३२ ॥

यदि वय ममुना प्रा क्कांदिशीकीकृता द्राक् परमविपद माप्ताः सार्धं मीशात्मभूभ्यां। हरिमभिगतवंत स्तत्र ते जांतकोपै र्निहितनिजमहोभिः प्रादु रासी स्त्व मीशि ॥ ३३ ॥

अथ प्रतरचायाःश्रीमहालक्ष्म्या अवतरणहेतुं प्रदर्शयन्तःस्तुवन्ति यदीति हे ईशि प्राक् पूर्वं यदि यस्मिन् काले वय मिन्द्रादयो देवाः अमुना महिषेण द्राक् शीघ्रं कां दिशी कीकृतास्सन्तः परमां विपदं वनदुर्गमादिभ्रमणरूपां प्राप्ताः तदानीं गुरुणा मन्त्रयित्वा ईशात्मभूभ्यां शिवविधातृभ्यां सार्धं हरिं प्रति वयं गतवन्तः तत्र हरिलोके च तैः शिवादिभि रस्माभिः जातकोपैः सद्भि स्त्वं महालक्ष्मीः प्रादुरासीत्कैः कृता निजेन त्वयैव तेषु पूर्वं निहितै र्महोभिः कृत्वा पूर्वं त्वमेवास्मच्छरीरेषु तेजोरूपेण स्थितासीः पुनरस्म त्प्रार्थिता सती स्व भक्तानुग्रहाय ततः प्रादुर्भूता नतु जाते त्यर्थः ॥ ३३ ॥

रणमखधृतदीक्षा कुर्वती माहिषं त्वं वलि मपि दनुजासून् जुह्वती कालवह्नौ रुधिरघृतविलिप्तेनत्रिशूलस्रुवेण प्रचुरमुद मदास्सौ र्न स्तदुद्वीक्षणेन ॥ ३४ ॥

तत्कर्म स्तुवन्ति रणमखेति सा त्वं महालक्ष्मीः रणरूपे मखे धृता दीक्षा यया तादृशी सती माहिषं महिषस्य बलिं कुर्वती तथा दनुजानामसून् प्राणान् हव्यरूपान् तेषां रुधिररूपेण घृतेन कृत्वा विलिप्तेन त्रिशूलरूपेण स्रुवेण कालरूपेण वह्नौ जुह्वती सती तस्य रणमखस्य उद्वीक्षणमात्रेणैव नोऽस्मभ्यं परममुदमदास्सीः यज्ञे प्रहृते तत्फलं भुक्त्वा देवा मोदन्ते अत्र तु दर्शनमात्रेणैवेति मखाद्रणमखस्य विशेषाभिव्यञ्जनादव्यतिरेकालङ्कारः ॥ ३४ ॥

ललितदति भवत्यै वैष संवर्धितः प्राक् मदमल मपहर्तुं नः शचीशादिकानाम्। विपदपहृतये न स्तं त्व मेवा वधीर्द्रा क्रततिरिव सौ रीस्त्वीयघर्मं स्त्वष्ट्रा ॥ ३५ ॥

न चाम्बद्रत्ते शत्रुनिग्रहे च तव वैषम्यापत्ति नियन्तृत्वादितग्राचक्षाणाः स्तुवन्ति ललितदतीति हे शोभनदन्ति एष महिषः प्राक् पूर्वं भवत्यैव संवर्धितः ऐश्वर्यादिभि रिति शेषः ननु दुष्टस्य सबर्द्धने महाननय इत्याशंक्याहुः किं कर्तुं अस्माकं शचीशादिकाना मिन्द्रादीनां देवानां मदमशास्त्रीयविषयसेवोन्मुखत्वनाशमन्यत्यन्तपूज्यत्वातिशयाध्यारोपस्तदेवमलिनप्रकृतिकत्वान्मलंत द पहर्तुं नाशयितुं प्रतुशतत्वया मदरूपस्याऽस्मद्रोगस्यतत्संवर्धनरूपःप्रतीकारोऽकारीतर्थः तर्हि पुनः कथं हत इत्यत आहुः अथ तत्कृतपराभवात्मदेविनष्टे सतिअस्माकं भक्तानां परमां विपदं वीक्ष्य तस्या अपहृत्तयेनाशाय यथा त्वमेव तत्सम्वर्द्धनकर्त्री तं महिषं अवधीः हतवतीतार्थः अत स्वयंसम्वर्द्धने पश्चात्स्वयं नाशने च दृष्टान्त माहुः सौरो सूर्यसम्बन्धिनो कराणां ततिः स्वेनेव जनिते घर्मं निदाघ स्वजनितयैव वृष्ट्या यथा हन्ति तद्वदित्यर्थः ॥ ३५ ॥

वरतनु मतनु स्त्वां वीक्ष्य संहृष्ट आसीत् त्रिभुवन मपि जेतुं श क्य मेवानये ति । अथ हरि जगदंबां त्वां स मत्वा ललज्जे मुहु रपि मुदितो भू च्छम्भु हृन्मोहिनीति ॥ ३६ ॥

इदानीं तस्याः सौन्दर्यातिशयं दर्शयन्तः पार्वतीरूपेण स्तुवंति वरतनुमिति हे भगवति अतनुःकामः त्वां वरतनुं अतिसौंदर्योपितशरीरां वीक्ष्य इति मत्वा सम्यक् हृष्ट आसीत् इति किं मया कामेन केवलमनयैव देव्या त्रिभुवनमपि जेतुं शक्यं किमन्ये र्वनिता वसंतचन्द्रादिभि रितर्थः एकैनैवास्ते एकार्थ्यसिद्धौ बहूनांधारणस्या नौचितत्वात् अथेवं चित्ते हृष्यन्नेव स कामः पुन स्त्वां जगता मम्बां मातरं मत्वा निश्चित्य मनसैव ललज्जे अहो मया कुधिया किं चिंतितं यतो जगन्मातयेति जगतां दोषदृष्टिःप्रतिपादितेति लज्जितोभूदितर्थं अथेति लज्जमान एव मुहुरपि त्वां शंभुहृन्मोहिनो मिति मत्वा मुदितोऽभूत् अयमर्थःमाभूज्जगतां मोहिनी परन्तु ममशत्रोः शम्भोस्तु हृदयं मोहयिष्यतीति हृष्टोऽभूत् अत्र स्वय मुक्तस्य तदविचारणात्स्वयं निषेधादाक्षेपालङ्कारः ॥३५॥

शरण मसि शरण्ये त्वं हि संसृत्यरण्ये गिरिपरिवृढकन्ये के श रण्या स्त्वदन्ये रिपुतति रपि जन्ये यत्त्वया हृत्यनिन्ये त्रिद शपुर मनन्ये चित्र मत्रातिधन्ये ॥ ३७॥

शरणमिति हे शरण्ये अस्मिन् संसृतिरूपे अरण्ये त्वमेव शरणमसि ननु विष्णादयो न सन्तीत्याशंक्याहुः हे गिरिषु परिवृढस्य नायकस्य हिमालयस्य कन्ये त्वत्तः अन्ये इतरे विष्णादयः के शरण्याः सन्ति न केपीत्यर्थः अत्र हेतु माहुः यद्यस्मात् रिपूणां ततिरपि जन्ये युद्धे त्वया आहत्य त्रिदशपुरं स्वर्गं प्रतिनिन्ये नीता हे अनन्ये अद्वितीये अनन्यसाधारणकरुणाशीले वा तथा हे धन्ये अत्र स्वभक्तवत् रिपूणामपि स्वर्गादिलोकप्रापणे अतिचित्रमस्ति मच्छस्त्रैः पूता रिपवोपि स्वर्गान् प्रयान्तु इति दययैव तानपि निहंसीति भावः तथोक्तम् लोकान्प्रयान्तु रिपवोपि हि शस्त्रपूता इत्थंमति र्भवति तेष्वपितेति साध्वीति यदि दुर्जनानपि स्वर्गं नयसि तर्हि का वार्ता सज्जनाना मिति भावः ॥ ३७ ॥

षडपि कुवलयान्याधारसल्लिंगनाभिह्रदहृदयसुकण्ठभ्रूद्वयीम ध्यगानि। सकलजननि भित्त्वा स्वाकसहस्रारपद्मे सह रहसि शिवेन क्रीडसे सर्वदा त्वम्॥ ३८॥

सम्प्रतियोगिगम्यं सूक्ष्मध्यान माहुः षडपीति षट्चक्राणि मूलाधार स्वाधिष्टानमणिपूरानाहतविशुद्धाख्यानि क्रमेण पृथिव्यादि पंचमहाभूतानां मनसश्च स्थानानि एतत्षट्चक्रं कुलपथ इत्युच्यते तदुपरि शिरःस्थं सहस्र दलमकुलपथ इत्युच्यते हे सकलानां वर्णानां जननि मातः कुण्डलिनीमूरूपे आधारादीनि षट् कुवलयानि कमलानि स्वाक् शीघ्रं भित्त्वा सहस्रारपद्मे शिवेन सह सर्वदा त्वं क्रीडसे इत्यन्वयःअयमर्थः आधारे मूलाधारे महीस्थानं चतुर्दलपद्मं भित्त्वा सति शोभने लिङ्गे स्वाधिष्टाने जलस्थानं षट्दं भित्त्वा नाभिह्रदे मणिपूरे वह्निस्थानं दशदलं भित्त्वा हृदये ऽनाहते मरुत्स्थानं द्वादशदलं भित्त्वा सुकंठे विशुद्धे नभः स्थानं षोडशदलं भित्त्वा भ्रूद्वयोमध्यगे

आज्ञाचक्रे मनः स्थानं द्विदलकमलं भित्त्वा ब्रह्मरंध्रे सहस्रदले ऽकुलपथे शिवेन सह सर्वदा त्वं रमसे एतावता एतद्ध्यानयोगेनोपास्यमाना भूमित्यागादिसिद्धिं दिशसि सहस्रदलेन संयुज्यमाना निर्वाणपदवीं दिशसि तदुक्तं कादिमते मूलादि ब्रह्मरंध्रान्तां स्फुरद्विद्युल्लताकृतिम् ध्यायेत् कुण्डलिनीं देवीं तुहिनाचलरूपिणीम् षट्चक्रभेदिनीं देवीं तां च बिन्दुत्रयात्मिकाम् तां च सर्वकलारूपां चिंतयेत्पद्मकानने एवं भावनया जुष्टः परमानन्दनिर्भरः संसारसागरं धीमान् गोष्पदी कुरुते क्षणादिति सिद्धिसोपानेपि संयोजयन् शिवपदे शिव एव प्रजायते कर्त्ता हर्त्ता च सर्वत्र सुरासुर नमस्कृत इति ३८

सकलजनसवित्री चापि शैलेन्द्रपुत्री त्रिभुवनविनिवासा भक्तहृत्पद्मवासा। अपृथगपि शिवा त्वं दाहिके वा श्रयाशात्प रिणयविधितो भूः शम्भुपत्नी ति चित्रम् ॥ ३९ ॥

ननु पुराणेभ्यः श्रूयते तावद्धिमालयस्य पुत्रीभूत्वा चिरं तपसा च भगवती शिवेन परिणीता सती पश्चात्तेन क्रीडयामास कथं तर्हि शिवेन सर्वदा क्रीडसे इत्युक्त मित्याशंकापनोदायाहुः सकलेति हे भगवति इति चित्रमस्ति तवाचिंत्यमहिमत्वा त्तवाश्चर्यमयानि चरितानि सन्ति तानि त्वमेववेत्सि नान्य इति भावः चित्रतामेवदर्शयन्ति यतस्त्वं सकलस्य ब्रह्मादिस्तंभान्तर्वर्तिजनस्य सवित्री जनन्यपिश्रुतिभिः प्रतिपादितासि तथापि शैलेन्द्रस्य हिमालयस्य पुत्री जातासि तथा त्रिभुवनस्य विनिवासो यस्यां तादृश्यपि सती भक्तस्य हृदयरूपे पद्मे वासो यस्या स्तादृशी जातासि अपरिछिन्नापि स्वभक्तभक्तिकल्पिता परिछिन्ना भूतासी त्यर्थः तथा त्वं आश्रयाशात् अग्नेः सकाशात् दाहिका शक्ति रिवात्यन्तं शिवात् अपृथक् अभिन्नापि सती परिणय विधिना हिमालयपुत्री भूत्वा पश्चाद्विवाहविधिना शम्भोः पत्नी अभूः जातासि तदेतद तिचित्रमस्ति तदुक्तं पंचस्तव्यां सुता दक्षस्यादौ किल सकलमातस्त्वमुदभूः सदोषं तं हित्वा तदनुगिरिराजस्य तनया अनाद्यन्ता शम्भो रपृथगपि शक्ति र्भगवतो विवाहाज्जायासीत्यहह चरितं वेत्ति तव क इति ॥ ३९ ॥

हृदयपरपदं ते तद्धि बुद्धे र्दवीयो भजति विमलवाचां कुण्ठतां-यत्र गुम्फः। विधुशकललाटां चारुमुक्ताप्रवेकै स्सुरतरुसुमनोभि मालिनीं त्वां भजामः ॥ ४० ॥

अथ निर्गुणरूपस्य वाङ्मनो ऽगोचरत्वाद्दुर्ग्राह्यतां निश्चित्य सगुणरूपस्य तु सद्यो भक्तिग्राह्यत्वात्तदेव स्वाभिमतत्वेन मुख्यतया प्रतिपादयन्तः स्तुवन्ति हृदयेति हे भगवति तत् तव निर्गुणं निर्विकल्पकं रूपं हृदयादपि परपदमस्ति अथ मनसस्तु पराबुद्धि रिति गीतोक्ते स्तर्त्कि बुद्धिरसि नेत्याहुः तत्तु बुद्धे रपि दवीयः अतिदूरमस्ति अनेनात्मनोपि परत्वं सूचितं यथा तत्रैवोत्तरपादे यो बुद्धेः परतस्तु स इति बुद्धे सकाशादात्मनः परत्वं प्रतिपादितं इदं प्रति दूरत्वात्ततोपि परमित्यर्थः ननु माभूत्मनो बुद्धिविषयं किं तु वाचैव स्तूयता मित्याशंक्याहुः यत्र यस्मिन् निर्गुणस्वरूपे विमलानां वाचां मन्त्रा वाक्यानाम पिगुंफोग्रंथः कुंठता मतद्रूपा हत्वा मंदतां भजति अथैवं सति ध्येयाभावा न्मुक्त्यभावे जगदांध्यप्रसंग इत्यशंका निरासाय सगुणरूपस्य ध्येयतां स्वाभिमतां दर्शयन्ति (तस्मादेतो स्त्वां स्वभक्तानुग्रहाय धृतसगुणरूपां वयं भजामः सुग्राह्यत्वा त्सगुणमेव सेवाम इत्यर्थः सगुणध्यान माहुः कीॽ त्वां विधोश्चन्द्र स्य शकलं खंडमर्धमितियावत् ललाटे यस्याः तथा चारुभि र्मुक्ता प्रवेकैः मौक्तिकवर्यै स्तथा सुरतरूणा मंदारादीनां सुमनोभिः कृत्वा मालनीं मालावतीं उपलक्षणमेतत् तेन नेत्रत्रयाष्टा दशभुजा नुपेतत्वमहः एतावता सात्त्विकं ध्यानमुक्तं प्रकर्षेण दूरं दवीयः दूरस्य दवा देशस्तत ईयसुः अत्र मालिनी वृत्त समासौ तन्नामाप्यभिहितम् ॥ ४० ॥

त्वयस्यां ते वासं यद कृत हरे स्चित्तकुहरे
तदित्थं ते मात श्चरण कमलं निश्चिनुमहे
जगत् स्रष्टुं नाभे स्सरस इव विष्णो रुदभव
त्ततो जातो धाता तत इद मभू द्विश्व मखिलम् ॥ ४१ ॥

न केवल मस्माभि रेव प्रतिपाद्यते किं तु विष्णादयोपि तृत्पदाब्जध्या नेनैव सृष्ट्यादौ शक्ता आसन्निति दर्शयन्तः स्तुवन्ति जयत्येति हे मातः पूर्वं प्रलयाब्धौ योगध्यानमाश्रितस्य हरेश्चित्तरूपे कुहरे विवरे यत्तव चरणमेव कमलं तत् वा समकालमलतवत् तदेव तृच्चरणकमलं जयत्यति सृष्ट्यादौ इत्थं-भूत मासीदिति वयं निश्चनुमहे निश्चयं कुर्मः इत्थं कथ मित्यत आहुः तदेवा तस्तिरोहितं चरणकमलं सृष्ट्यादौ जगत्सृष्टिं रचयितु गंभीरतया सरस इव सरस्तुल्यात् विष्णो र्नाभिः सकाशा दुदभवत् वाह्यकमलरूपेण प्रकटीभूत मासी त् अथे विद्यमानमेव प्रादुर्भूत मित्यर्थः ततश्च कमलात् धाता जातः ततश्च ध तु रिद मखिलमपि विश्वमभूत् अतस्तव चरणकमलमेव विश्वोत्पादने मुख्य तया विष्णादयस्तु निमित्तमात्र मेवेत्यत स्तव पादाब्जस्यापीयती शक्ति रस्ति तर्हि किमु तव वक्तव्य मिति भावः अतस्तदेव ध्येय मिति पर्यवसन्नम् कार्य-निबन्धना अप्रस्तुत प्रशंसेयं अत्र चरणमेव कमलमिति मयूरव्यंसकादयश्चे-त्यनुशासनेनोत्तरपदप्रधानः समासः ॥ ४१ ॥

त्रिनयनां सृणिपाशधनुःशरा न्विदधतीं मरुणां करुणाकरीम्
अनुभजाम सदा निजदेवतां हृदयतामरसे मरसेवितां ॥ ४२ ॥

स्वेष्टध्यान पूर्वकं स्तुवन्ति त्रिनयनामिति वयं तृत्संप्रदायानुरोधिन स्त्वां निजदेवतां स्वेष्टदेवतारूपां त्वां हृदये तामरसे कमल इव सदा अनुभजाम कीदृशीं अमरैः सेवितां अमरेण परमात्मनापि वा सेवितां तथा त्रियनां तथा सृणिपाशधनुः शरान् विदधतीं अनेन चतुर्भुजता सूचिता तथा अरुणां रक्तवर्णां तथा करुणाकरीं अनेन सर्वेषामप्येतच्चैव ध्यानस्य ध्यातृता निर्दिष्टा अत्रांकुशं नाना रत्नखचित स्वर्णमयं तच्च वामोर्ध्वकरे पाशश्च रक्तपट्टनिर्मितः दक्षोर्ध्वे धनुश्चैवं वामाधश्शरा रक्तोत्पलनीलोत्पलकह्लारकुरवकसहकार-मंजरीरूपाः पंचदक्षाधः करेध्येयम् एतस्या एव महाविद्याया ध्यान मप्युक्त म्युक्तम् वालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनाम् पाशां कुशशरां चापं धारयन्तीं शिवां भज इति ॥ ४२ ॥

शक्तिस्त्वं परमे शिवे सि परमा श्रीः श्रीपतौ सर्वदा
गीर्गीर्वाणगुरौ गिरौ तु गुरुता क्ष्मातां क्षमासि ध्रुवम् ।
भा भानौ नितरां रुचिः शुचिरुचौ मुद्रा समुद्रे पुनः
सर्वासां धुर मेक एव वहते त्वद्भक्त आसां शिवे ॥ ४३ ॥

इदानीं सर्वशक्तिरूपत्वाद्विभुत्वद्योतनाय क्वचित्प्रधान्येन तत् स्थितिं प्रतिपादयन्तस्त्वद्भक्तस्य च माहात्म्यं वर्णयन्तः स्तुवन्ति शक्तिरिति हे भगवति त्वं परमे शिवे परमात्मनि चितिरूपा परमाशक्तिरसि यया सोचिद्रूपो गीयते तथा श्रीपतौ विष्णौ सर्वदा श्रीरसि तथा गीर्वाणानां देवानां गुरौ बृहस्पतौ गीर्वाणसि तथा गिरौ जातावेकवचनं गिरिष्वित्यर्थः गुरुता गौरवमसि तथा-क्ष्मायां भूम्यां क्षमाभूरिभारसहिष्णुतासि तथा भानौ सूर्ये भा प्रभासि तथा शुचिर्विशदारुग्दीप्ति र्यस्य तस्मिन् चन्द्रे रुचिः कान्तिरसि तथा समुद्रे मुद्रा-मर्यादासि अथ हे शिवे अमी परम शिव समुद्रा तां व्यस्तां व्यस्तां तव शक्तिं दधति त्वद्भक्तस्तु आसां शक्त्यादिमर्यादां तानां सर्वासां शक्तीनां धुरं भारं एकएव वहति धारयति परमशक्तिमान् श्रीमान् वाग्मी गौरववान् क्षमावान् तेजस्वी रुचिमान् समर्यादश्च भवतीत्यर्थः अत स्त्वद्भक्तः सर्वेभ्योपि गरीयानित्यर्थः ॥ ४३ ॥

अयि जननि न शंभु र्न स्वभू र्न स्वयंभूः
किमपि तव महत्त्वं वक्तु मीष्टे वयं क्व ।
खगपति रपि यत्र श्रांति मेत्यैत्य नांतं
गति मल मनु मंतु तव कम्राटकेरौ ॥ ४४ ॥

इदानीं भगवतो महिमोत्कर्षातिशयं स्वमतापकर्षातिशयं च दर्शयन्तः स्तुवन्ति अयीति हे जननि किमपि इदं तया वक्तुमशक्यं महत्वं वक्तुं शंभु र्न ईष्टे न समर्थः नापि स्वभू विष्णु नापि सुयंभू र्ब्रह्मा तर्हि वयं शक्तादयः क्व समर्थाः न क्वापि अत्र दृष्टान्तः यत्र यस्मिन् देशे पर्याक्रमसि गरुडोपि श्रमं

प्राप्य तदन्तं न प्राप्नोति तस्मिन्नभसि चटका पतत्यस्य अन्तं प्राप्तौ गतिं अनुमन्तुं कोबुधः समर्थो न कोपीतर्थः पुष्पतरो चाटकैव इत्यमरः ॥ ४४ ॥

अयि जननि गिरां त्वदीयवाग्भिः
स्तु ति रिय मस्ति तवैवमेधया पि
अभि मति रिह का स्वकर्तृ तायां
सलिलपतेः सलिलै रिवार्घ्यदाने ॥ ४५ ॥

संप्रति स्तुति मुपसंहरंतस्तत्कर्तव्यतायां साभिमतिं स्वाभिमतिं निरा कुर्वंति अयोति कोमला मंत्रणे हे गिरांजननी त्वदीयाभि रेव वाग्भि स्तवैव च मेधया धारणावत्याबुद्ध्या इयं स्तुति रस्ति तस्मा दिह मु कर्तृतायां स्तुति मयाकृतेति विषये का अभिमति रस्तिपरा पश्यंति मध्यमा रूपया त्वयो ल्ला सितवैखरी समुज्जृं भितनुखया मातृकाचरै स्तवैव कृतिरिय मतो ऽस्माकं स्तुतौ कर्त्तृतेवनास्तीति भावःअत्र दृष्टांत माहुः यथा सलिल पतेः समुद्रस्यैव सलिलैःसमुद्रस्य वार्घ्यदाने कामुाभि मतिर्भवति नच तच्चुलिकामितं सलिलं तन्मये भवति तथापि मुभक्त्यापितं गृह्णाति तथा तवापि सर्वस्वयं संपन्नाया अनया स्तुत्या न काचिद्विशेषता उत्कर्षता जाता परंतु भक्त्या पितामि मां स्तुतिंगृह्णास्ये वेत्यपि ध्वनितम् ॥ ४४ ॥

इत्ये वं त्रिदिवाधिपैर्भगवति सर्वात्मनाभिष्टु ता
रम्यै र्नंदनसंभवैश्च कुसुमै र्धूपादिभि श्चार्चिता
ब्रू ते स्म प्रति तान् प्रसादसुमुखी कारुण्यपूर्णाशया
हे देवा व्रियतां यथाभिलषितं तुष्टास्म्यहं वः स्तवैः ॥ ४६ ॥

इ इतीति सा देवी भगवती इत्येवंदेवैः सर्वात्मतया सर्वस्वरूपत्वे न महाकाल्यादि स्वरूपत्वे न वा अभिष्टुता सती रम्यै र्नंदनवनसंभवैः कुसुमै र्धूपादिभिश्च तैरर्चिता पूजिता सति अथ तान्देवान् प्रतिप्रसादेन सुष्ठु मुखं यस्याः स्तादृ कोगरुण्ये न पूर्णआशयो मानसो यस्या स्तादृशी च सती ब्रू तेस्म किमित्याह

हेवत्ता देवाः युष्माभि र्यथाभिलषितं तथा क्रियतां कुत इद मुच्यतेतत्राह यतोऽहं वो युष्माक मेभिः स्तवैः स्तुष्टास्मि ॥ ४५ ॥

तेथोचु र्भगवति किं परं वृणीमः
सर्वं संप्रति ननु साधितं भवत्या।
यद्दृष्टा खिलजगतां न केवलं नो
जघ्ने सौ युधि परिवारसैन्य वारैः ॥ ४७ ॥

तेइति अथ ते देवा ऊचुः हे भगवति अतः परं वयं किं वृणीमः यतो भवत्या संप्रति सर्वमेव कार्यं ननु निश्चयेन साधितं किं साधन मित्यतआहुः यस्मात् केवल मस्माकमेव न दृष्टा किंतु सर्वजगतामपि दृष्टा ऽसौ महिषः नृप, युधि परिवारैः बंधुभिः सैन्यानां सैनिकानां वारैः समूहैश्च सह जघ्ने हतः यतो ऽस्मदनुग्रहमिषेण सर्वजगतामपि प्रत्युपकृत मिति भावः ॥ ४७ ॥

क्षणमात्रकृतस्य वा वयं प्रतिकल्पं सदनुग्रहस्यते
जननि प्रतिकृत्य मीश्महे न विधातुं ह्यपिधातुरायुषा ॥ ४८ ॥

न च भवद्भि रयं स्तुत्यादि रूप उपकारः कृतः यत स्तत् प्रत्युपकाररूप वरदान मवश्यं कार्य मिति वाच्यं सर्वदा तवैवोपकारकर्तृत्वा दित्याहः क्षणमात्रेति हे जननि प्रतिकल्पं प्रतियुगं क्षणमात्रमपि कृतस्यतवानुग्रहस्य प्रतिकृत्यं प्रत्यनुग्रहं विधातुं कर्तुं धातु रायुषाद्विपरार्धपरिच्छिन्नकालेनापि वयं न ईश्महे न समर्था भवामः तर्हि कि यान यं स्तुत्यादिरूपउपकारः प्रत्युतायं स्वार्थमेव कृतो नत्वेतावता तथापि काचित्सिद्धि रिति भावः ॥ ४८ ॥

तथा पि माता न निजोपकारान्
सुतापकारान् गणयेत्कदाचित्।
सुता स्तु नितान्तार्थितया प्रसिद्धाः स्थिताः
कथंस्या द्यदि चा न्यथास्यात् ॥ ४९ ॥

मन्वर्थ न कृतोपकाराणां प्रत्युपकारमकृत्वाधर्मच्युतिप्रसंग इत्याशंक्या हु: तथापीति एवं त्वयोपकारेषु बहुषु कृतेषु स्वल्पे पि तत् प्रत्युपकारं ऽस्माभि रकृतेपि यथा माता निजोपकारान् सुतानां चापकारान् कदाचिदपि न गण येत् तथा त्वमपिनिखिलमातृत्वात् त्वपकारान् न गणयसि मातृप्रकृति मुक्त्वा सुतानां प्रकृति माहु: एवं मातर्युपकारान् कुर्वाणायां तुयं चाप्रकारान् कुर्वा णा अपि सुता नित्य मर्थितया याचकतयैव प्रसिद्धाः संति यथा सुता इत्थं भू ता अपुनः पुनर्मातरं याचंते तथा वयमपीत्यर्थः उपकारप्रत्युपकाररूपो नि यम तृस्थच मित्रादाविवास्तु नतु सुतमात्रो: एव मेव सनातनप्रहृते रिति हृद्यं ननु कुत इयं विपरीता प्रवृत्ति र्जातेत्याशंक्याहु: यदि अन्यथा स्यात् माता सुताना सुपकार प्रतीक्ष्य तत्सदृशमेव स्वल्पं प्रत्युपकारं कुर्यात् तर्हि सुताना स्थिति जीवनादिका कथं स्यात् तेषां क्षणमात्रमपि कृतस्य मातुरुपकारस्य प्रप्रत्युपकारं कर्तु मशक्यत्वात् ॥ ४९ ॥

तस्मा त्वदित्ससि वरं प्रवरं शिवे चे
दे ह्ये न मेव वरदे यदिवो परिष्टात्
वाधा तवे दसुरजा तदनु स्मृताया
हंतव्यतां व्रजतु ते द्रुतमेव मेव ॥ ५० ॥

इति युक्त्या मात्मनि वरदानयोग्यतां प्रतिपाद्य वरं वरयन्ति तस्मादिति हे वरदे यस्मात् पूर्वोक्ताद्धेतोः यदि तुं प्रवरं श्रेष्ठं वरं प्रदित्ससि दातु मि च्छसि तर्हि एनमेव वक्ष्यमाणं वरं देहि किमित्याहु: यदि यदा यदा उपरि ष्टात् अग्ने पि अस्माकं असुरजा वाधा पीडा भवेत् तदनु तत्पश्चादस्माभि: स्मृता या स्तव एवमेव यथा ऽधुना महिषजा पीडा हता तथा सापि हंतव्य तांद्रुतं व्रजतु सापि त्वयाहंतव्ये त्यर्थ: ॥ ५० ॥

किं च य: स्तुतिभि राभि रादरात्
स्तोष्यतीह भवतीं भवापहाम् ।

तस्य वित्तसुतदारसंपदः संतु
संततसमुच्छ्रिताः शिवे ॥ ५१ ॥

इयं स्वाभीष्टं वरमर्थयित्वा लोकोपकाराय संप्रतिवर मर्थयन्ति किं चेति हे शिवे किंचान्यमपि वरं वृणीमः कमितराह यः कश्चिदन्योपि पुमान् आभिः पूर्वोक्ताभिः स्तुतिभिः भवतीं त्वामिह आदरात् स्तोष्यति तस्य पुंसः स कामस्य वित्तसुतदारादिसंपदः संततं निरन्तरं समुच्छ्रिताः वर्धमानाः सन्तु इति सकामस्य फलसिद्धिं मुक्त्वा निष्कामस्यातद्विशेषणेन सूचयन्ति कीदृशीं त्वां भवापहां अविद्यादिपंचक्लेशनिषेवितताप त्रयप्रधानसंसृतिनाशकां मोक्षप्रदा मिति यावत् अनेन निष्कामः सन् यः स्तोष्यति स तु मोक्षं लभेदिति ध्वनितम् ॥ ५१ ॥

तथेत्युदीर्य तत्र सा प्रपश्यतां सुपर्वणाम्
तिरोदधे सुरेश्वरी महोर्मिरंबुधा विव ॥ ५२ ॥

तथेति अथ सा सुरेश्वरी तेषां प्रार्थनां श्रुत्वा यथा भवद्भिरुक्तं तथैव भवतु इत्युदीर्य उक्त्वा प्रपश्यता मेव तेषां सुपर्वणां देवानां मध्ये तत्रैव तिरोदधे अन्तर्हिता बभूव अत्र दृष्टान्त माह अंबुधौ महोर्मि रिव यथा समुद्रा दुत्थिता महावीचिः स्वोत्थानविलासं कृत्वा पुनस्तत्रैवलीयते तथा सा भगवत्यपि चिदानंद स्वरूपात्परमात्मसमुद्रा त्प्रादुर्भूयदेव कार्यं च कृत्वा पुनस्तत्रैव तिरोदधे इत्यर्थः अयं श्रीमहालक्ष्म्या अवतार स्त्वाश्विनकृष्णचतुर्दश्या मभूत् तच्छुक्लाष्टम्यां महिषवधः नवम्यां देवैः सा पूजिता दशम्यां विसर्जितेति कालिकापुराणे प्रमाणिका वृत्तमिदम् प्रमाणिकाजरौलगाविति लक्षणात् ५२

तव स्म सुमनसो ऽपि ते पथि तदा तदीयां दयां
वधं च परिपंथिनां समिति वर्णयंतो मुदा ।
कुलाय मिव पत्तिभिः परिवृतैर्मरालाद्रुतं
निजं निज मथा लयं प्रययु रुज्झितं दानवैः ॥ ५३ ॥

तत इति ततः श्रीमहालक्ष्मीवरदान तिरोधानानंतरं ते देवा श्रथ तदीयां तस्याः श्रीभगवत्यादयां परिपंथिनां शत्रूणां च समिति युद्धे वधं तदा तथि मुदा परस्परं वर्णयंतः संतः अथ परिहृते विनष्टे पलायिते वा दानवैः उज्झितं त्यक्तं निजं निज मालयं प्रययुः कैस्त्यक्तं कं क इव परिहृतैः पत्रिभिः श्येनैः त्यक्तं निजं कुलायं नोडं मराला हंसा इव अभिघातिपरा राति प्रत्यर्थि परिपंथिन इत्यमरः ॥ ५३ ॥

इत्थं जातकुतूहलेन शिशुनेवेदं मया निर्म्मितं
व्याजेनाप्य मुना निसर्गचपले स्वान्ते निधातुं स्थितिम्।
सावद्यं निरवद्यमस्ति यदिदं तत् क्षम्यतां सूरयः
सम्यक्शास्त्रकृतश्रमोस्मि न यतो युष्मत्कृपातः कृतम् ५४

सम्प्रति कवि ग्रंथकृति मुपसंहरन् स्वाभिमतिं च निरस्यन् निर्मितिदोष क्षमापनाय सूरीन् प्रार्थयति इत्थमिति इत्थ ममुना प्रकारेण जातकुतूहलेन शिशुना इव मया लक्ष्मीनाथेन इदं लक्ष्मीकाव्यं निर्मितं शिशु र्घटादिकं रचयंतं कुलालं दृष्ट्वा जातकौतुकः सन् स्वयमपि मृदं गृहीत्वा रचयति परं तु तद्व न्न रचयति तथाहमपि काव्यकर्तॄन् प्रेक्षावतो दृष्ट्वा जातकौतुकः सन्नत त्सदृश मिदं रचितवान् श्रथ ते तु स्वयशसे रचयन्ति मया किमर्थं रचितमित्याशंक्याह किं कर्तुं श्रमुनापि काव्ये निर्माणरूपेण व्याजेन निसर्गतः स्वभावत एव चपले विशृंखले विषयेषु प्रवर्त्तमानत्वादतिचंचले स्वांते स्वमनसि स्थितिं निधातुं यावतग्रंथानि रचयामि तावत्तु मनः स्थिरं भविष्यतीत्य भिप्रायेण रचितं नतु यशसे इत्यर्थः तत्तस्मात् हे सूरयः लोकोत्तरवर्णननिपुणा यदि इदं काव्यं सावद्यं सदोष मस्ति यदि वानिरवद्यं निर्दोषमस्तितत् भवद्भि स्क्षम्यतां ननु सदोषकृतेः क्षमापनं पंडितै न शक्यते कर्तु मितयतश्राह यतो ऽहं सम्यक् शास्त्रेषु कृतः श्रमः अधायनविचारणाभ्यासो येनतादृशो नास्मिदोषा सहिष्णुत्वं हि सर्वशास्त्रज्ञस्य कर्तो शोभते नस्वल्पज्ञस्य कर्ता तस्मा हि यद्यत् पदं निर्दोषं तत्वतिचिन्त्वबोध्य यद्यत्सदोषं मत्वा तत् प्रकृति रेवेति मुकाक्षंतव्य मति भावः नस्वल्पज्ञस्तुकाव्यं कर्तुं शक्तमन्यथा शक्तिर्निपुणता लोकशास्त्र

काव्याद्यवेक्षणात् काव्यज्ञशिक्षयोभ्यासइति हेतुस्तदुच्यते इत्यालंकारिकवचन वैयर्थ्यापत्तिम्ततस्त्वयाकुतः कृतमित्याशंकापनोदाय तेषामेव महत्वं योजयति इदंतु युष्माकं कृपात एव कृतमतोपि क्षंतव्यमिति ध्वनितम् ॥ ५३ ॥

मम वाग्वितथा अथापि चेद्यपि शब्दात्सखलिता शिशो रिव
नितरां करुणैकशेवधे र्जनयित्र्या भविता मुदे न किम् ॥ ५५ ।

त्वरारोन् प्रथयित्वा तानेवोद्दिश्य ग्रंथाधिष्टात्रीं प्रार्थयति ममेति ममेयं काव्यनिर्मितिरूपावाक् चेद्यदि वितथा प्रमाणशून्या स्ति अथवा अथा माधुर्यगांभीर्यादिसंदर्भरीतिरहिताप न शिथिलास्तियदि वा शब्दात् व्याकरणशास्त्रात् स्खलिता अपभ्रष्टास्ति तथापि नितरां करुणाया एकशेवधिरूपाया निधिरूपाया जनयित्र्याः श्रीभगवत्याः किंमुदे प्रीतये न भविता प्रत्युत निर्दोषरचनातोपि महाप्रीतये भविष्यति इदमेव ज्ञापयितुं दृष्टांतमाह शिशोरिव यद्वत् जनयित्र्या मातुः शिशो र्वाणी यथावितथत्वादिगुणयुक्ताप्रीतये भवति न तथा सत्यत्वादि गुणसंपन्नेति चमत्कारातिशयो दर्शितः ॥ ५४॥

इह शरदि शरात्खखेटचन्द्रै
खनग नगेन्दुभि रुन्मितेशके च ।
विरति मिद मगा दगाधवोधं
शिशिरर्त्ता वसिते दले थ षष्टाम् ॥ ५६ ॥

इदानीं ग्रंथसमाप्तिकालीनं संवत्सरादिकं कीर्त्तयन् ग्रंथं समापयति इहेति इहग्रंथसमाप्तिकाले विक्रमोष्णरश्मे :विक्रमादित्यराज्ञः सकाशात् शरात् पंचभ्यः खखेटचंद्रैः शून्यनवकैर्मिते पंचाधिकनवशतसहस्रपरिछिन्ने शरदि-संवत्सरे व्रजति प्राप्ते सति तथा खनगनगेन्दुभिःसप्तत्यधिकसप्तशतैकसहस्रमिते शके च प्राप्ते सति खल्विति तथा शिशिरर्तौ माघफाल्गुणाख्यर्तौ तत्रापि माघ वोध्यम् तथा असिते दले २१ कृष्णपक्षे षष्ठ्यां इदं श्रीलक्ष्मीकाव्यं विरतिं समाप्तिं मगमत् कीदृशं अगाधो वोधो ज्ञानं यस्मिन् खल्विति वाक्यालंकारे इहेतान्तेना मातृ पत्तन इत्यपि वोध्यम् ॥ ५५ ॥

श्रीमाञ्शंभो श्चरणसदनीभूतहृच्छम्भुनाथो
लक्ष्मीनाथं कविपरिवृढं देशिको सूत यं मां ।
तेनो न्नीते महिष निधने गीतलक्ष्मी चरित्रे
लक्ष्मीकाव्ये विरति मगमत्सर्ग एकादशोयम् ॥ ७० ॥

श्री मानितयादि पूर्ववत् ॥ ६८ ॥

इतिश्रीमद्गोस्वामिवंशावतंस श्रीमच्छंभुनाथात्मज लक्ष्मीनाथ कविविरचिते लक्ष्मीकाव्ये एकादशः सर्गः ॥

इति श्री लक्ष्मीकाव्यव्याख्यायां षष्ठः सर्गः ॥ ६ ॥

आसीदसीममहिमन्युपमन्योरन्वयेमहातेजाः
श्री प्राणनाथनामा दासीकृतसिद्धिसमुदायः ॥ १ ॥

संपूज्यांघ्रे रवनिपतिभि स्तस्यु षो ऽपिस्वगेहे
भोगासंगप्रशमितमते स्तेजस स्तस्यतेजः ।
तत्त्वज्ञाना मपि वनजुषां ना तिरिक्तं बभूव
न्यूनं किं नु स्थलकमलतो ऽलिप्तपंकं पयोजम् ॥ २ ॥

असूत सुतमद्भुतं निजसमं समंजु प्रभं
प्रथा पथिविहारिणं प्रथितपृथ्विनाथाभिधम् ।
मनोरथपृथुव्यथाव्यथितमानसा दर्शनं
बभूवु रथनाथता मिह हि यस्य पृथ्वीश्वराः ॥ ३ ॥

तन्नन्दनो मदनसूदनसादनात्मा
विभ्राजतेजितरिपुः कुलकैरवेंदुः ।
श्रीशम्भुनाथ इति नाम सुधामकांतिः
शांतिर्मति स्व न कदाचन यं जहीतः ॥ ४ ॥

तस्यात्मजोभूदथ विश्वनाथः स्वल्पायुषा धीत समस्तविद्याः
योऽद्रींद्रजाजानिनिशांत मंते सद्भक्तिसोपानपथा प्रपेदे ॥ ५ ॥

गुरुपदांबुजचंचुविहृदस्मयहं भगवति करुणात्मकविल्वधीः ।
तदनुजो दनुजारिवलासिनीप्रथमनाथपराभिधयाङ्कितः ॥ ६

स मां भ्राता ज्यायान् पुर मिह पुरारे र्जिगमिषं
स्त्वया कार्व्यं कार्य्यं सविवृतिदि दिदेशेति सदयम् ।
तदा ज्ञप्तेना स्मि न्निजरचित काव्ये सुविहृतिः
कृतेयंसंक्षिप्ता चरविरदनाभावपिशुना ॥७॥

इतिश्रीमद्गोस्वामिवंशावतंस श्रीमच्छंभुनाथात्मजविश्वनाथ तदनुलक्ष्मीनाथकवि विरचितेलक्ष्मीकाव्येव्याख्यायां एकादशः सर्गस्वरमवर्णध्वंसमगात् ॥ समाप्तमिदं श्रीलक्ष्मीकाव्यं सटिप्पणम् शुभमस्तु सर्वजगतां परहितनिरता भवंतु भूतगणदोषाःप्रयांतु शांतिं सर्वत्र सुखी भवतु लोकः ॥

निद्राद्राघिमदूरविच्युतसुचिच्चातुर्य्यशौर्य्याच्युता
स्वैरोद्घर्षितसव्यकर्णकुहरी निर्गन्मलां डोन्नवौ
मध्येसिंधुविधिःस्वबंधुविधुर स्तावत्तुकामौमहा।
दैत्यौ वीक्ष्यपुरास्तवीतिवतयांतामीश्वरीमाश्रये ॥ १ ॥

उद्यत्संगररंगभंगमघव च्छ्रीमत्पतंगात्मभू-
भूतेशादिदिवीशसंहतितनूजप्राज्यतेजोजनिः
तैरेवाभरणान्यथप्रहरणान्यादायभक्त्यार्पितान् ।
यानीयाऽक्तकासरासुरवधंतामीश्वरीमाश्रये ॥ २ ॥

माद्यच्छुंभनिशुंभविद्रुतमरु न्नर्त्ट प्रभृत्यादिते
याश्चोद्गुंफितसत्स्तवस्तवकजा मोदोदिताविष्कृतिः।
याधूम्रेचणचण्डमुण्डसहितौ तौ रक्तवीजान्वितौ
संख्येऽसंख्यचमूहतौहतवती तामीश्वरीमाश्रये ॥ ३ ॥
